मालतीमाधवं

नाम

प्रकरणम्।

महाकविश्रीभवभूतिविरचितम्।

जगद्धरकृतां टीकामवलम्ब्य

बि, ए, उपाधिधारिणा पण्डितकुलपतिना

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

विरचितया व्याख्यया समलङ्कृतम्।

द्वितीयसंस्करणम्।

सिद्धेश्वर यन्त्रे मुद्रितम्।

১৮৯৪।

প্রকাশক—শ্রীজীবানন্দবিদ্যাসাগর বি, এ,

২ নং রমানাথ মজুমদারের ষ্ট্রীট্, কলিকাতা।

প্রিণ্টর—শ্রীসিদ্ধেশ্বর পান

৩৮ নং শিবনারায়ণ দাসের লেন

কলিকাতা।



पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर बि, ए.

PANDIT JIBANANDA VIDYASAGARA B. A.

Superintendent Free Sanskrit College, Calcutta

मालतीमाधवं

नाम

प्रकरणम् ।

सानन्दं नन्दिहस्ताहतमुरजरवाहूतकौमारबर्हि-
त्रासान्नासाग्ररन्ध्रं विशति फणिपतौ भोगसङ्कोचभाजि ।
गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणे-
र्वैनायक्यश्चिरं वो वदनविधुतयः पान्तु चीत्कारवत्यः ॥ (१)

अपि च । चूडापीडकपालसङ्कुलगलन्मन्दाकिनीवारयो

---

(१) इह खलु कविः मालतीमाधवं नाम प्रकरणमुद्दिश्य रङ्गविघ्नोपशान्त्यै कर्त्तव्यतया नाट्यवस्तुनः पूर्वं नान्दीं निर्दिशति सानन्दमित्यादि । रूपकान्तः लौकिकवृत्तत्वेन कविकल्पितत्वेन अमात्यनायकत्वेन च प्रकरणमिद-मिति तथा चोक्तं दर्पणे । भवेत् प्रकरणं वृत्तं लौकिकं कविकल्पितम् । शृङ्गा-रोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक् । सापायधर्मकामार्थपरो धीरप्रशा-न्तक इति । शूलपाणेः शिवस्य ताण्डवे नृत्ये नन्दिहस्तेन आहतः ताडितः यो मुरजः तस्य रवेण आहूतस्य कौमारबर्हिणः कार्त्तिकेयमयूरस्य त्रासात् भीतस्य फणायाः शरीरस्य वा यः सङ्कोचः प्रसारणं तं भजते इति तस्मिन् तथोक्ते फणि-पतौ सर्पराजे नासाग्ररन्ध्रं नासिकाग्रबिलं सानन्दं यथा तथा विशति सति । अत्र नासारन्ध्रमित्यनेनैव चरितार्थत्वादग्रपदं झटिति प्रवेशेनैव तस्य हर्षसूचनाय प्रवेशस्य प्राचुर्यसूचकतया सानन्दमिति विशेषणं नानुपपन्नम् । गण्डयोः उड्डीनाभिः अलिमालाभिः मधुपपङ्क्तिभिः मुखरिताः सशब्दीकृताः ककुभो दिशो याभिस्ता-स्तथोक्ताः चीत्कारोऽत्युत्कटः शब्दः तद्विशिष्टा या वैनायक्यः विनायकाज्जाता वदनविधुतयः वो युष्मान् चिरं पान्तु विधुतीनामचेतनत्वेऽपि रक्षाकर्तृत्वं देवसम्ब-न्धित्वेनोपचारात् ।

विद्युत्प्रायललाटलोचनपुटज्योतिर्विमिश्रत्विषः ।
पान्तु त्वामकठोरकेतकशिखासन्दिग्धमुग्धेन्दवो
भूतेशस्य भुजङ्गवल्लिवलयस्रङ्नद्धजूटा जटाः ॥ (२)

अपि च । पक्ष्मालीपिङ्गलिम्नः कण इव तडितां यस्य कृत्स्नः समूहो
यस्मिन् ब्रह्माण्डमीषद्विघटितमुकुले कालयज्वा जुहाव ।
अर्चिर्निष्टप्तचूडाशशिगलितसुधाघोरझाङ्कारिकोणम्
तार्त्तीयीकं पुरारेस्तदवतु मदनप्लोषणं लोचनं वः ॥ (३)

[नान्द्यन्ते सूत्रधारः । (४)]

[अलमतिविस्तरेण । पुरतोऽवलोक्य ।]

---

(२) चूडेति । चूडायां य आपीडः शिरोमाला तस्य कपालैः सङ्कुलं व्याप्तं गलन्त्यः पतन्त्यः मन्दाकिनीवारयो यासु तास्तथोक्ताः । विद्युत्प्रायस्य ललाटे लोचनपुटस्य भालाक्षिपुटस्य ज्योतिषा विमिश्रा त्विट् यासां ताः अतएव अकठोरासु कोमलासु केतकशिखासु केतकीकुसुमाग्रेषु सन्दिग्धो भ्रान्तिविषयो मुग्धः सुन्दर इन्दुर्याभिस्ताः, तथा भुजङ्गा एव वल्ल्यो लतास्ता एव वलयाः स्रजः ताभिर्नद्धो बद्धो जूटः समूहः यासां ता भूतेशस्य धूर्जटेर्जटास्त्वां पान्तु रक्षन्तु अत्राप्युपचारात्त्वम् ।

(३) पक्ष्मालीति । यस्य लोचनस्य पक्ष्मालीपिङ्गलिम्नः नेत्रलोमराजि-पिङ्गलत्वस्य समूहस्तडितां कृत्स्नः कण इव, तथा कालयज्वा कालरूपो याजकः यस्मिन् लोचने ईषद्विघटितमुकुले किञ्चिदुन्मीलिते सति, ब्रह्माण्डं जुहाव अर्चिभिः स्फुलिङ्गनिकरैः निष्टप्तः तापितः यश्चूडाशशी ललाटेन्दुस्तस्मात् गलितः स सुधासारः अमृतप्रवाहस्तेन झङ्कारी शब्दायमानः कोणः अपाङ्गदेशो यस्य भाल-नेत्रानलनलेन नेत्रापाङ्गदेश एव पतनं सम्भवतीति भावः । तत् मदनप्लोषणं कामदाहकं पुरारेः शिवस्य तार्त्तीयीकं तृतीयं लोचनं वो युष्मान् अवतु रक्षतु ।

(४) नान्द्यन्त इति । नान्दीलक्षणं यथा आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता । इति दर्पणः । अत्र द्वादशपदा नान्दी । मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी । पदैर्युक्ता द्वादश-

अये ! उदितभूयिष्ठ (५) एष भगवानशेषभुवनद्वीपदीपकस्तपनस्तमुपतिष्ठे । [प्रणम्य] ।

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्त्ते !
धुर्य्यां लक्ष्मीमथ मयि भृशं धेहि देव ! प्रसीद ।
यद्यत्पापं प्रतिजहि जगन्नाथ ! नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन् ! भूयसे मङ्गलाय ॥ (६)

[नेपथ्याभिमुखमवलोक्य ।] मारिष ! सुविहितानि रङ्गमङ्गलानि सन्निपतितश्च (७) भगवतः कालप्रियनाथस्य यात्राप्रसङ्गेन नानादिगन्तवास्तव्यो (८) महाजनसमाजः । आदिष्टश्चास्मि विद्वज्जनपरिषदा, यथा, केनचिदपूर्वप्रकरणेन वयं विनोदयितव्या इति । तत्किमित्युदासते (९) भरताः ।

भिरष्टाभिर्वा पदैरन्वितेति लक्षणात् मङ्गल्यचन्द्रयोः शंसनात् मङ्गल्यचन्द्रप्रतिपादिका नान्दी । नान्द्यन्ते सूत्रधार इति पूर्वरङ्गस्य कर्त्तव्यतया निर्द्देशः ।

(५) उदितभूयिष्ठः उदितं भूयिष्ठं बहुलं यस्य सः । किञ्चिदवशिष्ट-रभ्युदय इति भावः ।

(६) कल्याणेति हे विश्वमूर्त्ते ! अखिलस्वरूप ! त्वं कल्याणानां माङ्गलिकानां महसां तेजसां भाजनं आधारोऽसि । हे देव ! धुर्य्यां महतीं लक्ष्मीं सम्पत्तिञ्च मयि भृशमतिशयेन धेहि प्रतिपादय त्वमित्यध्याहार्य्यम् । प्रसीद प्रसन्नो भव हे जगन्नाथ ! नम्रस्य मे मम यद्यत् पापं विद्यत इति शेषः । तत् प्रतिजहि अपनोदय हे भगवन् ! भूयसे प्रभूताय मङ्गलाय मङ्गलविधानाय भद्रं कल्याणजनकं भद्रमभीष्टं वितर समर्पय । अत्र सर्व्वाभिमतवस्तुप्रार्थनामुपादाय फलदानस्यावश्यम्भावित्वसूचनार्थेति ।

(७) सुविहितानि रङ्गमङ्गलानि रङ्गस्थलस्य मङ्गलानि कार्य्याणि सुष्ठु सम्पादितानि, सन्निपतितः उपस्थितः । कालप्रियनाथस्य तदाख्यदेवविशेषस्य ।

(८) दिगन्तवास्तव्यः दिङ्मण्डलवासी ।

(९) उदासते, उदासीनचित्ताः तिष्ठन्ति । भरताः नटाः ।

[प्रविश्य पारिपार्श्विकः] (१०)। भाव! (११) परिषन्निदेशगुण प्रबन्धं नाधिगच्छामः।

सूत्र। मारिष! कतमे ते गुणास्तत्र यानुदाहरन्त्यार्य्या विदग्धा मिश्रा भगवन्तो भूमिदेवाश्च।

नटः।

भूम्ना रसानां गहनाः प्रयोगाः सौहार्द्दहृद्यानि विचेष्टितानि।
औद्धत्यमायोजितकामसूत्रं चित्रा कथा वाचि विदग्धता च (१२)

सूत्र। स्मृतं तर्हि।

नटः। भाव! किमिव?।

सूत्र। अस्ति दक्षिणापथे विदर्भेषु पद्मपुरं नाम नगरम्। तत्र केचित्तैत्तिरीयिणः काश्यपाश्चरणगुरवः पङ्क्तिपावनाः पञ्चाग्नयो धृतव्रताः सोमपीथिनो ब्राह्मणा ब्रह्मवादिनः (१३) प्रतिवसन्ति स्म।

---

(१०) पारिपार्श्विकलक्षणं यथा भारतीयनाट्यशास्त्रे। सूत्रधारस्य पार्श्वे यः प्रचरन् कुरुतेऽर्थनाम्। काव्यार्थसूचनालापैः स भवेत् पारिपार्श्विकः।

(११) भाव! विद्वन्। परिषदा दर्शकेन निर्दिष्टो गुणो य[illegible]म!

(१२) भूम्ना रसानामिति। रसानां शृङ्गारादीनां भूम्नातिशयेन गहना दुष्प्रवेशा गम्भीरेति यावत् सौहार्देन निमित्तेन हृद्यानि हृदयङ्गमानि विचेष्टितानि नायकनायिकयो रमणीयव्यापारविशेषाः, आयोजितकामसूत्रं कृतमदनलक्षणं औद्धत्यं नायकगुणप्रकर्षरूपं, चित्रा विस्मयप्रयोजिका कथा, वाचि विदग्धता च वाङ्नैपुण्यमेतानि यत्र सन्तीत्यर्थः। एवंविधं नाट्यं अभिनयितुमादिशन्ति विद्वांस इति शेषः।

(१३) तैत्तिरीयिणः तैत्तिरीयशाखाध्यायिनः, तद्विद इत्यर्थः। काश्यपाः काश्यपगोत्रापत्यानि पंक्तिपावनाः सर्वश्रेष्ठास्तत: पावनत्वमित्यर्थः। पञ्चाग्नयः [illegible]काः दक्षिणाग्नि गार्हपत्याहवनीय सभ्यावसथ्यरूपाग्नि पञ्चकोपासकाः। सोमपीथिनः सोमरसपायिनः ब्रह्मविदः वेदज्ञाः।

ते श्रोत्रियास्तत्त्वविनिश्चयाय भूरि श्रुतं शाश्वतमाद्रियन्ते ।
इष्टाय पूर्ताय च कर्मणेऽर्थान् दारानपत्याय, तपोऽर्थमायुः॥
(१४)

तदामुष्यायणस्य तत्रभवतः सुगृहीतनाम्नो भट्टगोपालस्य पौत्रः पवित्रकीर्त्तेर्नीलकण्ठस्यात्मसम्भवो भट्टश्रीकण्ठपद-लाञ्छनो, भवभूतिनामा, जातूकर्णीपुत्रः, कविर्निसर्गसौहृदेन भरतेषु स्वकृतिमेवंप्रायगुणभूयसीमस्माकमर्पितवान् यत्र खल्वियं वाचो युक्तिः। (क)

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा,
कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥ (१५)

(क) तदामुष्यायणस्य तदंशोद्भवस्य। तत्रभवतः पूज्यस्य सुगृहीतनाम्नः पुण्यश्लोकस्य। श्री नीलकण्ठौ कण्ठे यस्य सः श्रीकण्ठः, तद्वाचकं पदं लाञ्छनं चिह्नं यस्य सः, नाम्ना श्रीकण्ठः इति भावः। भवभूतिः नामान्तरमेतत्। जातूकर्णीगोत्रोत्पन्ना जातूकर्णी भवभूतिमाता तत्पुत्रः। भरतेषु नटेषु। वाचोयुक्तिः वचनरचनम्।

---

(१४) त इति। ते श्रोत्रियाः ब्रह्मनिष्ठास्तत्त्वविनिश्चयाय, ब्रह्मज्ञानाय तत्त्वपदार्थनिर्णय इति भावः। शाश्वतं नित्यं श्रुतं औपनिषदविद्यां भूरि बहु इष्टाय यागादिकाय पूर्ताय खातादिकाय च कर्मणे तदर्थमित्यर्थः। अर्थान् धनसञ्चयान् तथा अपत्याय पुत्रार्थमेव दारान् भार्याः पुत्रार्थं क्रियते भार्या इति शासनात्। तपोऽर्थं तपस्याद्यै आयुर्जीवनम् आद्रियन्ते आदरं कुर्वन्तीत्यर्थः।

(१५) ये नामेति। ये जनाः केचित् इह प्रकरणात्मकरूपकमिदं नोऽस्माकं कर्मणि ग्रन्थे, अवज्ञां तन्वते। अवज्ञामवधीरणां प्रथयन्ति उद्घोषयन्ति ख्यापयन्तीत्यर्थः। जानन्तीति खल्वर्थे ते जनाः किमपि अल्पमेव तत्प्रणीतरूपकविशेषरसास्वादनप्रकारं जानन्ति, सुतरां तान् प्रति एष मत्कर्तृकरचनाप्रयत्नः मम यत्नो

अपि च। यद्वेदाध्ययनं, तथोपनिषदां सांख्यस्य, योगस्य च ज्ञानं तत्कथनेन किं ? न हि ततः कश्चिद्गुणो नाटके।
यत्प्रौढत्वमुदारता च वचसां यच्चार्थतो गौरवम्,
तच्चेदस्ति ततस्तदेव गमकं पाण्डित्यवैदग्ध्ययोः ॥ (१६)

ततो, यदस्माकमर्पितं प्रियसुहृदाऽत्रभवता भवभूतिनाम्ना प्रकरणं स्वकृतं मालतीमाधवं नाम, तदेव तत्रभवतः कालप्रियनाथस्य पुरतः प्रयोगेण प्रख्यापयितुमुद्यताः तत्सर्वे कुशीलवाः सङ्गीतप्रयोगेण मत्समीहितसम्पादनाय प्रवर्त्तन्ताम्।

नटः। [स्मृत्वा।] एवं क्रियते युष्मदादेशः किन्तु या यस्य युज्यते भूमिका, तां खलु तथैव भावेन सर्वे वर्ग्याः पाठिताः, सौगतपारिव्राजिकायास्तु कामन्दक्याः प्रथमभूमिकां भाव एवाधीते, तदन्तेवासिन्यास्त्ववलोकितायाः।

सूत्र। ततः किम्।

न भवतीति शेषः। अथायेत् सर्वे तर्हि कथं यत्नस्त्वया क्रियत इत्याह उत्पत्स्यते इति। हि यतो मम समानधर्मा तुल्यगुणः कोऽपि जन इति शेषः। उत्पत्स्यते जनिष्यति यतः कालो निरवधिर्निःसीमा अस्ति, पृथ्वी च धरण्यपि विपुला सुविस्तृता अस्ति विद्यते। अत्र ये निन्दन्ति नाम्ना येऽप्यन्ये हीना इत्या-र्थापत्त्याऽर्थापत्तिरलङ्कारः।

(१६) यदिति। यद्वेदाध्ययनं तथा उपनिषदां शारीरकमीमांसाया-म्, सांख्यस्य कापिलीयस्य योगस्य पतञ्जलिप्रणीतस्य पातञ्जलस्य च ज्ञानं तत्कथनेन तयोः सांख्ययोगयोः कथनेन च किं ? न हि नाटके ततः कश्चित् गुणो-ऽस्ति। किन्तु वचसां यत् प्रौढत्वं गाम्भीर्यभावः यद्वा प्रौढत्वं पदार्थे वाक्यरचनं वाक्यार्थे च पदरचनम्। प्रसादः सारल्यं उदारता अग्राम्यत्वं यच्च अर्थतः अर्थे गौरवं तच्च चेद् यदि विद्येत ततस्तर्हि तदेव हि पाण्डित्यवैदग्ध्ययोः पाण्डित्यनैपुण्य-योर्गमकं प्रतिपादकम्।

नटः। ततः प्रकरणनायकस्य मालतीवल्लभस्य माधवस्य वर्णिकापरिग्रहः कथम्?

सूत्र। मकरन्दकलहंसप्रवेशावसरे तत्सुविहितम्।

नटः। तर्हि तत्प्रसिद्धप्रयोगादेवात्रभवतः सामाजिकानुपास्महे।

सूत्र। बाढं, एषोऽस्मि कामन्दकी संवृत्तः।

नटः। अहमप्यवलोकिता। [इति परिक्रम्य निष्क्रान्तौ।]

[प्रस्तावना। (१७)]

[ततः परिवृत्य रङ्गपट्टिकानेपथ्ये कामन्दक्यवलोकिते प्रविशतः]

कामन्दकी। वत्से! अवलोकिते!

अवलोकिता। आणवेदु भअवदी।

काम। अपि नाम तयोः कल्याणिनोर्भूरिवसुदेवरातापत्ययोर्मालतीमाधवयोरभिमतः पाणिग्रहः स्यात्?। [वामाक्षिस्पन्दनं सूचयित्वा सहर्षम्।]

विवृण्वतेव कल्याणमानन्दजेन चक्षुषा।
स्फुरता वामकेनापि दाक्षिण्यमवलम्ब्यते॥ (१८)

अव। महन्तो क्खु भअवदीए एसो चित्तविक्खेवो।

---

(१७) प्रस्तावनालक्षणमाह दर्पणकारः। चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा।

(१८) विवृण्वतेति। कल्याणं शुभं विवृण्वता कथयितुमारभमाणेनेवेत्युत्प्रेक्षा। आनन्दजेन चक्षुषा हृदयवाहिना वामकेन अदक्षिणेन अननुकूलेनापि स्फुरता सता दाक्षिण्यं अवश्यं आनुकूल्यञ्च अवलम्ब्यते क्रियते।

अच्चरीअं, अच्चरीअं, जं दाणिं चीरचीवरपरिच्छदं पिण्डवाद-मेत्तपाणधारणीं भअवदीं, ईदिसे आआसे, अमच्चभूरिवसू णिओएदि। तहिं उक्खडिदसंसाराबन्धो अप्पा तुम्हेहिं णिउञ्जीअदि (क)।

कामं। वत्से! मा मैवं ब्रूहि।

यन्मां विधेयविषये स भवान्नियुङ्क्ते,
स्नेहस्य तत्फलमसौ प्रणयस्य सारः।
प्राणैस्तपोभिरथवाभिमतं मदीयैः,
कृत्यं घटेत सुहृदो, यदि तत्कृतं स्यात्॥ (१८)

अयि, किं न वेत्सि यदेकत्र नो विद्यापरिग्रहाय नानादिगन्तवासिनां साहचर्य्यमासीत्, तदैव चास्मत्सौदामिनी-समक्षमनयोर्भूरिवसुदेवरातयोर्वृत्तेयं प्रतिज्ञा, अवश्यमावाभ्यामपत्यसम्बन्धः कर्त्तव्य इति। तदिदानीं विदर्भराज-

(क) महान् खलु भवत्या एव चित्तविक्षेपः। आश्चर्य्यमाश्चर्य्यं, यदिदानीं चीरचीवरपरिच्छदां पिण्डपातमात्रप्राणधारणीं भगवतीं ईदृशे व्यापारे अमात्य-भूरिवसुर्नियोजयति। तर्हि उत्खातसंसारावबन्ध आत्मा युष्माभिर्नियुज्यते। उत्-खातितः उन्मूलितः संसाररूपः अवबन्धः बन्धः येन सः।

(१८) यदिति। स भवान् पूज्यः भूरिवसुः मालतीपिता विधेयविषये कर्त्तव्यविषये यत् मां नियुङ्क्ते प्रेरयति तत् स्नेहस्य फलं, असौ प्रणयस्य सारः सारभावः स्नेहवतो निष्प्रीतो वा अन्यथा कथं मां नियुङ्क्तेति भावः। मदीयैः प्राणैरथवा तपोभिः सुहृदः मित्रस्य अभिमतम् ईप्सितं कृत्यं कार्य्यं यदि घटेत निष्पद्येत तत् कृत्यं कार्य्यं कृतं सम्पादितं स्यात् प्राणादिभिरपि कार्य्यं सम्पादनीयम् इति अभ्यन्तरनिष्कर्षः।

(१०) अपत्येति। अपत्यस्य सन्तानस्य सम्बन्धविधेः प्रतिज्ञा मित्रस्य सुहृदः

मन्त्रिणा सता देवरातेन, माधवं पुत्रमान्वीक्षिकीश्रवणाय,
कुण्डिनपुरादिमां पद्मावतीं प्रहिण्वता सुविहितम्।

अपत्यसम्बन्धविधिप्रतिज्ञा प्रियस्य नीता सुहृदः कृतिश्च।
अलोकसामान्यगुणस्तनूजः परोक्षमार्यं प्रकटीकृतश्च ॥ (२०)

अव। तदो, किं ति मालदीं अमच्चो अप्पणा माहवस्स ण पडिवादेदि, जेण चोरिआविवाहे भअवदीं तुवरावेदि? (ख)

काम। तां याचते नरपतेर्नर्मसुहृन्नन्दनो नृपमुखेन।
तत्साक्षात्प्रतिषेधः कोपाय शिवस्त्वयमुपायः ॥ (२१)

अव। अच्चरीअं! अच्चरीअं! ण क्खु अमच्चो माहवस्स णामम्पि जाणादित्ति णिरवेक्खदाए लक्खीअदि (ग)।

काम। संवरणं हि तत्।

(ख) ततः किमिति मालतीममात्यो माधवस्य आत्मना न प्रतिपादयति। येन चौरिकाविवाहे भगवतीं त्वरयति।

(ग) आश्चर्यमाश्चर्यम्! न खल्वमात्यो माधवस्य नामापि जानातीति निरपेक्षतया लक्ष्यते।

प्रियसखस्य भूरिवसोः कृतिश्च अवश्यं नीता प्रापिता अलोकसामान्यगुणः भूतल-दुर्लभगुणस्तनूजः सुतः माधवः वर दक्षः परोक्षमार्यं प्रकटीकृतः प्रकाशितः विवाहप्रवृत्तिसाधनार्थम् प्रकटीकृतः दर्शितः।

(२१) तामिति। नन्दननामा राज्ञः नर्मसुहृत् अन्तःपुरस्थितः नृप-मुखेन नृपद्वारा तां मालतीं याचते। तत्र साक्षात् निषेधः राज्ञः कोपाय भविष्यति। अतः व्याजात् अयं तु महात्मा गुप्तसंयोजनरूपः उपायः शिवः परि-णामसुखकरः।

विशेषतस्तु बालत्वात्तयोर्विज्ञातभावयोः ।
तेन माधवमालत्योः कार्यः स्वमतिनिह्नवः ॥ (२२)

अपि च । अनुरागप्रवादस्तु वत्सयोः सार्वलौकिकः ।
श्रेयोऽप्यवाकमेवं हि प्रतार्यौ राजनन्दनौ ॥ (२३)

पश्य, बहिः सर्वाकारप्रगुणरमणीयं व्यवहरन्,
पराभ्यूहस्थानान्यपि तनुतराणि स्थगयति ।
जनं विद्वानेकः सकलमभिसन्धाय कपटै-
स्तटस्थः स्वानर्थान् घटयति, च मौनञ्च भजते ॥ (२४)

अव । अणवि तुस्स वअणादो, तेण तेण वअणोवण्णासेन भूरिवसुमन्दिरासण्णराअमग्गेण माहवो सञ्चारीअदि । (च)

(च) अन्यदपि युष्मद्वचनात् तेन तेन वचनोपन्यासेन, भूरिवसुमन्दिरासन्नराज-मार्गेण माधवः सञ्चार्यते ।

---

(२२) विशेषत इति । विशेषतस्तु विज्ञातभावयोर्विदिताभिप्राययोः अनयोः मालतीमाधवयोर्बालत्वादज्ञत्वात् तेन अमात्येन भूरिवसुना स्वमतिनिह्नवः आत्म-ज्ञानगोपनं कार्यः करणीयः, तावपि यथा प्रकृतं न जानीतस्तथा कृतमित्यर्थः ।

(२३) अनुरागेति । वत्सयोरनुरागप्रवादस्तु पूर्वमिलनख्यापनजनश्रुतिस्तु सार्वलौकिकः, सर्वलोकेषु विदितः ख्यातः एवं अवाकमपि श्रेयः अभीष्टं हि यस्मात् राजनन्दनौ राजा नृपतिः नन्दनः नृपतेः नर्मसुहृत् च तौ प्रतार्यौ वञ्च-नीयौ । मालतीमाधवयोरन्योन्यानुरागेण गान्धर्वपरिणयः स्यात् ; न मया कारि इति राज्ञः सन्देहो यथा न स्यादिति भावः ।

(२४) बहिरिति । एको विद्वान् तटस्थः उदासीन इव बहिर्लोके सर्वा-कारेण सर्वप्रकारेण प्रगुणरमणीयं प्रकृष्टगुणसौन्दर्यं व्यवहरन् कुर्वन् तनुतराणि अल्पान्यपि पराभ्यूहस्थानानि परतर्कस्थानानि स्थगयति निवारयति । तथा सकलं जनं कपटैर्व्याजात् सकलमभिसन्धाय वञ्चयित्वा स्वान् अर्थान् प्रयोजनानि घटयति सम्पादयति मौनञ्च भजते तूष्णीमास्ते ।

काम । कथितमेव मे मालतीधाच्या लवङ्गिकया ।

भूयोभूयः सविधनगरीरथ्यया पर्य्यटन्तं
दृष्ट्वा, दृष्ट्वा, भवनवलभीतुङ्गवातायनस्था ।
साक्षात्कामं नवमिव रतिर्मालतीमाधवं यत्
गाढोत्कण्ठालुलितलुलितैरङ्गकैस्ताम्यतीति ॥ (२५)

अव । वाढं, जदो ताए वि उक्कण्ठाविणोदणिमित्तं माहव-
ड़िच्छन्दओ आलिहिदं, तं लवङ्गिआए अज्ज मन्दारिआए
त्थे णिहिदं दाव (क)

काम । [विचिन्त्य ।] सुविहितं लवङ्गिकया, यतो.
ाधवानुचरः कलहंसकस्तां विहारदासीं मन्दारिकां काम-
ते, इत्यनेन तीर्थेन घटेत तत्प्रतिच्छन्दकं उपोद्घातेन माध-
ान्तिकमुपेयादित्यभिप्रायः ।

अव । अज्ज, माहवोवि कोदूहलमुप्पादिअ, मए प्पउत्तम-
अमहूसवं मअरंदुज्जाणं पभादे अणुप्पेसिदो, तहिं
मल मालदी गमिस्सदि, तदो अण्णोण्णदंसणं भोदुत्ति (ख)

(क) वाढं, यतस्तयाऽप्युत्कण्ठाविनोदनिमित्तं माधवप्रतिच्छन्दकमालि-
ातं तल्लवङ्गिकया अद्य मन्दारिकाया हस्ते निहितं तावत् । वाढं, अतितरा-
ृत्यर्थः । प्रतिच्छन्दकं प्रतिकृतिम् ।

(ख) अद्य माधवोऽपि कौतूहलमुत्पाद्य मया प्रवृत्तमदनमहोत्सवं मदनो-
ानं प्रभातेऽनुप्रेषितस्तत्र किल मालती गमिष्यति, ततोऽन्योन्यदर्शनं भवत्विति ।

---

(२५) भूय इति । भवनवलभीतुङ्गवातायनस्था प्रासादोपरिस्थगवाक्ष-
विवरवर्त्तिनी मालती सविधनगरीरथ्यया सन्निकटस्थितनगरीमार्गेण पर्य्यटन्तं
भ्रमन्तं माधवं नवं मनोहरं साक्षात् कामं कन्दर्पं रतिरिव भूयोभूयः वारंवारं
लोकार्थं विवक्षितः । दृष्ट्वा दृष्ट्वा पुनः पुनरवलोक्य । यत् सा गाढोत्-
कण्ठालुलितलुलितैर्भृशोत्कण्ठाम्लपितैरङ्गैर्मृदङ्गैस्ताम्यतीति व्यक्त इति ।

काम। साधु, वत्से,! साधु, अनेन मय्यभियोगेन स्मारयसि मे पूर्वशिष्यां सौदामिनीम्।

अव। भअवदि! सा सोदामिणी अहुणा, समासादि-दअच्चरीअमन्तसिद्धिप्पहावा, सिरिपव्वदे कावालिअव्वदं धारेदि (ज)।

काम। कुतः पुनरियं वार्त्ता?

अव। अत्थि, एत्थ णअरी, महामसाणसम्पदेसे, कराला चामुण्डा (झ)

काम। अस्ति, सा किल विविधजीवोपहारप्रियेति साहसिकानां प्रवादः।

अव। तहिं क्खु, सिरिपव्वदादो आअदस्स, रत्तिंच-रिणो णादिदूरारद्धवासिणो साहअस्स, कुणवासिणो घोर-घण्टणामधेअस्स, अन्तेवासिणी महाप्पभावा कवालकुण्डला णाम, अणुसञ्झं समागच्छदि, तदो एव्व पउत्ती (ञ)

काम। सर्वं सौदामिन्यां सम्भाव्यते।

अव। अलं दाव एदिणा। भअवदि! एसोवि सह-अरो माहवस्स, बालमित्तो मअरन्दो णाम, णंदणस्स बहिणि

(ज) भगवति! सा सौदामिनी अधुना समासादितातिशयमन्त्रसिद्धि-प्रभावा श्रीपर्वते कापालिकव्रतं धारयति।

(झ) अस्त्यत्र नगर्यां महाश्मशानसविधे कराला नाम चामुण्डा।

(ञ) तत्र खलु श्रीपर्वतादागतस्य रात्रिञ्चारिणो नातिदूरारब्धवासिनः साधकस्य, कुणपाशिनोऽघोरघण्टनामधेयस्य, अन्तेवासिनी महाप्रभावा कपाल-कुण्डला नाम, अनुसन्ध्यं समागच्छति, ततः एवं प्रवृत्तिः। साधकस्य [illegible]। कुणपाशिनः कापालिकस्य। प्रवृत्तिर्वार्त्ता।

(ट) अलं तावदेतेन। भगवति! एषोऽपि सहचरो माधवस्य, बाल[illegible]

मदयन्तिअं अइ समुब्बहदि, तंपि णाम माहवस्स दुदीअं पिअं किदं भोदि (अ)

काम । नियुक्तैव मया मत्प्रियसखी तत्र बुद्धरक्षिता ।

अव । सुविहिदं भअवदीए किदम् ।

काम । [विचिन्त्य ।] तदुत्तिष्ठ, माधवप्रवृत्तिमुपलभ्य, मालतीमेव पश्यावः ।

[इत्युभे उत्तिष्ठतः ।]

काम । [विचिन्त्य ।] अत्युदारप्रकृतिर्मालती, तन्निपुणं निसृष्टार्थदूतीकल्पस्तन्त्रयितव्यः । * सर्वथा ।

शरज्ज्योत्स्ना कान्तं कुमुदमिव तं नन्दयतु सा,
सुजातं कल्याणीभवतु कृतकृत्यः स च युवा ।
वरीयानन्योन्यप्रगुणनिर्माणनिपुणो,
विधातुर्व्यापारः फलतु च मनोज्ञश्च भवतु ॥ २६ ॥

[इति निष्क्रान्तौ विष्कम्भकः] (२७)

मित्रं मकरन्दो नाम, नन्दनस्य भगिनीं मदयन्तिकां यदि समुद्वहति, तदपि नाम माधवस्य द्वितीयं प्रियं कृतं भवति ।

* अत्युदारा अत्युदात्ता प्रकृतिः यस्याः सा । नायकस्य नायिकाया वा अभिप्रायं ज्ञात्वा स्वमत्या या कार्यं साधयति सा निसृष्टार्था दूती तस्याः कल्पः व्यापारः तन्त्रयितव्यः प्रस्तावनीयः इतिभावः ।

---

(२६) शरदिति । सा मालती शरज्ज्योत्स्ना शारदीया कौमुदी कान्तं रम्यं कुमुदमिव सुजातं शोभनजन्मानं तं माधवं नन्दयतु कल्याणीभवतु स च युवा माधवः कृतकृत्यः कल्याणीभवतु वरीयान् वरिष्ठः अन्योन्यस्य प्रगुणगुण उत्कृष्टगुणसन्निर्माणनिपुणस्तद्घटनाकुशलः विधातुः स्रष्टुर्व्यापारश्च फलतु फलवान् भवतु मनोज्ञश्च भवतु ।

(२७) विष्कम्भकलक्षणमाह दर्पणकारः वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः । संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शित इति ।

[ततः प्रविशति गृहीतचित्रोपकरणः कलहंसः ।]

कल। कहिं दाणिं तुलिदमअरद्धअरूवावलेवविब्भमा-
वहिज्जमानदोहिअचमाहप्पं भट्टमाहवं पेक्खिस्सं। [परि-
क्रम्य।] परिस्संतोम्हि, जाव इमस्सिं उज्जाणे मुहुत्तं विस्स-
मिअ, मअरंदसहअरं भट्टमाहवं पेक्खिस्सं (ट)

[इति प्रविश्योपविशति। ततः प्रविशति मकरन्दः]

मक। कथितमवलोकितया मदनोद्यानं गतो माधव इति, भवतु, तत्रैव गच्छामि। [परिक्रम्य दृष्ट्वा च।] दिष्ट्या अयं वयस्य इत एवाभिवर्त्तते। [निरूप्य।] अस्य तु

गमनमलसं, शून्या दृष्टि:, शरीरमसौष्ठवम्,
श्वसितमधिकं, किं न्वेतत् स्यात्किमन्यदितोऽथवा।
भ्रमति भुवने कन्दर्पाज्ञा, विकारि च यौवनम्,
ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम् ॥ (२८)

(ट) कुत्रेदानीं तुलितमकरध्वजरूपावलेपविभ्रमावचिपमालतीहृदयमाहात्म्यं भर्तृमाधवं प्रेक्षिष्ये। परिश्रान्तोऽस्मि यावदिहोद्याने मुहूर्त्तं विश्रम्य मकरन्दसहचरं भर्तृमाधवं प्रेक्षिष्ये। उपकरणम् उपढौकनम्। तुलितः मकरध्वजस्य कामस्य रूपावलेपः रूपगर्वः येन एवंविधेन विभ्रमेण चर्चित तिरस्कृतं मालतीहृदयस्य माहात्म्यं गाम्भीर्यं येन तम्।

---

(२८) गमनमिति। अलसं गमनं मन्थरगमनम् इत्यर्थः। दृष्टिर्नेत्रं शून्या बाह्यपदार्थज्ञानाभावात् शरीरमसौष्ठवं मालिन्यसमुपेतमिति। अधिकं स्वभावातिरिक्तं श्वसितं निश्वासः एतत्सर्वं किं नु स्यात् ? अथवा इतोऽन्यस्मात् अन्यत् किम्। कामजमुत रोगजमिति संशय्य अथवेति संशयच्छेदमाह। नेदं रोगकृतं किन्तु कामकृतमेवेति। भुवने संसारे कन्दर्पाज्ञा भ्रमति सर्वं जनं आक्रामति। एतेनास्याः कामाज्ञाया अनिवार्यत्वं सूचितम्। यौवनञ्च विकारि, उन्मादकारि, एतदप्यवश्यम्भावि:। ललितमधुरा मदुहर्षिरास्ते ते प्रसिद्धा

[ततः प्रविशति यथानिर्दिष्टो माधवः ।]

माधवः । (२८) [स्वगतं] ।

तामिन्दुसुन्दरमुखीं सुचिरं विभाव्य
चेतः कथं कथमपि व्यपवर्त्तते मे ।
लज्जां विजित्य, विनयं विनिवार्य्य, धैर्य्य-
मुन्मथ्य, मन्मथविवेकमकाण्ड एव ॥ (३०)

आश्चर्य्यम् । यद्विस्मयस्तिमितमस्तमितान्यभाव-
मानन्दमन्दममृतप्लवनादिवाभूत् ।
तत्सन्निधौ तदधुना हृदयं मदीय-
मङ्गारचुम्बितमिव व्यथमानमास्ते ॥ (३१)

मक । सखे ! माधव ! इत इतः ।

माध । [परिक्रम्य] । कथं, प्रियवयस्यो मम मकरन्दः ।

मक । [उपसृत्य ।] सखे ! ललाटन्तपस्तपति घर्मांशुस्तदस्मिन् उद्याने मुहूर्त्तमुपविशाव: ।

माध । यथा प्रियवयस्याय रोचते । [इत्युभावुपविशतः] ।

भावाः पदार्थाः चौरतां धैर्यं चिपन्ति छिन्दन्ति । अत्र नर्मस्फोटाख्या कौशिकी वृत्तिः नर्मस्फोटो भावलेशैः सूचिताल्परसो मतः इति साहित्यदर्पणे ।

(२८) स्वगतलक्षणं यथा "यत्तु श्राव्यं न सर्वस्य स्वगतं तदिहोच्यते ।"

(३०) तामिति । इन्दुसुन्दरमुखीं विधुमुखीं तां मालतीं सुचिरं बहुक्षणपर्य्यन्तं विभाव्य निरूप्य अकाण्ड एव अकस्मादेव मे मम मन्मथविवेकं अनपजातं चेतश्चित्तं लज्जां विजित्य विनयं विनिवार्य्य धैर्य्यमुन्मथ्य कथं कथमप्यतिकष्टेन व्यपवर्त्तते निवर्त्तते । मालत्या अन्यतः कथं मे चित्तं इतिभावः ।

(३१) यदिति । यन्मदीयं हृदयं विस्मयस्तिमितम् आश्चर्य्यस्तब्धम् अस्तमितान्यभावं केवलं तदेकपरायणम् आनन्दमन्दं हर्षजडम् अमृतप्लवनादिव सुधारसादिव तत्सन्निधौ प्रियासन्निधौ अभूत् तदानीं प्रियाकपोलोदित मथनवत्यी तन्मदीयं हृदय अधुना अङ्गारचुम्बितमिव अङ्गारस्पृष्टमिव दहति इति शेषः ।

कल । [हृष्टा ।] कधं, मअरंदसहअरो इदं ज्जेव बालउलुज्जाणं अणुसरेदि माहवो, ता दंसेमि, मअणवेअणाखिज्जमाणमालदीलोअणसुहावहं अत्तणो से पडिच्छंदअं । अहवा मुहुत्तं विस्सामसोक्खं दाव अणुभोदु । (ठ)

मक । तदस्यैव तावत् उच्छ्वसितकुसुमकेसरकषायशीतलामोदवासितोद्यानस्य * काञ्चनपादपस्याधस्तादुपविशाव: ।

(तथा कुरुत: ।)

मक । वयस्य ! माधव ! अस्त्येव तावत्सकलनगराङ्गनाजनप्रवर्त्तितमहोत्सवाभिराममदनोद्यानयात्राप्रतिनिवृत्तमत्याहितं भवन्तमवधारयामि, अपि नाम मनागवतीर्णोऽसि रतिरमणवाणगोचरम् ?

[माधवो लज्जया अधोमुखस्तिष्ठति ।]

मक । [विहस्य ।] तत्किमवनतमुग्धमुखपुण्डरीकस्तिष्ठसि ?

पद्य । (११) अन्धेषु जन्तुषु रजस्तमसाहृतेषु,
विश्वस्य धातरि मम: परमेश्वरे च ।

(ठ) कथं मकरन्दसहचर इदमेव बालवकुलोद्यानमनुसरति माधवस्तद्दर्शयामि मदनवेदनाखिद्यमानमालतीलोचनसुखावहम् आत्मनस्य प्रतिच्छन्दकम् । अथवा मुहूर्तं विश्रामसौख्यं तावदनुभवतु ।

* उच्छ्वसितानाम् कनककुसुमानां कुसुमानां ये केसरा: किञ्जल्का: तै: कषाय: लोहित: शीतलश्च य: आमोद: तेन वासितं सुरभीकृतं उद्यानं येन तस्य ।

सर्वमङ्गलमयं, आयम उच्चै: । अतएव व्यवनामं क्रियत् आसे । अधुना कैवल्यं कं ब्रह्मनुभवति ;

(११) अन्धेष्विति । अन्धेषु जन्तुषु प्राणिषु रजस्तमसा आवृतेषु आच्छादितेषु च विश्वस्य धातरि निर्माणकारके ब्रह्मणि परमेश्वरे महादेवे च रजस्तमसाहिते

सोऽयं प्रथितविभवः खलु चित्तजन्मा
मा लज्जया तव कथञ्चिदपह्नुतिर्भूत् ॥

माध। वयस्य! किं न कथयामि श्रूयतां। गतोऽह-मवलोकिताजनितकौतुकः कामदेवायतनं, तत्र च इतस्ततः परिक्रम्यावलोक्य च परिश्रमादुल्लसितमदिरामोदमधुरपरि-मलाकृष्टसकलमिलदलिपटलसङ्कुलाकुलितवकुलमुकुलावली-मनोहराभरणरमणीयस्याङ्गनभुवो बालवकुलस्य आलवाल-परिसरे स्थितः। तत्र च यदृच्छया निरन्तरनिपतितानि कुसु-मानि आदाय विदग्धरचनामनोहरां स्रजमभिनिर्मातुमारब्ध-वानस्मि। अनन्तरञ्च सञ्चारिणीव देवस्य मकरकेतोर्जगद्विजय-वैजयन्तिका, निर्गत्य गर्भभवनादुज्ज्वलविदग्धसुभगनेपथ्यविर-चनाविभावितकुमारीभावा महानुभावप्रकृतिः अत्युदारपरि-जना कापि तत्र एव आगतवती।

(११) सा रामणीयकनिधेरधिदेवता वा
सौन्दर्य्यसारसमुदायनिकेतनं वा।

काश्यादिनये तु परमेश्वरस्य गुणत्रयसाम्यविशिष्टत्वेनैवसृष्टिरित्यर्थः। स्मरः अविचलितः। परमेश्वरापेक्षया कामस्य हीनत्वेऽपि तत्सृष्टचक्रप्रवर्त्तना-दतिप्रशंसा। सोऽयं प्रथितविभवः विख्यातमाहात्म्यः चित्तजन्मा मनोजः कामः खलु निश्चये। ते तव लज्जया कथञ्चित् कष्टेन अपह्नुतिर्मा भूत्। लज्जां त्यक्त्वा प्रश्नोत्तरदाने मा मौनावलम्बिना भवता भाव्यमिति भावः। अरविन्द-मनुप्रवेशमकरोति प्रसिद्धम्।

(११) सेति। हे सखि! सा रामणीयकनिधेः सौन्दर्याकरस्य अधिदेवता आभरणस्थानीयाभरणमिति भावः। अथवा सौन्दर्य्यसारसमुदायानां लावण्य-शोभाकान्त्यादीनां निकेतनम् आश्रयीभूता विधेयप्राधान्यात् नपुंसकत्वम्। तस्याः सृष्टा चित्रं निश्चितं इन्दुसुधारसचन्द्रज्योत्स्नादि कारणं मदनस्य वेधा मदन एव सृष्टिकारकः लावण्योपमादीनां मदोष्मा मदन एव भवति। एतत्र

तस्याः, सखे ! नियतमिन्दुसुधामृणाल-
ज्योत्स्नादि कारणमभून्मदनश्च वेधाः ॥

अथ सा प्रणयिनीभिः अनुचरीभिः अविरलकुसुमसञ्चया-ननोन्मादोद्दीपनीभिः अभ्यर्थ्यमाना, तमेव बालवकुलपादपोद्देशमागतवती, तत्राच कस्मिंश्चिदपि महाभागधेयजन्मनि * अनुदिवसोपचीयमानमिव मन्मथव्यथाविकारमुपलक्षितवानस्मि।

यतः तस्याः। परिमृदितमृणालीम्लानमङ्गं, प्रवृत्तिः,
कथमपि परिवारप्रार्थनाभिः क्रियासु।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मी-
मभिनवकरिदन्तच्छेदपाण्डुः कपोलः ॥ (३४)

सा पुनः मम प्रथमदर्शनक्षणात्प्रभृति अमृतवर्त्तिरिव चक्षुषोः अतिशयानन्दमुत्पादयन्ती, अयस्कान्तमणिशलाकेव लोहधातुमन्तःकरणमाकृष्टवती, किं बहुना, *

(३५) सन्तापसन्ततिमहाव्यसनाय तस्या-
मासक्तमेतदनपेक्षितहेतु चेतः।

ज्योत्स्नादिकमस्य उपकरणमात्रमेव इव निर्मिता अत एवास्या मालत्याः अलौकिकसौन्दर्यम् अनेकेषाम् इन्द्वादीनामपेक्षणं सुव्यक्तमेव नानापरिकर सहायेन। तदेकम् आधाराधेययोरनुरूपत्वात् परिकरो मम इति भावः।

* महाभागधेयजुषि पुंसि।

(३४) परिमृदितेति। अङ्गं तस्याः शरीरं परिमर्दितमृणालीम्लानं निष्पीडितमृणालवत् म्लानम्, परिवाराणामनुचरीणां प्रार्थनाभिः प्रार्थनावाक्यैः क्रियासु कथमपि कष्टेनापि प्रवृत्तिर्भवति इति शेषः। अपि च तस्याः निष्कलङ्कस्य कलयति धारयति अभिनवकरिदन्तच्छेद इव पाण्डुः कपोलः गण्डः। निष्कलङ्कस्य कलङ्करहितस्य हिमांशोश्चन्द्रस्य लक्ष्मीं शोभां कलयति धत्ते इत्यर्थः। चन्द्रापेक्षयापि तस्याः मुखकमलानुरूपत्वं सूचकम्।

(३५) सन्तापेति। सन्तापस्य सन्ततिः प्रवाहः सैव महाव्यसनं विपुल-

प्रायः शुभञ्च विदधात्यशुभञ्च जन्तोः,
सर्वङ्कषा भगवती भवितव्यतैव ॥

मक। वयस्य माधव! स्नेहस्य निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत्।

पश्य। व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते।
विकसति हि पतङ्गस्योदये पुण्डरीकम्
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ (२६)
ततस्ततः?

माध। ततश्च तत्र,
सभ्रूविलासमथ सोऽयमितीरयित्वा,
सप्रत्यभिज्ञमिव मामवलोक्य तस्याः।

विपद, तदर्थमेव एतत् चेतो हृदय मनित्यर्थः। अनपेक्षितहेतु कारणमनपेक्ष्यैव तस्या मामकमनुरक्तम्। तदवलम्बनेन नैव सुखं दृश्यते प्रत्युत केवलं सन्तापराशिर्वर्द्धते इत्यर्थः। अर्थान्तरं न्यस्यति, सर्वङ्कषा सर्वहरा भगवती भवितव्यतैव अवश्यम्भावि प्राक्तनकर्म प्रायो बाहुल्येन जन्तोः प्राणिनः शुभञ्च अशुभञ्च विदधाति करोति। जनानां सुखदुःखं अदृष्टस्यैव कारणत्वात् भवितव्यतामूलक मेवात्र दुःखमिति तात्पर्यार्थः।

(२६) व्यतिषजतीति। आन्तरः अन्तरगतः कोऽपि हेतुः पदार्थान् व्यतिषजति सम्बध्नाति। प्रीतयः प्रेमाणः बहिरुपाधीन् बाह्यहेतून् न संश्रयन्ते नावलम्बन्ते खलु निश्चयार्थम्। पदार्थान्तरमेलने अन्तर्गतो हेतुरेव तत्र कल्पकत्वेन निश्चितः प्रीत्यादयस्तु बाह्यहेतूनां सौन्दर्यादीनां सद्भावे नापि समर्था इत्यर्थः। पतङ्गोदये सूर्योदये पुण्डरीकं कमलमतिकोमलमपीत्यर्थः। विकसति स्फुटति, हिमरश्मौ हिमांशौ उद्गते उदिते चन्द्रकान्तो मणिविशेषः द्रवति गलति तीव्रातीव्रयोः सूर्येन्दुकरयोः सम्बन्धेन कमलपाषाणपदार्थयोः विकसनद्रवणयोः तादृशकार्यं प्रति आन्तरिकहेतुत्वमायातीत्यर्थः। अतः अत्र स्वाभाविक एव हेतुः इति तात्पर्यम्।

अन्योन्यभावचतुरेण सखीजनेन,
मुक्तास्तदा स्मितसुधामधुराः कटाक्षाः ॥ (१७)

मक। [स्वगतम्।] कथं प्रत्यभिज्ञापि नाम?

माध। अथ ताः सलीलमुत्तालकरकमललुलितताडि-तातरलवलयावलीकम् उच्चलमत्तकलहंसविभ्रमाभिरामच-रणसञ्चरण-झणझणाय-मानमञ्जीरमञ्जुशिञ्जितानुविद्धमेख-लाकलापकिङ्किणीरणत्कारमुखरं प्रतिनिवृत्य भर्तृदारिके! दिष्ट्या वर्द्धामहे, यदत्रैव कोऽपि कस्यापि तिष्ठतीति माम् अङ्गुल्योद्दर्शनविलासेन आख्यातवत्यः।

मक। [स्वगतम्]। हन्त, अन्यतः प्रागनुरागस्योद्भेदः।

कल। [आकर्ण्य]। कथं सरसरमणीयाणुबन्धिनी इत्योपणकथा? (ड)

मक। ततस्ततः।

माध। अत्रान्तरे किमपि वाग्विभवातिवृत्त-
वैचित्र्यमुल्लसितविभ्रममुत्पलाक्ष्याः।
तद्भूरिसात्त्विकविकारमपास्तधैर्य-
माचार्यकं विजयि मान्मथमाविरासीत् ॥ (१८)

---

(१७) वक्तृविभावीति। अन्योन्यभावचतुरेण परस्परानुरागनिपुणेन तस्याः मालत्याः सखीजनेन कोऽयम् अयं वः पतिरिव सखि! त्वं विभावय इत्यादि वक्तृविभावं वक्तृलक्षितवचः। इति वचनं पूर्वोक्तवत्या कथयित्वा, प्रत्यभिज्ञा अनुभवयोग्यं तथा यत्र वर्तमानं रूपमिव पूर्वानुभूतमिव आलम्बनीकृत्य तदा तस्याः स्मितमेव सुधा तया मधुराः कटाक्षाः अपाङ्गनिक्षेपा मुक्ताः क्षिप्ता इत्यर्थः।

(१८) अत्रान्तर इति। अत्रान्तरे तादृशसमये उत्पलाक्ष्याः पद्मनेत्रायाः किमप्यपूर्वं वाग्विभवातिवृत्तवैचित्र्यं वाक्पथातीतवैचित्र्याम् उल्लसितविभ्रमं विलसद्विलासं भूरिसात्त्विकविकारं विविधसात्त्विकविकारयुक्तम् अपास्तधैर्यं

ततश्च । स्तिमितविकसितानामुल्लसद्भ्रूलतानाम्,
मसृणमुकुलितानां प्रान्तविस्तारभाजाम् ।
प्रतिनयननिपाते किञ्चिदाकुञ्चितानाम्,
विविधमहमभूवं पात्रमालोकितानाम् ॥ (३९)

तैश्च । अलसवलितमुग्धस्निग्धनिष्पन्दमन्दै-
रधिकविकसदन्तर्विस्मयस्मेरतारैः ।
हृदयमशरणं मे पक्ष्मलाक्ष्याः कटाक्षै-
रपहृतमपविद्धं पीतमुन्मूलितञ्च ॥ (४०)

एवमहन्तु तस्याः सर्वाकारहृदयङ्गमायाः सम्भाव्यमानस्नेहरसेनाभिसन्धिना विधेयीकृतोऽपि पारिप्लवत्व मात्मनोऽपनिह्नोतुकामः, प्राक्प्रस्तुतस्य बकुलदाम्नो यथा कथञ्चिदवशेषं ग्रथितवानेव, ततो भिन्नवेत्रगन्धपाणिवर्षवरप्रायपुरुषपरिवारा, गजवधूमारुह्य, नगरगामिनं मार्गम् इन्दुवदना अलङ्कृतवती । तदा च ।

धैर्यमाश्रि अतएव विजयि अन्यैरजेयमित्यर्थः । तत् प्रसिद्धं मान्मथं मन्मथसम्बन्धि आचार्य्यकं गुरुत्वं कामजनितचेष्टितमित्यर्थः आविरासीत् प्रादुर्बभूव ।

(३९) स्तिमितेति । स्तिमितविकसितानां निश्चलस्फुटानां उल्लसद्भ्रूलतानां विचलितभ्रुवां मसृणमुकुलितानां मृदुस्निग्धमुकुलभावानां प्रान्तविस्तारभाजां विस्तृतापाङ्गदेशानां, प्रतिनयननिपाते नयननिपातं प्रति विभक्त्यर्थेऽव्ययीभावः । निमेषपतनकाले इत्यर्थः । किञ्चिदाकुञ्चितानां किञ्चित्सङ्कुचितानाम् आलोकितानां नयनानां अहं विविधम् अनेकप्रकारं पात्रं भाजनमभूवम् जातः ।

(४०) अलसेति । अलसवलितमुग्धस्निग्धनिष्पन्दा अतएव मन्दैः, आलस्यमापन्नैः, अधिकविकसदन्तः, अधिकं विकसत् अन्तर्येषां तैः विस्मयस्मेरतारैः विस्मययुक्ततारकैः तैश्च तैरिति विशेषणसमासः । पक्ष्मलाक्ष्याः निबिडपक्ष्मसमेताक्ष्याः कटाक्षैरपाङ्गैर्मे मम अशरणमसहायं हृदयम् अपहृतम् अपविद्धं परिक्षिप्तं पीतम् उन्मूलितञ्च क्षतोन्मूलनमिव जातम् ।

यान्त्या मुहुर्वलितकन्धरमाननं तद्
आवृत्तवृन्तशतपत्रनिभं वहन्त्या ।
दिग्धोऽमृतेन च, विषेण च, पक्ष्मलाक्ष्या,
गाढं निखात इव मे हृदये कटाक्षः ॥ (४१)

ततः प्रभृति

परिच्छेदातीतः सकलवचनानामविषयः,
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापञ्च कुरुते ॥ (४२)

अपि च । परिच्छेदव्यक्तिर्भवति न पुरःस्थेऽपि विषये,
भवत्यभ्यस्तेऽपि स्मरणमतथाभावविरसम् ।
न सन्तापच्छेदो हिमसरसि वा चन्द्रमसि वा
मनो निष्ठाशून्यं भ्रमति, च किमप्यालिखति च । (४३)

---

(४१) यान्त्येति । मुहुर्वारं वारं वलितकन्धरं वक्रितग्रीवं यथा स्यात् तथा पश्चाद्वर्तिनं मां द्रष्टुमित्यर्थः । यान्त्या गच्छन्त्या आवृत्तवृन्तशतपत्रनिभम् आवर्तितनालकमलसदृशं तत् सुन्दरम् आननं मुखं वहन्त्या पक्ष्मलाक्ष्या च ... सुनेत्रया अमृतेन दिग्धः लिप्तस्तथा विषेण च दिग्धो लिप्तः कटाक्षः मे मम हृदये गाढं निखात इव प्रोथित इव ।

(४२) परिच्छेदेति । परिच्छेदातीतः इयत्तारहितः इयत्तया वक्तुमशक्य इत्यर्थः । सकलवचनानाम् अविषयः सकलवाक्पथातीत इत्यर्थः । तथा पुनर्जन्मनि परलोके अस्मिन् इह च काले यः अनुभवपथम् अनुभवज्ञानविषयत्वं न गतवान् इह परत्र च अनुभवितुमशक्य इत्यर्थः । विवेकस्य विवेचनायाः प्रध्वंसात् नाशात् उपचितमहामोहः, वर्धितमोहान्धकारः, अतएव गहनः भीषणः, तस्य च, विवेकनाशकत्वेन तत्वात् सुतरां चितमित्यर्थः । कोऽपि अनिर्वचनीयः विकारः विरहजन्यवैकृतम् अन्तः अन्तःकरणं जडयति मोहयति, तापं कुरुते तापयति च । एतेन विरहव्याकुलत्वमुक्तम् ।

(४३) परिच्छेदेति । पुरःस्थेऽपि समीपवर्तिन्यपि विषये घटपटादौ

कल। दिट्ठं क्खु एसो कण्णवि अवहरिदो, अवि णाम मालदी जेव्व सा भवे? (ङ)

मक। [स्वगतम्]। अहो! अभिष्वङ्गः, तत्किं निषेधयामि सुहृदम्।

अथवा। मा मूमुहत् खलु भवन्तमनन्यजन्मा,
मा ते मलीमसविकारघना मतिर्भूत्।
इत्यादि नन्विह निरर्थकमेव यस्मात्
कामश्च जृम्भितगुणो, नवयौवनञ्च ॥ (४४)

(ङ) दृष्टं खल्वेष कयाऽप्यपहृतः, अपि नाम मालत्येव सा भवेत्?।

परिच्छेदव्यक्तिः इयत्ताङ्कुरणम् अयमेव घट इत्यादिकं न भवति। अभ्यस्तेऽपि पुनः पुनराहतेऽपि अतथाभावविरसम् अतथाभावेन अयथार्थत्वेन विरसं वैरस्यवत् करणं भवति। विषयान्तरं कर्तुमुद्युक्तोऽपि अतिपथात् स्खलितोऽस्मीति भावः। सन्तापच्छेदी विरहव्यथाच्छेदकः हिमसरः शीतलशरीरोऽपि न चन्द्रमणि वा हिमांशो वा न भवतीत्यर्थः। विशिष्टवस्तुनस्तादृक् सम्भावनायामपि तदकरणात् विरहजन्यसन्तापस्यातिशय्यं वर्तते। तथा मनः कर्तुं निश्चायं धैर्यरहितं सत् भ्रमति चञ्चलं भवतीत्यर्थः। किमपि आकाशकुसुमवत् वस्तु आलिखति रचयति च। एतेन मनसः सङ्कल्पाख्यावस्था उक्ता।

(४४) मेति। अनन्यजन्मा न अन्यस्मात् जन्म यस्य स कन्दर्पः भवन्तं मा मूमुहत् खलु। मा मन्दयोगे अनुपार्थे लुङ्। ते तव मतिः मलीमस-विकारघना मालिन्यनिविडा माभूत् न भवतु पूर्ववत् लुङ्। ननु भोः! माधव इत्यर्थः। इत्यादि पूर्वोक्तं निषेधवाक्यम् इह त्वयि निरर्थकमेव। यस्मात् यतो हेतोः कामश्च जृम्भितगुणः प्रकटितसामर्थ्यः तवेति शेषः। नवयौवनञ्च जृम्भित-गुणं विकृतिपरिणामिनामन्वयः। पक्षे कामः जृम्भितगुणः आततज्यधनुर्गुणः, नवयौवनं जृम्भितगुणं प्रकाशितसधर्मम्। कामोद्रेके यूनामकृत्योद्यमादिकं भवतीति प्रसिद्धम्।

[प्रकाशम्।] अपि भवतैव विदिते तदन्वयनामनी ?

माध। सखे ! श्रूयतां, अथ तस्याः करेणुकारोहणसमय एव मत्तः सखीकदम्बकादन्यतमा वारयोषित् विलम्ब्य, बालबकुलकुसुमावचयक्रमेण नेदीयसी भूत्वा, प्रणम्य, कुसुमापीडव्याजेन मामेवमुक्तवती, महाभाग ! सुश्लिष्टगुम्फतया रमणीय एव वः सुमनसां सन्निवेशः, कुतूहलिनी च नो भर्तृदारिका वर्त्तते, तस्यामभिनवो विचित्रः कुसुमेषुव्यापारस्य भवतु कृतार्थता वैदग्ध्यस्य, फलतु निर्माणरमणीयता, विधातुः आसादयतु स्वरस एव भर्तृदारिकायां कण्ठावलम्बनमहार्घतामिति।

मकरन्दः। अहो ! वैदग्ध्यम्।

माध। तया च मदनुयुक्तया समाख्यातमियममात्यभूरिवसोः प्रसूतिर्मालती नाम, अहञ्च प्रसादभूमिर्भर्तृदारिकायाः धात्रेयिका लवङ्गिका नामेति।

कल। [सहर्षम्।] किं णाम मालदीत्ति ? दिट्ठिआ विअसिदं क्खु भअवदा देवेण कुसुमाउहेण, ता जिदं अम्हेहिं (क)

मक। अमात्यभूरिवसोरात्मजेत्यपर्याप्तिर्बहुमानस्य।

अपि च। मालती मालतीति मोदते भगवती कामन्दकी, तां च किल राजा नन्दनाय प्रार्थयते इति किंवदन्ती श्रूयते।

माध। तया चाहमभ्यर्थमानस्तां बकुलमालामात्मनः

(क) किं नाम मालतीति ? दिष्ट्या विकसितं खलु भगवता देवेन कुसुमायुधेन, तज्जितमस्माभिः।

कण्ठादवतार्य्य दत्तवान् असौ पुनरभिनिविष्टया दृशा मालतीमुखावलोकनविह्वलतया * किमर्थविरचितैकभागान्तामेव बहुमन्यमाना महानयं प्रसाद इति आकृत्य गृहीतवती, अनन्तरञ्च यात्राभङ्गप्रचलितस्य महतः पौरजनस्य सङ्कुलेन विघटितायां तस्यामागतोऽस्मि।

मक। वयस्य! मालत्या अपि स्नेहदर्शनात् स्निग्धमेतत्, योऽपि हि कपोलपाण्डुतादिचिह्नसूचितः प्राक् मदनवस्थायाः कामाभिषङ्गः, सोऽपि त्वन्निबन्धन इत्यभिव्यक्तमेवैतत्, एतत्तु न ज्ञायते, क्व दृष्टपूर्वस्त्वया वयस्य इति, न खलु तादृश्यो महाभागधेयाः कुमार्य्योऽन्यत्रासक्तमनसो भूत्वा अन्यत्र अनुरागिण्यो भवन्ति। अपिच।

अन्योन्यमभिसदृश्यां सखीनाम् तस्यास्त्वयि प्रागनुरागलिङ्गम्।
कस्यापि कोऽपीति निवेदितञ्च धात्रेयिकायाश्चतुरं वचश्च॥ (४५)

कल। [उपसृत्य।] एदं चित्तफलअं।

इति चित्रफलकं दर्शयति। उभौ पश्यतः।

मक। कलहंसक! केनैतन्माधवस्य प्रतिबिम्बमभिलिखितम्?

---

* विह्वलतया व्याकुलतया।

(४५) अन्योन्येति। हे वयस्य! अन्योन्यमभिसदृशां अन्योन्यं सन्निहिते उन्मीलिते दृशौ यासां परस्परदर्शनविकसितलोचनाः सखीनां मालतीसहचरीणां तस्याः मालत्याश्च प्राक् प्रथमम् अनुरागचिह्नं सौहार्दचिह्नं कस्यापि जनस्य कोऽप्यनुरागैकहेतुश्च इति धात्रेयिकायाश्चतुरं सुरसं श्लिष्टमिति यावत् वचश्च मयि निवेदितम् विज्ञापितम्। अत्रानुरागधार्त्तौ श्लिष्टवाक्यतोः परस्परवाक्यार्थहेतुकत्वात् काव्यलिङ्गम् अलङ्कारः।

कल। जेण जेव्व दे हिअअं अवहरिदम् (थ)।

मक। अपि मालत्या ?

कल। अध इं।

माध। वयस्य मकरन्द ! प्रसन्नप्रायस्ते वितर्कः।

मक। कलहंसक ! कुतोऽस्याधिगमः ?

कल। मए दाव मन्दारिआए हत्थादो, ताएवि लवङ्गिआसआसादो (द)।

मक। अथ किमाह मन्दारिका माधवालेख्यप्रयोजनं मालत्याः ?

कल। उक्कण्ठाविणोदोत्ति (ध)

मक। वयस्य माधव ! समाश्वसिहि।

या कौमुदी नयनयोर्भवतः सुजन्मा,
तस्या भवानपि मनोरथबन्धबन्धुः।
तत्सङ्गमं प्रति सखे ! न हि संशयोऽस्ति,
यस्मिन् विधिश्च मदनश्च कृताभियोगः॥ (४६)

(थ) येनैवास्य हृदयमपहृतम्।

(द) मया तावन्मन्दारिकाया हस्तात्, तयापि लवङ्गिकासकाशात्।

(ध) उत्कण्ठाविनोद इति।

---

(४६) येति। सुकुमाराकारा भवतो नयनयोर्नेत्रयोः कौमुदी तद्वदाह्लाददायिका वा भवतीत्यर्थः। तस्याः मालत्याः सुजन्मा शोभनजन्मा भवानपि मनोरथबन्धबन्धुः अभिलाषनिबन्धनाय मित्रः नयनकौमुदीस्वरूप इत्यर्थः। हे सखे ! माधव ! तत्सङ्गमं प्रति मालतीमिलनं प्रति नहि संशयः सन्देहोऽस्ति। उभयोरनुरागेङ्गितादिभिर्मनोभावस्य प्रकटितत्वादिति भावः। यस्मिन् सङ्गमे विधिः स्रष्टा च मदनः कामश्च कृताभियोगः कृतपरिश्रमः भवतीत्यर्थः। विधिमदनाभ्यामेव युवयोर्मिलनं घटयिष्यत इत्यर्थः।

दृष्टव्यसरूपा च भवतो विकारहेतुः तदत्रैव लिख्यतां मालती।

माध। यदभिरुचितं वयस्याय, तदुपनय चित्रफलकं चित्रवर्त्तिकाञ्च। [मकरन्द उपनयति]।

माध। [लिखन्]। सखे मकरन्द !

वारंवारं तिरयति दृशोरुद्गमं वाष्पपूर-
स्तत्सङ्कल्पोपहितजडिम स्तम्भमभ्येति गात्रम्।
सद्यः स्विद्यन्नयमविरतोत्कम्पलोलाङ्गुलीकः,
पाणिर्लेखाविधिषु नितरां वर्त्तते, किङ्करोमि॥ (४७)

तथापि व्यवसितोऽस्मि। [चिरादभिलिख्य प्रदर्शयति]।

मक। [विलोक्य]। उपपन्नस्तावदत्र भवतोऽभिष्वङ्गः। [सकौतुकम्]। कथमचिरेणैव निर्माय लिखितः श्लोकः। [वाचयति]।

---

(४७) वारंवारमिति। बाष्पपूरः अश्रुप्रवाहः वारंवारं पुनःपुनः वीप्सायां द्विरुक्तिः। दृशोर्नयनयोः उद्गमं प्रचारं तिरयति आच्छादयति। तिरस्करोतीति क्वचित् टीकायां लिखम्। तत्सङ्कल्पोपहितजडिम तस्या मालत्याः सङ्कल्पेन निरन्तरध्यानेन उपहितः जनितः जडिमा कार्य्याक्षमत्वरूपः यस्य तत् गात्रं देहः स्तम्भं अचलत्वदशाम् अभ्येति प्राप्नोति तथा अयमस्मदीयः स्विद्यन् सञ्जातस्वेदः अविरतोत्कम्पलोलाङ्गुलीकः अविरतमुत्कम्पो यस्य सः, अतएव लोलाङ्गुलीकः लोलाश्चञ्चला अङ्गुल्यो यस्य स अङ्गुलीषी अप्। ततः समासान्त-करस्समासः। अयं मदीयः पाणिः करः लेखाविधिषु चित्रव्यापारेषु नितरामतिशयेन तिलक्यायेत्यादिनाम् समासः। वर्त्तते तिष्ठति किन्तु न लिखति किं करोमि उपायान्तराभावात् कार्य्याक्षमत्वं जातम्। अत्र माधवस्य कम्पस्वेदरूपा सात्त्विकी अवस्था व्यक्ता।

जगति जयिनस्ते ते भावा नवेन्दुकलादयः,
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये।
मम तु यदियं याता लोके विलोचनचन्द्रिका,
नयनविषयं जन्मन्येकः स एव महोत्सवः॥ (४८)

[प्रविश्य सत्वरं मन्दारिका]। कलहंसअ! पदाणुसारेण उवलद्धोसि। [माधवमकरन्दौ दृष्ट्वा सलज्जम्]। कधं, तेवि महाणुभावा इधजेव्व? (ग)।

[उपसृत्य प्रणमति।]

उभौ। मन्दारिके! इहास्यताम्।

मन्दा। [उपविश्य।] कलहंसअ! उवणेहि मे चित्तफलअं।

कल। [गृहीत्वा।] गेह्न एदम्।

(ग) कलहंसक! पदानुसारेण उपलब्धोऽसि। कथं तावपि महानुभावौ अत्रैव?

---

(४८) जगतीति। जयिनः उत्कृष्टाः प्रकृतिमधुराः स्वभावसुन्दरास्ते ते प्रसिद्धाः नवेन्दुकलादयः बालसुधांशुकौमुदीप्रभृतयः भावाः पदार्थाः अन्ये तद्भिन्नाश्च जगति सन्ति, ये भावा मनो हृदयं मदयन्ति आह्लादयन्ति। चन्द्रादीनामाह्लादजनकत्वे कथं मालत्यां तवानुराग इत्याशङ्क्याह ममेति। किन्तु लोके भुवने इयं विलोचनचन्द्रिका नेत्रकौमुदी यत् मम नयनविषयं दृग्गोचरत्वं याता प्राप्ता जन्मनि समस्ते। एकः अद्वितीयः स एव तद्दर्शनरूप उत्सवः महोत्सवः भवतीति शेषः। चन्द्रादीनां सुखाह्लादजनकत्वे तदपेक्षया मालत्याः सर्वातिशायित्वं सूचितम्। चन्द्रादीनान्तु लौकिकं सुखं तेन मालती एव एका जीवनादपि प्राणादपि गुर्वीति भावः।

मन्दा। [विलोक्य]। कलहंसअ! केण उण, किंणिमित्तं वा, एत्थ मालदी आलिहिदा ?। (प)

कल। जो जेव णिमित्तेण मालदीए (फ)।

मन्दा। [सहर्षं]। दिट्ठिआ दंसिदफलं दाणिं विण्णाणं पआवइणो (ब)।

मक। मन्दारिके! यदेव वस्तुनि एष ते वल्लभः कथयति, अपि तथा तत् ?

मन्दा। महाभाअ! अधइम्।

मक। क्व पुनर्मालती माधवं प्राग् दृष्टवती ?

मन्दा। लवङ्गिआ भणादि, वादाअणगदेत्ति।

मक। वयस्य! ननु अमात्यभवनासन्नरथ्ययैव बहुशः सञ्चरावहे, तदुपपन्नमेतत्।

मन्दा। अणुमण्णन्तु मं महाणुभावा, जाव एदं भअवदो देवस्स मअणस्स सुचरिदं पिअसहीए लवङ्गिआए णिवेदेमि (भ)

मक। प्राप्तावसरमेतद्भवत्याः।

[मन्दारिका चित्रफलकं गृहीत्वा निष्क्रान्ता]।

मक। वयस्य! खरतरकिरणोऽयं भगवान् सहस्रदीधितिः अलङ्करोति मध्यमह्नः, तदेहि संस्त्यायमेव * गच्छावः।

[इत्युत्थाय परिक्रामतः]।

(प) कलहंसक! केन पुनः किंनिमित्तं वा अत्र मालती आलिखिता।

(फ) यः एव निमित्तेन मालत्याः।

(ब) दिष्ट्या दर्शितफलमिदानीं विज्ञानं प्रजापतेः। विज्ञानं शिल्पनिर्माणकौशलम्।

(भ) अनुमन्यन्तां मां महानुभावाः, यावदिदं भगवतो देवस्य मदनस्य सुचरितं प्रियसख्या लवङ्गिकाया निवेदयामि।

* संस्त्यायं गृहम्।

माध। एवं हि मन्ये।

घर्माम्भोविसरविसर्पणैरिदानीम्
मुग्धाक्ष्याः परिजनवारसुन्दरीणाम्।
तत्प्रातर्विरचितविचित्रपत्रलेखा-
वैदग्ध्यं जहति कपोलकुङ्कुमानि ॥ (४९)

अपि च। उन्मीलन्मुकुलकरालकुन्दकोश-
प्रश्च्योतद्घनमकरन्दगन्धबन्धो ! ।
तामीषत्प्रचलविलोचनां नताङ्गी-
मालिङ्गन् पवन ! मम स्पृशाङ्गमङ्गम् ॥ (५०)

मक। अभिहन्ति, हन्त कथमेव माधवम्
सुकुमारकायमनवग्रहः स्मरः।

---

(४९) घर्मेति। इदानीं मध्याह्ने। घर्माम्भोविसरविसर्पणैः घर्माम्भसां स्वेदजलानां विसरः धारा तस्य विसर्पणैरित्थंकृतप्रसारणैः मुग्धाक्ष्याः सुन्दर्याः परिजनवारसुन्दरीणां परिजनगणिकानां कपोलकुङ्कुमानि गण्डस्थलकुङ्कुम-लेपनानि (कर्पूर) तत् प्रसिद्धं प्रातः प्रभातसमये विरचितविचित्रपत्रलेखावै... रचितकस्तूरिकापत्रावलीकपोलभूषणसौन्दर्य्यं जहति त्यजन्ति। प्रातःकालापेक्षयापि मध्याह्ने स्वकपोलकुङ्कुमानां स्थानभ्रष्टत्वमाधिक्यमुत्प्रेक्षितम्। प्रातर्विरचितानां यथास्थानभूषणकुङ्कुमादिलेपनं मध्याह्ने च सुकुमारतया तस्य निःसृतत्वम् वर्णितम्।

(५०) उन्मीलदिति। उन्मीलन्ति ईषद्विकसितानि मुकुलानि यस्य स करालो भीषणः कुन्दकोशः, विरहात् अवस्थायुक्तत्वाच्च भीषणत्वमित्यर्थः। तस्मात् प्रश्च्योतन् गलन् यो घनः निविडः मकरन्दः कुसुमरसः तस्य यो गन्धः परिमलः तस्य बन्धुः सहचरः तत् सम्बुद्धिः। हे तादृश ! पवन ! वायो ! ईषत्प्रचलविलोचनां दरविकम्पितदृष्टिं विरहकाले पवनस्य भीषणव्यापारवत्तया समन्ततश्चलित-लोचनां नताङ्गीं तां मालतीम् आलिङ्गन् स्पृशन् मम अङ्गमङ्गं प्रत्यवयवं स्पृश, मालती मालालिङ्गनजन्यसौभाग्यातिशयेन पवनस्य महत्त्वमपि तादृशसौरभ्य-लाभसम्पादितभावः।

अचिरेण वैकृतविवर्त्तदारुणः,
कलभं कठोर इव कूटपाकलः ॥ (५१)

तदद्य भगवती कामन्दकी नः शरणम् ॥

माध । [स्वगतम् ।] आश्चर्य्यम् !

पश्यामि तामित इतः पुरतश्च पश्चात्
अन्तर्बहिः परित एव विवर्त्तमानाम् ।
उद्बुद्धमुग्धकनकाब्जनिभं वहन्ती-
मासक्ततिर्य्यगपवर्त्तितदृष्टि वक्त्रम् ॥ (५२)

[प्रकाशं ।] वयस्य ! मम हि सम्प्रति,

प्रसरति परिमाथी कोऽप्ययं देहदाह-
स्तिरयति करणानां ग्राहकत्वं प्रमोहः ।
रणरणकविवृद्धिं बिभ्रदावर्त्ति गात्रम्,
ज्वलति हृदयमन्तस्तन्मयत्वञ्च धत्ते ॥ (५३)

इति निष्क्रान्ताः सर्वे ।

इति बकुलवीथी नाम प्रथमोऽङ्कः ।

---

(५१) अभिहन्तीति । अनवग्रहः प्रतिबन्धशून्य एषः स्मरः कामः सुकुमारकायं सुकोमलाङ्गं माधवं वैकृतविवर्त्तदारुणः विकारान्यथाभावकठिनः कठोरः चिकित्साऽसाध्यः कूटपाकलः करिवातज्वरः कलभं करिशावकमिव अचिरेण झटिति कथमभिहन्ति प्रहरति व्यथयतीत्यर्थः । हन्तेति खेदे स इव स इति निदर्शना साच दुर्जयस्मरकलुषप्रहारकल्पकैव सहीर्य्यते हृदयमयोः सङ्करः ।

(५२) पश्यामीति । उद्बुद्धमुग्धकनकाब्जनिभं उद्बुद्धं विकसितं मुग्धं कान्तं यत् सुवर्णपद्मं तन्निभं ततसदृशं आसक्ततिर्य्यगपवर्त्तितदृष्टि आसक्ता अति अनुरक्ता तिर्य्यगपवर्त्तिता तिर्य्यक्कुञ्चिता दृष्टिर्यत्र तत् वक्त्रं मुखं वहन्तीं, तथा अन्तर्बहिः अभ्यन्तरे बाह्येऽपि च परितश्चतुर्दिक्षु विवर्त्तमानां गमनवक्रचारिणीं तामिव मालतीमिव इतः इतः पुरतश्च पश्यामि अवलोकयामि ।

(५३) प्रसरतीति । परिमाथी पीड़कः कोऽप्यनिर्वचनीयोऽयं देहदाहः

द्वितीयोऽङ्कः।

—:•—

ततः प्रविशतश्चेट्यौ।

एका। हला! अक्कोडमालापरिसरे अवलोइदादुदीआ तुमं किं मन्तअन्ती आसि? (क)

द्वितीया। सहि! तेण किल माहवप्पिअवअस्सेण मअरन्देण सअलो ज्जेव्व मअणुज्जाणवुत्तन्तो भअवदीए णिवेदिदो (ख)।

प्रथमा। तदो किं?

द्वितीया। तदो भट्टिदारिअं दट्ठुकामाए भअवदीए पउत्तिणिमित्तं अवलोइदा अणुप्पेसिदा। मए वि ताए कधिदं, जधा लवङ्गिआदुदीआ विविक्ते भट्टिदारिआ वट्टदित्ति (ग)।

(क) हला! अङ्कोठमालापरिसरे अवलोकिताद्वितीया त्वं किं मन्त्रयन्त्यासीः।

(ख) सखि! तेन किल माधवप्रियवयस्येन मकरन्देन सकल एव मदनोद्यानवृत्तान्तो भगवत्यै निवेदितः।

(ग) ततो, भर्तृदारिकां द्रष्टुकामया भगवत्या प्रवृत्तिनिमित्तं अवलोकिता अनुप्रेषिता, मयापि तस्यै कथितं, यथा लवङ्गिकाद्वितीया विविक्ते भर्तृदारिका वर्त्तते।

शरीरसन्तापः प्रसरति समन्ताद्वर्त्तते। प्रमोहः अज्ञानं करणानामिन्द्रियाणां प्राक्तनम् अवलम्बनं तिरयति आच्छादयति। आवर्त्तं विवर्त्तमानं गात्रं स्व-रसवर्त्तिविरहि प्रत्यग्रमुखं विभ्रत् दधानं अथवा स्वरसवशविरहि कामविरहि विभ्रत् ज्वलति, अन्तर्हृदयं अन्तःकरणं तत्सम्बन्धं मालतीरूपं धत्ते आश्रयते। अत्र तापजनितमनस्तापरूपा कामावस्था उक्ता।

प्रथ। हला! लवङ्गिआ क्खु केसरकुसुमाइं अवचिणोमित्ति, मअणुज्जाणादो जेव्व आगदा ता किं सम्पदं सम्पत्ता? (घ)

द्विती। अथइं, तं क्खु पराबहन्तीं जेव्व हत्थे गेह्निअ, पडिसिद्धपरिअणा, भट्टिदारिआ उपरिअलिन्दअं समारूढ़ा (ङ)।

प्रथ। णूणं तस्स महाणुभावस्स सङ्कधाए अत्ताणं विणोदेदि (च)।

द्विती। [निश्वस्य।] कुदो से आसासो! एदिणा अज्ज सविसेसदंसणेण अदिभूमिं क्खु ताए अहिणिवेसो गमिस्सदि। अण्णञ्च, णन्दणस्स कारणादो महाराओ भट्टिदारिअं पत्थयन्तो अमच्चेण विण्णत्तो (छ)।

प्रथ। किंत्ति?

द्विती। पहवदि णिअस्स कण्णआजणस्स महाराओत्ति। ता जादं आमरणं क्खु हिअअसल्लं मालदीए माहवाणुराओत्ति तक्केमि (ज)।

(घ) हला! लवङ्गिका खलु केसरकुसुमान्यवचिनोमीति, मदनोद्यानादेव आगता तत् किं साम्प्रतं संप्राप्ता।

(ङ) अथ किं, तां खलु परापतन्तीमेव हस्ते गृहीत्वा, प्रतिषिद्धपरिजना, भर्तृदारिका उपर्य्यलिन्दं समारूढ़ा।

(च) नूनं तस्य महानुभावस्य संकथया आत्मानं विनोदयति।

(छ) कुतस्तस्या आश्वासः। एतेनाद्य सविशेषदर्शनेनातिभूमिं खलु तस्या अभिनिवेशो गमिष्यति। अन्यच्च, नन्दनस्य कारणान्महाराजो भर्तृदारिकां प्रार्थयमानोऽमात्येन विज्ञप्तः। अतिभूमिं उत्कर्षम्। अभिनिवेश आसक्तिः।

(ज) प्रभवति निजस्य कन्यकाजनस्य महाराज इति। तस्माज्जातमामरणं खलु हृदयशल्यं मालत्या माधवानुराग इति तर्कयामि।

प्रम। अवि णाम, भअवदी किंपि एत्थ भअवदीत्तणं दंसइस्सदि। (झ)

द्विती। अइ असम्बद्धमणोरहे! एहि, गच्छम्ह। (ञ)

[इति परिक्रम्य निष्क्रान्ते प्रवेशक:।] (ट)

[तत: प्रविशत्युपविष्टा सोत्कण्ठा मालती लवङ्गिका च।]

मालती। हुं सहि! तदो, तदो।

लवङ्गिका। तदो तेण महाणुभाएण उवणीदा मे इअं बउलमाला (ठ)। [इति मालामर्पयति]।

माल। [गृहीत्वा, सस्पृहं निर्वर्ण्य।] सहि! एक्कपास-विसम पडिबद्धा क्खु इअं विरअणा (ड)।

लव। एत्थ दाव परमणीअत्तणं तुमं ज्जेव अवरज्झसि (ढ)

माल। कधं विअ?

लव। जेण सो मुद्धो दुव्वा-सामलङ्गो तधा विहत्थी-किदो (ण)।

माल। पिअसहि लवङ्गिए! सव्वधा आसासणसीलासि (त)।

(झ) अपि नाम भगवती किमप्यत्र भगवतीत्वं दर्शयिष्यति। भगवतीत्वं प्राभाविकैश्वर्यम्।

(ञ) अयि असम्बद्धमनोरथे! एहि गच्छाव।

(ट) प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजित:। अङ्कद्वयान्तर्विज्ञेय: शेषं विष्कम्भके यथा।

(ठ) ततस्तेन महानुभावेनोपनीता मे एषा बकुलमाला।

(ड) सखि! एकपार्श्वविषमप्रतिबद्धा खल्वियं विरचना। प्रतिबद्धा घटिता।

(ढ) अत्र तावदरमणीयत्वं त्वमेवापराध्यसि।

(ण) येन स मुग्धो दूर्वाश्यामलाङ्गस्तथा विहस्तीकृत:। विहस्तो व्याकुल:।

(त) प्रियसखि लवङ्गिके। सर्वथा आश्वासनशीलासि।

लव। सहि! का एत्थ आसासणसीअलदा? णं भणामि, सोवि पिअसहीए मन्द-मारुदन्दोलन्त-पप्फुल्ल-पुण्डरीअ-विब्भमेहिं पढमावदण-वउलावली-विरअणावटंभ-संजमिद-बलामोडि-वित्थरन्तेहिं लोअणेहिं, विजिम्भमाण-विब्भम-त्थिमिद-दीह-परम्ह-परिवत्तणा-विलास-तरङ्गिद-भ्रूलदा-विडम्बिदाणङ्ग-सारङ्ग-विब्भम-विअट्टं अवलोअअन्तो पच्चक्कीकिदो ज्जेव्व (थ)।

माल। [लवङ्गिकां परिष्वज्य]। अम्मो पिअसहि! किं तस्स दाव महाणुभावस्स साहाविआ ज्जेव्व मुहुत्तमभिधादिणो जणस्स विप्पलम्भहेतुआ विलासा, आदु जहा पिअसही सम्भावेदि? (द)

लव। [विहस्य सासूयमिव]। तुमम्पि सहावेण ज्जेव्व तस्सिं अवसरे असङ्कीदअं णच्चिदासि (ध)।

(थ) सखि! कात्र आश्वासनशीतलता? ननु भणामि, सोऽपि प्रियसख्या मन्दमारुतान्दोलनप्रफुल्लपुण्डरीकविभ्रमाभ्यां प्रथमावतरणबकुलावलीविरचनावष्टम्भसंयमितबलामोटिविस्तृताभ्यां लोचनाभ्यां विजृम्भमाणविभ्रमस्तिमितदीर्घपक्ष्मपरिवर्तनाविलासतरङ्गितभ्रूलताविडम्बितानङ्गशारङ्गविभ्रमविदग्धम् अवलोकयन् प्रत्यक्षीकृत एव। उद्वेल्लत् कम्पमानम्। विभ्रमं माहप्य भाल्लियां। माधवस्य पुण्डरीकलोचनत्वात्। बलामोट्या बलात्कारेण विस्तृताभ्यां विस्तारं गच्छद्भ्याम्। विजृम्भमाणः वर्द्धमानः। स्तिमितः स्निग्धः। दीर्घपक्ष्मम् अतिदीर्घम्। परिवर्त्तना पुनः पुनर्गमनं तत्र विलासः विशिष्टदृष्टिव्यापारः तेन तरङ्गितया चालितया भ्रूलतया विडम्बितः समीकृतः अनङ्गशारङ्गविभ्रमः कन्दर्पधनुर्विलासः ततः विदग्धम् इति क्रियाविशेषणम्।

(द) अहो प्रियसखि! किं तस्य तावन्महानुभावस्य स्वाभाविका एव मुहूर्त्तमभिघातिनो जनस्य विप्रलम्भहेतुका विलासाः, आहोस्वित् यथा प्रियसखी सम्भावयति?

• (ध) त्वमपि स्वभावेनैव तस्मिन्नवसरेऽसङ्कीर्णकं नर्त्तितासि।

माल। [सलज्जं]। हुं, तदो, तदो।

लव। तदो पडिबिम्बमत्तमाव-अत्ताअण-महुसेण पज्जलिदे तस्सिं जणे, मन्दारिआए घरं उपगदम्हि, ताए क्खु चित्तफलअं पभादे हत्थीकिदं आसि (न)।

माल। किंणिमित्तं?

लव। तं क्खु माहवाणुचरो, कलहंसओ णाम कामेदि, सा तस्स दंसइस्सदित्ति, तदो पिअणिवेदिआ मे मन्दारिआ सम्बुत्ता (प)।

माल। [स्वगतं]। णूणं तेणावि कलहंसएण तं पडिच्छन्दअं अत्तणो णाहस्स दंसिदं हुविस्सदि। [प्रकाशं]। सहि! किं दाणिं दे पिअं (फ)।

लव। एदं, क्खु, सन्दाविदस्स सन्दावआरिणो दुल्लह-मणो-रहाआस-दुस्सहाआस दड्ढ-चित्तस्स खणमत्त-णिव्वावणं पडिच्छन्दअं (ब)। [इति चित्रं दर्शयति]।

माल। [सस्पृहं सोत्कम्पं चित्रं निर्वर्ण्य]। अहो! [illegible]णं

(न) ततः प्रतिबिम्बमात्रास्वादनमहोत्सवेन प्रज्वलिते तस्मिन् जने, मन्दारिकाया गृहमुपगतास्मि, तस्याः खलु चित्रफलकं प्रभाते हस्तीकृतमासीत्। हस्तीकृतं आत्मीकृतमित्यर्थः।

(प) तां खलु माधवानुचरः कलहंसको नाम कामयते, सा तस्य दर्शयिष्यतीति, ततो मे प्रियनिवेदिका मन्दारिका संवृत्ता।

(फ) नूनं तेनापि कलहंसकेन तत्प्रतिच्छन्दकमात्मनो नाथस्य दर्शितं भविष्यति। सखि! किमिदानीं ते प्रियम्।

(ब) एतत्, खलु सन्तापितस्य सन्तापकारिणी दुर्लभमनोरथायासदुःसहायासदग्धमानचित्तस्य क्षणमात्रनिर्वापकं तव प्रतिच्छन्दकम्।

वि मे हिअअस्स अणासङ्गो, जेण एव्वं वि आसासणं विप्पल-म्भोत्ति संभावेमि । कहं अवरद्धम्हि ? (भ) ।

[इति बाष्पयति ।]

जगति जयिनस्ते ते भावा नवेन्दुकलादयः [इत्यादि पूर्वोक्तं पठित्वा सानन्दं]। महाभाअ ! सरिसी क्खु दे णिम्माणस्स विरमणामधुरदा, दंसणं उण तक्कालमणोहरं परिणामदीह-सन्दावदारुणम् । धण्णाओ क्खु ताओ कण्णआओ जाओ तुमं ण पेक्खन्ति, पेक्खिअ वा अत्तणो हिअअस्स पहवन्ति ।

[इति रोदिति ।] (म)

लव । सहि ! किं एव्वं पि दे णत्थि आसासो ? (य) ।

माल । सहि ! कधं ?

लव । अज्ज कारणादो, उक्कण्ठिअबन्धणं विअ, कण्ठे-लिपण्णं, किलम्मन्त-बोमालिआ-कुसुम-णिस्सहा परिकिल-म्मसि, सोवि आणाविदो भअवदा मम्महेण सन्दावस्स, दूस-हत्तणं त्ति (र) ।

(भ) अहो ! इदानीमपि मे हृदयस्य अनासङ्गो, येनैवमपि आश्वासनं विप्र-लम्भ इति सम्भावयामि । कथमपराद्धापि ? ।

(म) महाभाग ! सदृशी खलु ते निर्माणस्य विरमणामधुरता, दर्शनं पुनस्तत्कालमनोहरं परिणामदीर्घसन्तापदारुणम् । धन्याः खलु ताः कन्यका याभिस्त्वं न प्रेक्ष्यसे प्रेक्ष्य वा आत्मनो हृदयस्य प्रभवन्ति ।

(य) सखि ! किमेवमपि ते नास्ति आश्वासः ?

(र) अद्य कारणादुत्कण्ठितबन्धनमिव कण्ठेलिपन्नं क्लाम्यद्बकुलमालिका-कुसुमनिःसहा परिक्लिश्यसि, सोऽपि आवेदितो भगवता मन्मथेन सन्तापस्य दुःस-हत्वमिति । उत्कण्ठितम् खिन्नम् । कण्ठेलिः वल्लीकः । निःसहा अवशा ।

माल। कुसलं दाणिं तस्स महाणुभावस्स भोदु, मम उण दुल्लहो आआसो। [सास्रं]। विसेसदो अज्ज पिअसहि! (ग)।

[संस्कृतमाश्रित्य।]

(१) मनोरागस्तीव्रं विषमिव विसर्पत्यविरतम्,
प्रमाथी निर्धूमं ज्वलति विधुतः पावक इव।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो
न मां त्रातुं तातः प्रभवति, न चाम्बा, न भवती॥

लव। एवं ज्जेव्व, पच्चक्खमोक्खदाइणो परोक्ख-दुक्ख-दूसहाआस-आरिणो सज्जणसमागमा होन्ति। अवि अ, जस्स वादाअणन्तर-मुहुत्तमेत्त-दंसणेण, सविसेस-समिद्ध-कुद-वहाअन्त-पुण्णिमा-चन्दोदएण, णिक्करुण-काम-व्वावार-संसइद-जीविदा दे सरीरावत्था, तस्स ज्जेव्व संपत्तसविसेसदंसणा अज्ज समत्थेसि त्ति किं एत्थ भणिदव्वं। ता, पिअसहि! सलाह-

---

(ग) कुशलमिदानीं तस्य महानुभावस्य भवतु, मम पुनर्दुर्लभ आयासः। विशेषतोऽद्य प्रियसखि!।

---

(१) मन इति। प्रमाथी व्यथकः मनोरागः माधवं प्रत्यभिलाषः तीव्रम् उत्कटं विषमिव अविरतं निरन्तरं विसर्पति प्रसरति। तथा विधुतः सन्धुक्षितः पावकः वह्निरिव निर्धूमं धूमरहितं यथा तथा ज्वलति, गरीयान् दुश्चिकित्स्यो ज्वर इव प्रत्यङ्गं प्रत्यवयवं हिनस्ति। इतः कारणात् इतोऽद्य तातः अम्बा माता भवती च मां त्रातुं न प्रभवति न शक्नोति।

चिन्तं दुल्लह-मणोरहफलं जीअलोअस्स, गुरुआणुराअसरिसं महाणुभाव-वल्लह-समागमोत्ति, एत्तिअं आसीसो (च)।

माल। सहि! दइद-मालदी-जीविदे! साहसोवक्खा-विणि! अवेहि। [सास्रं]। अहवा, अहं जेव्व वारंवारं पलो-अअन्ती, दुक्खावत्थाविद-धीरत्तणा-वट्टम्भेण अत्तणो हिअएण, दूर विजिम्भमाण दुव्विणअ-वहुई, एत्थ अवरज्झामि, तधावि पिअसहि! (छ)।

[पुन: संस्कृतमाश्रित्य।]

ज्वलतु गगने रात्रौ रात्रावखण्डकला: शशी,
दहतु मदन:, किं वा मृत्यो: परेण विधास्यति।
मम तु दयित: श्लाघ्यस्तातो जनन्यमलान्वया,
कुलममलिनं नत्वेवायं जनो, न च जीवितम्॥ (२)

(च) एवमेव सम्यक्सौख्यदायिन: परीघदु:खदु:सहायामवारिण: सज्जन-समागमा भवन्ति। अपि च यस्य बालावस्थान्तरमुहूर्तमात्रदर्शनेन सविशेषसकलप्रकृत-वहायमानपूर्णिमाचन्द्रोदया निष्कलङ्कामस्यापारसञ्जातजीविता मे शरीरा-वस्था, तस्यैव सम्यगभिनिवेशदर्शना मम समाप्स्यतीति किमत्र भवितव्यम्। तत् प्रियसखि! श्लाघनीयं दुर्लभमनोरथफलं जीवलोकस्य, गुरुकानुरागसदृशं महानु-भाववल्लभसमागम इत्येतावन्मात्राशीर्वाद:। गुरुकानुरागे सखीदारा वल्लभसमागम: कारयितव्य: इतिभाव:।

(छ) सखि! दयितमालतीजीविते! साहसोपन्यासिनि! अपेहि। अथवा, अहमेव वारंवारं प्रलोकयन्ती, दु:खावस्थापितधीरत्वावष्टम्भेन आत्मनो हृदयेन दूरविजृम्भमाणदुर्विनयवधूर् अत्र अपराध्यामि तथापि प्रियसखि!।

---

(२) ज्वलत्विति। अखण्डकल: शशी पूर्णचन्द्र: रात्रौ रात्रौ प्रतिरात्रं वीप्सायां द्विरुक्ति:। गगने ज्वलतु, मदनो दहतु आतां तावत् तापदायी तत्र का मे क्षतिरस्ति इत्याशय मरणमेव शरणमिति द्रढयति किं वेति। मृत्यो: मरणात् परेण अधीरत्वम् किं विधास्यति? करिष्यति, न किञ्चिदित्यर्थ:।

लव । [स्वगतं ।] एत्थ दाणिं को उवाओ ?

[अथ नेपथ्यार्द्धप्रविष्टा प्रतीहारी ।]

एसा भअवदी कामन्दई ।

उभे । किं भअवदी ?

प्रती । अहिदारिअं दट्ठुकामा आअदा ।

उभे । तदो किं विलम्बीअदि ?

[प्रतीहारी निष्क्रान्ता ।]

[मालती चित्रफलकं आच्छादयति ।]

लव । [स्वगतं ।] सुसमीहिदं क्खु जादम् ।

[ततः प्रविशति, कामन्दकी अवलोकिता च ।]

काम । साधु सखे ! भूरिवसो ! साधु, प्रभवति निजस्य कन्यकाजनस्य महाराज इत्युभयलोकाविरुद्धं वचनमुपन्यस्तम् । अपि च । अद्य मन्मथोद्यानवृत्तान्तेन भगवतो विधेः अनुकूलतामवगच्छामि । बकुलावलीचित्रफलकव्यतिकरसंविधानकौतुकम् अद्भुतं प्रमोदमुन्नामयति । इतरेतरानुरागो हि दारकर्मणि पराध्यं मङ्गलं, गीतश्चायमर्थोऽङ्गिरसा, यस्यां वामनश्चक्षुषोरनुबन्धः तस्यामृद्धिरिति ।

लव । एसा मालदी ।

काम । [निर्वर्ण्य ।]

अत्र परेवैति किं बीबे इतीया । तु किन्तु मम तातः पिता इक्षितः प्रियः प्राणाः अनयाभवा जननी प्राणिनवं:, धर्मविनं निर्वल्स कुमक प्राप्यं न तु पर्व इविन: माधववी मनः नेव प्राणाः न च इट जीवितं जीवनं सकीनवं: न च प्राप्यं अजीवनपरिमोवाभिवापात् अप्राप्यत्वं अजीवनमेति भावः ।

निकामं क्षामाङ्गी सरसकदलीगर्भसुभगा,
कलाशेषा मूर्त्तिः शशिन इव नेत्रोत्सवकरी ।
अवस्थामापन्ना मदनदहनोद्दाहविधुरा-
मियं नः कल्याणी रमयति मनः कम्पयति च ॥ (३)

अपि च । परिपाण्डुपांसुलकपोलमाननम्
दधती, मनोहरतरत्वमागता ।
रमणीयजन्मनि जने परिभ्रमन्
ललितो विधिर्विजयते हि मान्मथः ॥ (४)

अथवा । नियतमनया सङ्कल्पनिर्मितः प्रियसमागमोऽनुभूयते । तथाहि अस्याः ।

नीवीबन्धोच्छ्वसनमधरस्पन्दनं, दोर्विषादः,
स्वेदच्छन्नं मसृणमधुराकेकरस्निग्धतारम् ।
गात्रस्तम्भः, स्तनमुकुलयोरुत्प्रबन्धः प्रकम्पो,
गण्डाभोगे पुलकपटलं, मूर्च्छना, चेतना च ॥ (५)

---

(३) निकाममिति । मदनदहनोद्दाहविधुरां विरहानलसन्तापखिन्नाम् अवस्थां आपन्ना प्राप्ता कल्याणी दयाभाजनं शशिनः चन्द्रस्य कलाशेषा कला षोडशभागः शेषो यस्याः सा एकात्मिका मूर्त्तिस्तनुरिव तथा नेत्रोत्सवकरी नयनानन्दजनिका सरसकदलीगर्भसुभगा मृदुलकदलीपत्रसारकोमला इयं क्षामाङ्गी मालती नः अस्माकं मनः निकाममतितरां रमयति मोदयति कम्पयति च ।

(४) परिपाण्ड्विति । परिपाण्डु पांसुलकपोलं धूमपाटलगण्डस्थलं आननं मुखं दधती बिभ्रती मनोहरतरत्वम् आगता प्राप्ता मालतीति शेषः । अस्या-श्चान्तरं कथयति । हि यतः मान्मथः मदनसम्बन्धी ललितः सुन्दरः विधिः रमणीयं मनोज्ञं जन्म यस्य तस्मिन् जने जनेऽस्मिन्नर्थे । आत्मीयकथनं परिभ्रमन् विचरन् विजयते । सौन्दर्यादीनाम् आत्मविजयसाधनत्वेन प्रसिद्धेरिति भावः ।

(५) नीवीति । नीवीबन्धोच्छ्वसनं वसनग्रन्थिशैथिल्यं अधरस्पन्दनं दोर्वि-

[उभे उपसर्पतः।]

लव। [मालतीं चालयित्वा।] मालदि! इदो।

[उभे उपसृत्य।]

माल। भअवदि! वन्दामि।

काम। महाभागे! अभिमतफलभाजनं भूयाः।

लव। इदं आसणं, एत्थ उवविसदु भअवदी।

[सर्वा उपविशन्ति।]

माल। कुसलं भअवदीए?

काम। [निःश्वस्य।] कुशलमिव।

लव। [स्वगतं।] पत्थावणा क्खु एसा कवडणाडअस्स। [प्रकाशम्] गुरुअ-वाह-त्थम्भ-मन्थरिद-कण्ठ-पडिलग्ग-वीसामं, अणारिसं जेव्व भअवदीए वअणं, ता किं दाणिं उव्वेअकारणं हुविस्सदि (ख)

काम। ननु अयमेव चीरचीवरविरुद्धः परिचयः।

लव। कधं विअ?

(ख) प्रस्तावना खलु एषा कपटनाटकस्य। गुरुवाष्पस्तम्भमन्थरितकण्ठप्रतिलग्नविश्राममन्यादृशमिव भगवत्या वचनम्। तत् किमिदानीमुद्वेगकारणं भविष्यति। मन्थरितः मन्दीकृतः।

बाष्पः अश्रूणि: स्वेदः, नयने विकचे मधुरे सुन्दरे चाकेकरे आकुञ्चिते किञ्चे सरले तारे [illegible], मालत्याः हेलाधवलं, तत्सुकुमारयोः सुकुमाराकारयोः कान्तयोः उन्नतयोः विच्छेदशून्यः निरन्तरमित्यर्थः प्रबन्धः, लज्जाभीते कपोलस्थली पुलकपटलं पुलकिततनु, मूर्च्छा, मोहः, चेतना च। यथाः मालत्या माधवविरहे एते अरुणतया पारमिथेषा जायन्ते। विरहविधुरा इत्यभिप्रायः॥

काम। अयि! त्वमपि न वेत्सि ?

इदमिह मदनस्य जैत्रमस्त्रं सहजविलासनिबन्धनं शरीरम्।
अनुचितवरसंप्रयोगशोच्यं, विफलगुणातिशयं भविष्यतीति ॥(६)

[मालती वैषम्यं नाटयति ।]

लव। अज्जि एदं, णरेन्दवअणाणुरोधिणा अमच्चेण णन्दणस्स पडिवण्णा मालदीत्ति सअलो जणो अमच्चं जुगुच्छेदि (ख)।

माल। [स्वगतं।] कधं उवहारीकिदह्मि तादेण राइणो ? (ग)।

काम। आश्चर्यं।

गुणापेक्षाशून्यं कथमिदमुपक्रान्तमथवा,
कुतोऽपत्यस्नेहः कुटिलनयनिष्णातमनसाम् ?।
इदं त्वैदंपर्यं यदुत नृपतेर्नर्मसचिवः,
सुतादानान्मित्रं भवतु, स हि मे नन्दन इति ॥ (७)

(ख) अज्ञि नरेन्द्रवचनानुरोधिना अमात्येन नन्दनस्य प्रतिपन्ना मालतीति, सकलो जनोऽमात्यं जुगुप्सते।

(ग) कथमुपहारीकृतास्मि तातेन राज्ञः ?

---

(६) इदमिति। इह अत्र इदं मदनस्य जैत्रमस्त्रं जयशीलमायुधरूपं सहजविलासनिबन्धनं नैसर्गिकभावमूलकं शरीरं अनुचितवरस्य संप्रयोगेण शोच्यं शोचनीयं सत् विफलगुणातिशयं विफलं गुणातिशय्यं यस्य तत् भावप्रधाननिर्देशः भविष्यति ॥

(७) गुणेति। गुणापेक्षाशून्यं यथायथा गुणमनपेक्ष्य वैवाहः। कथमिदमुपक्रान्तं आरब्धं एतदनुचितमित्यर्थः। अथवा कुटिलनयनिष्णातमनसां

माल । [स्वगतं ।] राआराहणं क्खु तादस्स गुरुअं, ण उण मालदी (क)

लव । एव्वं जधा भअवदीए आणत्तं, अण्णधा तस्सिं वरे दुद्दंसणे अदिक्कन्त-जोव्वणे किं ण विआरिअं अमच्चेण ? (ख) ।

माल । [स्वगतं ।] हा ददत्ति ! समुवत्थिदाणत्थ-वज्ज-पदणा मन्द-भाइणी (ग) ।

लव । ता पसीदद् भअवदी, परित्ताहि इमादो जीविद-मरणादो पिअसहीं. तहावि एसा दुक्खिदा ज्जेव (घ) ।

काम । अयि, वत्से ! किमत्रभवत्या मया शक्यं कर्त्तुम् ? प्रभवति प्रायः कुमारीणां जनयिता दैवञ्च । अपि किल कौशिकी शकुन्तला दुष्यन्त, अप्सराः पुरूरवसमचकमे, इत्याख्यानविद आचक्षते, वासवदत्ता च राज्ञे सञ्जयाय पित्रा दत्त-

(क) राजाराधनं खलु तातस्य गुरुकं न पुनर्मालती ।

(ख) एवं यथा भगवत्या आज्ञप्तं, अन्यथा तस्मिन् वरे दुर्दर्शने अतिक्रान्त[illegible], किं न विचारितममात्येन ?

(ग) हा तातेति समुपस्थितानर्थवज्रपतना मन्दभागिनी ।

(घ) तत्प्रसीदतु भगवती, परित्रायस्व अस्माज्जीवितमरणात् प्रियसखीं, तथाप्येषा दुःखितैव ।

कठिनचित्ततमानां कुमारिकाणामित्यर्थः । अभिनवा कुतोऽप्यवहितः ? मालतीत्यर्थः । जीवितमरणञ्च अनुष्ठानीयमावितिति भावः । इदन्तु परमार्थरूपत्वात्म् ऐदम्पर्यम् इदं परमेतदभिप्रायकहृदयं भवतीत्यर्थः यद् यत यत निपत्ते नृपतेः मनंसृतिवः सुतादानात् तनयादानात् चव तम्बन्धविनयया यही । मित्रं सुहृद् भवतु किं अतः स मे नाम नन्दन आनन्दजनक इति यद् विभाविम यदेतत् वचनम् ऐदम्पर्यमेव ।

मामात्मसुदयनाय प्रायच्छत् इत्यादि, तदपि साहसिकत्वमित्य-
नुपदेष्टव्यकल्पं, सर्वथा,

राज्ञः प्रियाय सुहृदे सचिवाय कार्यात्
दत्त्वात्मजां भवतु निर्वृतिमान् अमात्यः।
दुर्दर्शनेन घटतामियमप्यनेन,
धूमग्रहेण शशिनो विमला कलेव ॥ (८)

माल। [सास्रं स्वगतं।] हा ताद! तुमम्पि मम णाम एव्वं त्ति सव्वधा जिदं भोअतिह्णाए (ङ)।

अव। चिराइदं भअवदीए, णं भणामि, अणुत्थसरीरो महाभाओ माहवोत्ति (च)।

काम। गम्यते, वत्से! अनुजानीहि माम्।

लव। [जनान्तिकं।] सहि! मालदि! सम्पदं भअवदीए सआसादो, तस्स महाणुभावस्स उग्गमं जाणीमो (छ)।

(ङ) हा तात! त्वमपि मम नाम एवमिति सर्वथा जितं भोगतृष्णया।

(च) चिरायितं भगवत्या, ननु भणामि अस्वस्थशरीरः खलु महाभागो माधव इति।

(छ) सखि! मालति! साम्प्रतं भगवत्याः सकाशात्, तस्य महानुभावस्य उद्गमं जानीमः। उद्गमम् उत्पत्तिम्।

---

(८) राज्ञ इति। अमात्यः सचिवः कार्यात् कार्यवशात् राज्ञो नृपस्य प्रियाय सुहृदे सचिवाय अमात्याय आत्मजां मालतीं दत्त्वा निर्वृतिमान् सुखी भवतु। धूमग्रहेण धूमाकारराहुग्रहेण दर्शनमयुक्तेनेत्यर्थः। शशिनः चन्द्रस्य विमला मनोहरा कलेवेति निदर्शना। वार्धक्यात् कौरूप्याच्च दुर्दर्शनेन अनेनापि इयं मालती घटतां वर्त्तताम् इयमस्य सहचारिणी भवतु इत्यर्थः। अत्र असम्भाव्यार्थत्वात् सम्भावनायोगोऽपि प्रतीयते।

माल। [अपवार्य्य] सहि! अत्थि मे कोदूहलं।

लव। [प्रकाशं।] भअवदि! को एसो माहवो णाम, जस्स भअवदी णिव्विसेसगुरुवक्खवादं धारेदि? (ज)।

काम। अप्रस्ताविकी महती एषा कथा।

लव। तधावि आचक्खदु, मे भअवदी। पसादं करेदु (झ)

काम। श्रूयतां, अस्ति विदर्भाधिपतेरमात्यः, समग्रधुर्य्यपुङ्गवप्रकाण्डकाण्डचूडामणिर्देवरातो नाम, यस्य अशेषभुवनमण्डनीयपुण्यमहिमानम् आत्मनः सतीर्थ्यं पितैव ते जानाति योऽसौ यादृशश्चेति। अपि च।

> व्यतिकरितदिगन्ताः श्वेतमानैर्यशोभिः,
> सुकृतविलसितानां स्थानमूर्ज्जस्वलानाम्।
> अकलितमहिमानः केतनं मङ्गलानाम्,
> कथमपि भुवनेऽस्मिन् तादृशाः सम्भवन्ति॥ (८)

माल। सहि! तं क्खु भअवदीगहिदणामधेअं सव्वदा तादो सुमरेदि (ञ)।

(ज) भगवति! क एष माधवो नाम, यस्य भगवती स्वं गुरुकमात्मानं धारयति? अस्य कर्म इत्यर्थः।

(झ) तथाप्याचष्टां मे भगवती प्रसादं करोतु।

(ञ) सखि! तं खलु भगवतीगृहीतनामधेयं सर्व्वदा तातः स्मरति।

---

(८) व्यतिकरितेति। श्वेतमानैः शुभ्रैर्यशोभिर्व्यतिकरितदिगन्ता व्याप्तदिग्विभागाः ऊर्जस्वलानां बलवतां सुकृतविलसितानां पुण्यपरिणामानां स्थानम् अकलितमहिमानः अपरिच्छिन्नमाहात्म्या मङ्गलानां केतनं निवासः उभयत्र विधेयप्राधान्यात् नपुंसकत्वम्। तादृशा महान्त इत्यर्थः। अस्मिन् भुवने कथमपि केनचित् भाग्यवशेनैव सम्भवन्ति। भाग्यादि विना एतादृशमहतां कुतः प्रादुर्भाव इति भावः॥

लव। सखि! मम खलु विद्याहिगमो किदो त्ति, तक्कालसंवेदिणो मन्तन्ति (९)।

काम। तत उदयगिरेरिवैक एव
स्फुरितगुणद्युतिसुन्दरः कलावान्।
इह जगति महोत्सवस्य हेतु-
र्नयनवतामुदियाय बालचन्द्रः॥ (१०)

लव। [जनान्तिकं।] सखि! अवि णाम माहवो भवे?

काम। अमौ विद्याधारः शिशुरपि विनिर्गत्य भवनात्
इहायातः सम्प्रत्यविकलशरच्चन्द्रमधुरः।
यदालोकस्थाने भवति पुरमुन्मादतरलैः,
कटाक्षैर्नारीणां कुवलयितवातायनमिव॥ (११)

---

(९) सखि! मम खलु विद्याधिगमः कृत इति तत्कालसंवेदिनो मन्त्रयन्ते।

---

(१०) तत इति। स्फुरितगुणद्युतिः प्रकाशमानगुणोत्कर्षश्चासौ सुन्दरश्च कलावान् चतुःषष्टिकलाकुशलः नयनवतां दृष्टिमतां महोत्सवस्य हेतुः इह जगति ततो देवरातात् उदयगिरेः उदयाचलाद् बालचन्द्र इव उदियाय उत्पन्न इत्युपमा। चन्द्रेऽपि पूर्वोक्तानि विशेषणानि योज्यानि।

(११) अमाविति। विद्याधारः विद्यानिधिः शिशुरपि बालोऽसौ माधवः भवनात् गृहात् विनिर्गत्य गृहादिकं त्यक्त्वा विदेशं गतेत्यर्थः। सम्प्रति प्रत्यक्षालोकेऽविकलशरच्चन्द्रमधुरः सकलशारदशशधरसुन्दर इत्यर्थः। इह अत्र देशे आयातः आगतः। यस्य आलोकस्थाने दर्शनस्थानमार्गे उन्मादतरलैः मत्ततया चपलैः। माधवदर्शनजन्यमदनपीड़या उन्मादः। नारीणां कटाक्षैः अपाङ्गभागैः कुवलयितानि सञ्जातकुवलयानि तारकादिश्यामादिति भावः।

यत्र बालसुहृदा मकरन्देन सह, विद्यामान्वीक्षिकीम-भिगच्छति, स एव माधवो नाम इति।

माल। [सानन्दं जनान्तिकं।] सहि ! सुदं तुए ?

लव। सहि ! कुदो वा मअरन्दहिं वज्जिअ पारिजादस्स उग्गमोत्ति (ठ)।

[नेपथ्ये शङ्खध्वनिः।]

काम। अहो ! कालातिपातः सम्प्रति हि।

क्षिपन्निद्रामुद्रां मदनकलहच्छेदसुलभाम्
अपामीलत्कण्ठानां विहगमिथुनानां प्रथमतः।
दधानः सौधानामलघुषु निकुञ्जेषु घनताम्
असौ सन्ध्याशङ्खध्वनिरभिसृतः खे विचरति ॥ (१२)

(ठ) सखि ! कुतो वा मकरन्दं वर्जयित्वा पारिजातस्य उद्गम इति।

नालावलानि सदाचारित्र यत्र तदिव पुरं भवति। अत्र माधवदर्शनोत्सुक्यरूपमनसिजेन मालत्या सदाचरदेशे समागमात् सौधांपाङ्गविक्षेपणाय कुवलयकुसुमस्तुतिरुक्ता।

(१२) क्षिपन्निति। अपामीलत्कण्ठानामिति क्वचित्पाठः। सौधानां प्रासादानां अलघुषु घनेषु निकुञ्जेषु घनतां निबिडतां दधानः सन्ध्याशङ्खध्वनिः सायं शङ्खनिनादः प्रथमतः आदौ अपामीलत्कण्ठानां रात्रौ विरहात् प्राप्तविरहखेदानां विहगमिथुनानां चक्रवाकद्वन्द्वानां मदनकलहच्छेदसुलभां सुरतावसानसुलभां सुरतश्रमजनितालस्यां निद्रासङ्कोचं क्षिपन् प्रबोधयन्निव। अभिसृतः सर्वतः व्याप्तः सन् खे आकाशे विचरति प्रसरति विस्तीर्णो भवति। शिखरिणी वृत्तमिति तार्किकाः।

तदुत्तिष्ठामः। [इत्युत्तिष्ठति।]

माल। [अपवार्य्य।] कधं उवहारीकिदम्हि राएणो तादेण, राआराहणं क्खु तादस्स गुरुअं ण उण मालदी। [सास्रं।] हा ताद! तुमम्पि णाम मम एव्वं त्ति सव्वधा जिदं भोअतिह्णाए। [सानन्दं।] कधं महाकुलप्पभवो वि सो महाणुभावो सुभणिदं पिअसहीए कुदो वा महोदहिं वज्जिअ पारिजादस्स उग्गमोत्ति। अवि णाम तं पुणोवि पेक्खिस्सं (ड)।

लव। अवलोइदे! इदो एहि, एदिणा सोवाणेण ओदरम्ह। (ढ)

काम। [अपवार्य्य।] साधु, सम्प्रति मया नटस्येव, मालतीं प्रति निसृष्टार्थदूतीकृत्यस्य, लघूकृतो भारः। तथाहि।

वरेऽन्यस्मिन् द्वेषः, पितरि विचिकित्सा च जनिता,
पुरावृत्तोद्गारैरपि च कथिता कार्य्यपदवी।
स्तुतं तन्माहात्म्यं, यदभिजनतो यच्च गुणतः
प्रसङ्गात् वत्सस्येत्यथ विधिविधेयः परिचयः॥ (१२)

[इति निष्क्रान्ता सर्वे।]

इति मालतीमाधवे धवलगृहो नाम द्वितीयोऽङ्कः।

(ड) कथमुपहारीकृतास्मि राज्ञा तातेन, राजाराधनं खलु तातस्य गुरुकं, न पुनर्मालती। हा तात! त्वमपि नाम ममैवमिति, सर्वथा जितं भोगतृष्णया। कथं महाकुलप्रभवोऽपि स महानुभावः सुश्रुतं प्रियसख्या, कुतो वा महोदधीत्यादि। अपि नाम पुनरपि तं प्रेक्षिष्ये।

(ढ) अवलोकिते! इत इत एतेन सोपानेनावतराव:।

---

(१२) वर इति। अन्यस्मिन् वरे पत्यौ नन्दने द्वेषः, पितरि विचिकित्सा निन्दा च जनिता पुरावृत्तोद्गारैः इतिहासकथनैः, शकुन्तलादीनां पितृनिरपेक्षात्मदानकथनैः कार्य्यपदवी कर्त्तव्यः कथिता च वत्सस्य प्रसङ्गात् अभिजनतः

तृतीयोऽङ्कः ।

ततः प्रविशति बुद्धरक्षिता ।

बुद्ध । [परिक्रम्याकाशे ।] अवलोइदे ! अवि जाणासि कहिं भअवदीत्ति ? (क)

[प्रविश्य अवलोकिता ।] बुद्धरक्खिदे ! किं पुच्छसि ? कोवि अआलो भअवदीए पिण्डवादवेलं वज्जिअ मालदीं अणुवत्तमाणाए (ख) ।

बुद्ध । हुं, तुमं उण कहिं पत्थिदासि ? (ग)

अव । अहं क्खु भअवदीए माहवसआसं अणुप्पेसिदा, सन्दिट्ठं अ तस्स, जधा मअरन्दसहाअं कुसुमाअरं णाम उज्जाणं गदुअ कुरवअणिउञ्ज-पेरन्त-रत्तासोअ-गहणे चिट्ठत्ति, गदो अ तत्थ माहवो (घ) ।

(क) अवलोकिते ! अपिनाम जानासि कुत्र भगवतीति ?

(ख) बुद्धरक्षिते ! किं पृच्छसि ? कोऽपि अकालो भगवत्याः पिण्डपातवेलां वर्जयित्वा मालतीमनुवर्त्तमानायाः । पिण्डपातः सौगतान्नम् । कोऽपि अकालः निषिद्धकालः । भगवती सदैव मालतीसमीपे वर्त्तते इति भावः ।

(ग) हुं त्वं पुनः कुत्र प्रस्थितासि ?

(घ) अहं खलु भगवत्या माधवसकाशमनुप्रेषिता, सन्दिष्टश्च तस्य, यथा, मकरन्दसहायं कुसुमाकरं नामोद्यानं गत्वा, कुरवकनिकुञ्जपर्य्यन्तरक्ताशोकगहने तिष्ठ इति, गतश्च तत्र माधवः । कुरवकम् झूपा इति ख्यातः तरुः ।

यद् वृत्तान्त यत् माधवस्य सत् श्रुतमित्यर्थः । इति मया ज्ञातमिति भावः । अथ अनन्तरं परिचयः समागमः विधिविहितः दैवसम्पादनीयः । दैवं विना अस्य-कार्य्यस्य घटनानुपपत्तेरिति भावः ।

बुद्ध। किंत्ति तहिं माहवो अणुप्पेसिदो ? (क)

अव। अज्ज कसणचउद्दसीत्ति, तत्थ भअवदीए सअं मालदी सङ्करघरं गमिस्सदि, तदो सिव एव्वं सोहग्गं वड्ढदित्ति देवदाराहणणिमित्तं सहत्थकुसुमावचअं उद्दिसिअ, अवञ्जिआदुदीआं मालदीं, भअवदीज्जेव कुसुमाअरुज्जाणं आणइस्सदि, तदो अण्णोण्णदंसणं भोदुत्ति। तुमं उण कहिं पत्थिदा ? (ख)।

बुद्ध। अहं क्खु सङ्करघरं जेव्व पत्थिदाए पिअसहीए मदअन्तिआए आमन्तिदा, तदो भअवदीए पादवन्दणं कदुअ, तहिं जेव्व गच्छामि (ग)।

अव। तुमं क्खु भअवदीए कस्सिं पओअणे णिउत्ता, तत्त को वुत्तन्तो ? (घ)।

बुद्ध। मए क्खु भअवदीए समादेसेण, तासु तासु विस्सम्भकहासु, ईरिसो तारिसोत्ति मअरन्दस्स उवरि पिअसहीए मदअन्तिआए दूरं आरोविदो परोक्खाणुराओ एसो अ से मणोरहो, अवि णाम तं पेक्खामित्ति (ङ)।

(क) किमिति तत्र माधवोऽनुप्रेषितः ?।

(ख) अद्य कृष्णचतुर्दशीति, तत्र भगवत्या स्वयं मालती शङ्करगृहं गमिष्यति, ततः शिव एवं सौभाग्यं वर्द्धत इति, दैवताराधननिमित्तं स्वहस्तकुसुमावचयम् उद्दिश्य, अवञ्जिकाद्वितीयां मालतीं भगवत्येव कुसुमाकरोद्यानमानेष्यतीति, ततोऽन्योन्यदर्शनं भवतु इति। त्वं पुनः क्व प्रस्थिता ?

(ग) अहं खलु शङ्करगृहमेव प्रस्थितया प्रियसख्या मदयन्तिकया आमन्त्रिता, ततो भगवत्याः पादवन्दनं कृत्वा तत्रैव गच्छामि।

(घ) त्वं खलु भगवत्या कस्मिन् प्रयोजने नियुक्ता, तत्र को वृत्तान्तः ? मकरन्दस्य मदयन्तिकापरिचयोऽपि किं कृतम् इत्यर्थः।

(ङ) मया खलु भगवत्याः समादेशेन तासु तासु विश्वासकथासु, ईदृश-

अव। साहु बुद्धरक्खिदे ! साहु। (अ)

बुद्ध। एहि गच्छम्ह। (ट)

[इति परिक्रम्य निष्क्रान्तौ प्रवेशकः।]

[ततः प्रविशति कामन्दकी।]

तथा विनयनम्रापि मया मालत्युपायतः।
नीता कतिपयाहोभिः सखीविस्रम्भसेव्यताम्॥ (१)

सम्प्रति। व्रजति विरहे वैचित्त्यं, नः प्रसीदति सन्निधौ,
रहसि रमते, प्रीत्या दायं ददात्यनुवर्त्तते।
गमनसमये कण्ठे लग्ना, निरुध्य निरुध्य माम्,
सपदि शपथैः प्रत्याहर्त्तुं प्रणम्य च याचते॥ (२)

इदञ्च साधीयस्तत्र सम्प्रत्याप्तानिबन्धनम्।

काहम इति मकरन्दस्योपरि निवसन्त्या मदयन्तिकाया दूरमारोपितः परोक्षानुराग एव चास्या मनोरथः, अपि नाम तं पश्येयं इति ? अस्याः मदयन्तिकायाः। तम् मकरन्दम्।

(अ) साधु बुद्धरक्षिते ! साधु।

(ट) एहि गच्छावः।

---

(१) तथेति। यथा तथा उपायतः साहाय्योपायं विधाय ल्यब्लोपे पञ्चमी। विनयनम्रापि विनीतापि मालती कतिपयाहोभिः कियद्दिवसैः सखीविस्रम्भसेव्यतां सखीभिर्लवङ्गिकादिभिरिव विश्वस्तं यथा तथा सेव्यतां उपचारार्हतां नीता प्रापिता कतिचिद्दिनैरेव सा मालती सखीवत् विश्वासस्थानत्वं प्रापिता इत्यर्थः॥

(२) व्रजतीति। नः अस्माकं विरहे वैचित्त्यं शून्यमनस्त्वं व्रजति गच्छति अस्माकं सन्निधौ प्रसीदति प्रसन्ना भवति। रहसि विजने रमते उत्कण्ठासहितं माधवकथा-सुहिता सखीभिः सहेत्यर्थः। प्रीत्या हर्षेण दायमुपहारं ददाति अनुवर्त्तते अस्माकं मतं न लङ्घति। तथा गमनसमये कण्ठे लग्ना बाहुभ्यां कण्ठं धृत्वेत्यर्थः। मां निरुध्य निरुध्य आभीक्ष्ण्ये द्विरुक्तिः। सपदि तत्क्षणात् शपथैर्दिव्यैः प्रणम्य नमस्कृत्य च प्रत्याहर्त्तुं पुनरागमनं याचते इत्येतत् सर्वं चेष्टितं प्रमाणं इतिभावः।

आकुन्तलादीनितिहासवादान् प्रस्ताविताम्न्यपरैर्वचोभिः ।
श्रुत्वा मदुत्सङ्गनिवेशिताङ्गी चिराय, चिन्तास्तिमितास्मि इति ॥
(१)

तदद्य माधवमनसमुत्तरमुपक्रमिष्ये ।

[नेपथ्याभिमुखम् ।] वत्से ! इत इतः ।

[ततः प्रविशति मालती लवङ्गिका च ।]

माल । [स्वगतम् ।] कधं उवहारीकिदह्मि । [इत्यादि पूर्वोक्तं पठति ।]

लव । सहि ! एसो क्खु महुर-महु-रसोग्गार-मञ्जरी-कवलण-केलि-कल--कोइल--उल--कोलाहलाकुलिद--सहआर-सिहरुड्डीण-चडुल चञ्चरीअणिअर-व्वदिकरद्दलिद-दल-करालम्ब-पाडिवास-मणोहरो, मराल-मंसल-जहण-परिणाहुव्वह-णमन्थरोरुभर विसंठुल-क्खलिद-चलण--संचार-मसिण-गमणोव-णीद-सेअसीअर-सुहाबिंदुवमन्त-मुह--मुह--चन्दणाअमाण-सी-अलप्फरसो, तुमं परिस्सअदि कुसुमाअरुज्जाणमारुदो, ता पविसह्म (ठ) [इति परिक्रम्य प्रविशतः ।]

(ठ) सखि ! एष खलु मधुरमधुरसोद्गारमञ्जरीकवलनकेलिकलकोकिल-कुलकोलाहलाकुलितसहकारशिखरोड्डीन-चटुलचञ्चरीकनिकरव्यतिकरोद्दलितदल-करालचम्पकाधिवासमनोहरो, मरालमांसलजघनपरिणाहोद्वहनमन्थरोरुभर-विसंष्ठुलस्खलितचरणसञ्चारमसृणगमनोपनीतस्वेदशीकरसुधाबिन्दुवमन्मुखमुख-चन्द्रचन्दनायमानशीतलस्पर्शः त्वां परिष्वजति कुसुमाकरोद्यानमारुतः तत् प्रविशावः । अत्रैव खलु कुसुमाकरोद्यानमारुतस्त्वां परिष्वजतीति सम्बन्धः ।

---

(१) अन्यपरैः वचोभिः प्रस्ताविताम् कथाप्रसङ्गेन समापिताम् आकुन्तला-दीन् इतिहासप्रबन्धान् श्रुत्वा मदङ्गनिवेशितशरीरा सती चिरकालं यावत् चिन्ता-स्तम्भितास्मीव ।

[ततः प्रविशति माधवः ।]

माध। सहर्षम्। हन्त! उपागता भगवती। इयं हि
मम ।

आविर्भवन्ती प्रथमं प्रियायाः सोच्छ्वासमन्तःकरणं करोति ।
सन्तापदग्धस्य शिखण्डियूनो वृष्टेः पुरस्तादचिरप्रभेव ॥ (४)

[दृष्ट्वा ।] अये ! लवङ्गिकाद्वितीया मालत्यपि ।

आश्चर्यमुत्पलदृशो वदनामलेन्दु-
सान्निध्यतो मम मुहुर्जडिमानमेत्य ।
जात्येन चन्द्रमणिनेव महीधरस्य
सन्धार्यते द्रवमयो मनसो विकारः ॥ (५)

कीदृशः । मधुरमधुरेणास्वादनीया मञ्जर्याः कवलने भक्षणे केलिः क्रीडा तया कलकलव्याजभाजं यत् कोकिलकूजं तस्य कोलाहलेनाकुलितात् मधुकारनिकरात् चूतनिकरादुड्डीनवटुनी भ्रमन्ती यः चञ्चरीकानिकरः भ्रमरसमूहः तस्य ध्वनिकरैव सम्पर्केण उद्दालितदलस्य विकसितपुटस्य अतएव करालस्य दन्तुरस्य चम्पकस्य अधिवासेन गन्धेन मनोहरः । एतेन कैलासीयत्वं दर्शितं । मधुकारमञ्जरीणां कोकिलाकुलत्वं भ्रमरस्य तत्पाने हेतुः । मरालो हंसो हंसी वा मांसलजघनपरिवाहोपचयेन मन्थरगमना यामूरु । तदीयामिति भावः । तयोः अरैव गौरवेण विसंष्ठुलं विषमं यथा तथा स्खलितस्य चरणस्य सुधारेव मधुरं मन्दं मन्मनं निर्वापनीतेन अंशुमालिनैव सुधाबिन्दु सदृशं मुग्धमुखचन्द्रं । चर्वाणय । चन्द्रमायमानः शीतलत्वयोरयं यस्य सः । अनेन माध्यं प्रेक्षणमपि ध्वनितम् ।

---

(४) आविरिति । सन्तापदग्धस्य निदाघतप्तस्य शिखण्डियूनः तरुणमयूरस्य वृष्टेः पुरस्तात् पूर्वं आविर्भवन्ती प्रकाशमाना अचिरप्रभा विद्युत् इव सन्तापदग्धस्य कामानलतप्तस्य मम प्रियायाः मालत्याः पुरस्तात् प्रथमं आविर्भवन्ती इयं भगवती कामन्दकी मम अन्तःकरणं चित्तं सोच्छ्वासं सविकाशं करोति ।

(५) आश्चर्यमिति । उत्पलदृशः पद्माक्ष्याः वदनमेवामलेन्दुर्निर्मलचन्द्रः तस्य सान्निध्यतः सामीप्यतः मम मुहुरधिकतरां जडिमानं जाड्यं जात्येनाकृत्रिमेण

सम्प्रति रमणीयतरा मालती—

ज्वलयति मनोभवाग्निं, मदयति हृदयं, कृतार्थयति चक्षुः ।
परिमर्दितचम्पकावलिविलासलुलितालसैरङ्गैः ॥ (६)

माल । सहि ! इमस्सिं कुजअणिउञ्जे कुसुमाइं अवचि-
णुम्ह (ड) ।

माध ।

प्रथमप्रियावचनसंभ्रमस्फुरत्पुलकेन सम्प्रति मया विलक्ष्यते ।
घनराजिनूतनपयःसमुच्चयसवहकुड्मलकदम्बडम्बरः ॥ (७)

लव । सहि ! एव्वं करेम्ह । (ढ) [पुष्पावचयं नाटयतः ।]

माध । अपरिमेयाश्चर्य्यमाचार्य्यकं भगवत्याः ।

माल । सहि ! इदोवि अअस्सिं अवचिणुम्ह । (ण)

(ड) सखि ! एतस्मिन् कुब्जकनिकुञ्जे कुसुमानि अवचिनुवः ।

(ढ) सखि ! एवं कुर्वः ।

(ण) इतोऽप्यस्मिन् अवचिनुवः ।

एतत् प्राप्य आर्द्रेण जडभावापन्नेन चन्द्रमणिना चन्द्रकान्तमणिना महीधरस्य पर्व्वतस्य इव मनसोविकारः अधैर्य्यरूपः द्रवमयः सम्भाव्यते निषीदते [illegible] इतिशेषः । चन्द्रोदये पाषाणद्रव इव मालत्युदये मम चित्तविकारो द्रवमयो भवति । अत्र मनसः द्रवत्वासम्भवेऽपि तत्सम्बन्धरूपसम्बन्धातिशयोक्तिः सा चौत्प्रेक्षया संसृज्यत इत्युभयोरेकवचन सङ्करः ।

(६) ज्वलयतीति । परिमर्द्दितानां निपीडितानां चम्पकावलीनां विलास इव लुलितालसानि अतिसुन्दराणि मन्दानि अङ्गानि तैर्मनोभवाग्निं कामानलं ज्वलयति प्रदीपयति हृदयं मदयति मत्तं करोति चक्षुः कृतार्थयति सफलयति एतद्दर्शनेन व्याकुलताव्याकुलतामीति भावः ।

(७) प्रथमेति । सम्प्रति अधुना कलभादी प्रियाया वदनवचनं तत्र संभ्रमः विभ्रमः प्रियायाः मुखेन विस्तारी [illegible] इत्यर्थः । तेन [illegible] उदकद्रोणा-
वेन मया घनराजिर्जलधरावली तस्याः नूतनपयः तत्सम्पर्कादुद्गमत्वाचं तेन तत्

काम। [मालतीं परिष्वज्य।] अयि! विरम, निःसहासि जाता। तथाहि।

स्खलयति वचनं ते, संश्रयत्यङ्गमङ्गम्
जनयति मुखचन्द्रोद्भासिनः स्वेदविन्दून्।
मुकुलयति च नेत्रे सर्वथा सुभ्रु! खेद-
स्त्वयि विलसति तुल्यं वल्लभालोकनेन॥ (८)

[मालती लज्जते।]

लव। सोत्कम्पं भगवतीए आअत्तम्। (त)

माध। हृदयङ्गमः परिहासः।

काम। तदास्यतां, किञ्चिदाख्येयमाख्यातुकामास्मि।

[सर्वा उपविशन्ति।]

काम। [मालत्याश्चिबुकमुन्नमय्य।] शृणु विचित्रमिदं, सुभगे!।

माल। अवहिदह्मि। (थ)

काम। अस्ति तावदेकदा प्रसङ्गतः कथित एव मया माधवाभिधानः कुमारो यस्त्वामिव मामकीनस्य मनसो द्वितीयं निबन्धनम्।

लव। सुमरामो। (द)

(त) सोत्कम्पं भगवत्याश्रयम्।

(थ) अवहितास्मि। (द) स्मरामः।

कमुकयं सम्यक् भीषणं चैव इति यावत्। तेन चयं यहाः कुसुमा लुकुमा यस्य स कदम्बः नीपकुसुमं तस्य कम्परः सम्पुटः विकचमुठी चतुष्किवटी।

(८) स्खलयतीति। हे सुभ्रु! उत्फुल्लमुखि! मालति! खेदः क्लेशः ते तव वचनं स्खलयति वाक्यस्खलनं करोति अङ्गमङ्गं प्रत्यवयवं संश्रयति अवलम्बते मुख-चन्द्रं उद्भासयतीति ताम् खेदविन्दून् घर्मजलकणान् जनयति नेत्रे च मुकुल-

काम। स खलु मन्मथोद्यानयात्रादिवसात्प्रभृति दुर्मनायमानः, परवानिव शरीरोपतापेन।

यदिन्दावानन्दं, प्रणयिनि जने वा, न भजते,
व्यनक्त्यन्तस्तापं तदयमतिधीरोऽपि विषमम्।
प्रियङ्गुश्यामाङ्गप्रकृतिरपि, चापाण्डुमधुरम्
वपुः क्षामं क्षामं वहति, रमणीयश्च भवति ॥ (९)

लव। एव्वम्पि तस्सिं अवसरे भअवदीं तुवरावन्तीए, अवलोइदाए उदीरिदं आसि, जधा अस्सत्थसरीरो माहवोत्ति (ध)।

काम। यावदशृणवं, मालत्येवास्य मन्मथोन्मादहेतुरिति, ममापि स एव निश्चयः।

अनुभवं वदनेन्दुरुपागमन्नियतमेव यदस्य महात्मनः।
क्षुभितमुत्कलिकातरलं मनः पय इव स्तिमितस्य महोदधेः ॥१०॥

(ध) एवमपि तस्मिन्नवसरे भगवतीं त्वरयन्त्या अवलोकितयोदीरितमासीत्, यथा अस्वस्थशरीरो माधव इति।

यति निमीलयति सर्वथा सर्वप्रकारेण मन्मथालोकनेन माधवदर्शनेन तुल्यं निर्विशेषं यथा तथा विलसति। अथ पैव माधवकर्णकदर्शनेन त्वम् अतितरां क्षिप्रासि माधवोऽपि मालतीदर्शनेन क्षिप्रोजातः। तेनोभयोः साम्यावस्था उक्ता।

(९) यदिति। इन्दौ चन्द्रे, प्रणयिनि जने प्रियतमजने वा यद् यस्मात् आनन्दं हर्षं न भजते तस्मादयमतिधीरो विवेकशीलोऽपि विषमं अन्तस्तापं व्यनक्ति प्रकाशयति। एतदाकारवर्णने अन्तर्गततापः सहजानुमेय इत्यर्थः। प्रियङ्गुश्यामाङ्गप्रकृतिरपि प्रियङ्गुफलवत् श्यामवर्णा तद्वत् शीतलप्रकृतिर्माधवोऽपि आपाण्डु सम्यक् पाण्डुरवर्णत एव मधुरं सुन्दरं वपुः क्षामं क्षामं अतिकृशम् इति आभीक्ष्ण्ये द्विर्भावः। वहति धारयति तथा रमणीयश्च भवति। विरहावस्थायां माधवमवलोक्य पूर्वापेक्षया नूतन इव भाति।

(१०) अनुभवमिति। वदनेन्दुर्मुखचन्द्रः माधवस्येत्यर्थः। अनुभवं विना

माध। अहो! उपन्यासशुद्धिः, अहो महत्त्वारोपणे यत्नः।

अथवा।

शास्त्रेषु निष्ठा सहजश्च बोधः प्रागल्भ्यमभ्यस्तगुणा च वाणी।
कालानुरोधः, प्रतिभानवत्त्वमेते गुणाः कामदुघाः क्रियासु॥११॥

काम। अतस्तेन जीवितादुद्विजमानेन दुष्करमपि न किञ्चित् न क्रियते। असौ हि,

धत्ते चक्षुर्मुकुलिनि रणत्कोकिले बालचूते
मार्गे गात्रं क्षिपति बकुलामोदगर्भस्य वायोः।
दाहप्रेम्णा सरसबिसिनीपत्रमात्रान्तराय-
स्ताम्यन्मूर्त्तिः श्रयति बहुशो मृत्यवे चन्द्रपादान्॥ (१२)

माध। अन्य एव अमुष्याः कथाप्रकारो भगवत्याः।

मालतीविषयकमित्यर्थः। नियतमेव मदेव उपागमत् माधवमुखमवलोक्य जायते तदस्य कामेन मदनो चिन्ता निद्रा इति शेषः। तत्र किं प्रमाणमित्यत आह वहतीति। यत् यस्मात् अस्य महात्मनो माधवस्य उत्कलिकया उत्कण्ठया तरलं चञ्चलं मनः क्लिमितस्य निवृतस्य मथोदधेः सागरस्य पय इव क्षुभितं क्षुब्धं वर्त्तते। निदर्शनालङ्कारः।

(११) शास्त्रेष्विति। शास्त्रेषु निष्ठा अध्यवसायः, सहजः स्वाभाविकश्च बोधो ज्ञानं, 'प्रागल्भ्यं' शास्त्रनैपुण्यं अभ्यस्तगुणा गुणयुक्ता वाणी वाक्यञ्च कालानुरोधः, समयपरीक्षा प्रतिभानवत्त्वं प्रेक्षावत्त्वम् एते गुणाः क्रियासु कर्मसु कामदुघाः सफला भवन्तीत्यर्थः॥

(१२) धत्त इति। मुकुलिनि कलिकाविशिष्टे रणत्कोकिले मन्दायमानपिके बालचूते नूतनसे चक्षुर्धत्ते। बकुलामोदगर्भस्य बकुलपरिमलसमेतस्य वायोर्मार्गे गात्रं क्षिपति दाहशान्त्यै इति भावः। दाहप्रेम्णा दाहानुरागेणैव सरसबिसिनी-पत्रमात्रान्तरायः आर्द्रकमलिनीदलमात्रेण रहितः. यत् अनेनापि मन्मुखस्य सुखमपि न भवतो जायते, करणेनादिविशेषणानां तापोपशमकत्वात् तदनवधानमेव इति भावः। अतएव ताम्यन्मूर्त्तिः क्लिश्यमानः सन् बहुशो वारंवारं मृत्यवे चन्द्रपादान् चन्द्रकरान् श्रयति। मृत्यवे इति क्रियार्थोपपदस्य चतुर्थी। विरहे हि चन्द्रकिरणोऽप्यसह्यो भवतीति भावः।

माल। [स्वगतं।] अदिदुक्करं करेदि। (न)

काम। तदेवं प्रकृत्या सुकुमारः कुमारः कदाचिदपि अन्यत्र अपरिक्लिष्टपूर्वस्तपस्वी, यतोऽधुना ग्लानमनेन मरणमपि अनुभवितुम्।

माल। [जनान्तिकं।] सहि! अत्तणो कारणादो तस्स सव्वलोआलङ्कारभूदस्स, किम्पि आसङ्कन्तीए भअवदीए भीदाविदह्मि, ता किं दाणिं एत्थ पडिवज्जिस्सं (प)।

माध। दिष्ट्यानुकम्पितोऽस्मि भगवत्या।

लव। भअवदी एव्वंवादिणीत्ति आअक्खीअदि, अह्माणं वि भट्टिदारिआ, भअणासअरक्खासुहसुहुत्तमक्खणस्स, तस्स ज्जेव्व बहुसो अणुभूददंसणा भविअ, रविकिरणासिलिट्ठ-मुह-कमलिणी-कन्द-सुन्दरावअव-सोहा-विभाविदाणङ्ग-वेअणा-विअदर-रमणीआवि, परिअणं दूणेदि। णाभिणन्ददि केलि-कलावो, केवलं कमलाअमाण-कस्तहत्थ-पल्हत्थ-गण्ड-मण्डला दिअसाइं गमेदि। अविअ। विअसिआरविन्द-मअरन्द-णिस्सन्द-सुन्दरेण, दर-दलिअ-कुन्द-माअन्द-महु-बिन्दु-सन्दोह-वाहिणा, अणुज्जापेरन्त-मारुदेण उत्तम्मदि।

(न) अतिदुष्करं करोति।

(प) सखि! आत्मनः कारणात्तस्य सर्वलोकालङ्कारभूतस्य, किमपि आशङ्कमानया भगवत्या भीतापितास्मि, तत् किमिदानीमत्र प्रतिपत्स्ये।

(फ) भगवती, एवं वादिनी इति आख्यायते, अस्माकमपि भर्तृदारिका, मदना-शरक्षासुखसुखोत्तमक्षणस्य, तस्यैव बहुशोऽनुभूतदर्शना भूत्वा, रविकिरणाश्लिष्टमुख-कमलिनीकन्दसुन्दरावयवशोभाविभावितानङ्गवेदनाविकटरमणीयापि, परिजनं दुनोति नाभिनन्दति केलिकलापः, केवलं कमलायमानकरस्तहस्तपर्यस्तगण्डमण्डला दिवसानि गमयति। अपिच। विकसितारविन्दमकरन्दनिस्यन्दसुन्दरेण

अध तस्सिं जणादिसए विणअसुलहा-अमूदअ-दंसण-पच्चिअख-कवस्स भअवदो कामस्स विअ, काम-कामणालङ्कार-धारिणो तस्स, विविह-विब्भमाहिरामं, अणुरूआणुराआणुबन्ध-मह-मघीकिद-जोव्वणारम्भं अच्चोत्सदिट्ठिविणिवाद-अण्णावसर-खिण्ण-माअविस-तुवरन्त-कोदूहलं समुल्लसिद-मअस-त्थम्भ-मन्थराअमाणपडिरूमा-सेअ-पुलअ-उक्कम्प-सुन्दरं, आणन्दिद-सहीअणं पिअसहीए परप्पराअलोअणसुहं समासादिदं, तदो पहुदि, सविसेस-दूसहाआस-विजिज्जमाणुद्दामदेहदाह-दारुणं दसापरिणामं अणुभवन्ती, मुहुत्तमेत्तमप्पत्त-पुण्णचन्दोदआ बालकमलिणी विअ पम्मलाअदि ।

तहाविअ, मुहुत्तमेत्त-हिअअ-विणि-हिद-णिअ-अङ्ग-समागमा, णिब्भर सलिलासार-सित्तमाणिव्व मेदणी सीदलाअदित्ति जाणामि । जेण पप्फुरिद-कन्त-दसण-च्छदुच्छलन्त-दन्त-मुत्तिआवलिकन्ति सविसेस-सोहिदं, णिरन्तरुल्लसिद-पुलअ-पम्हल-कवोलवोलन्त-संददामन्द-बाहत्थ-वअं ईसि-विअलिद-विप्फन्द-मन्दताकन्ताअ-मसिणमउलाअन्त णेत्तणीलुप्पलं, अविरलुब्भिन्न सेअजलबिन्दु सुन्दरललाटपट्ट ववन्दणेहामणोहरं सुहसुहपुण्डरीअमुव्वहन्ती, विअट्ठ-मअणरोविअ-संवड्ढ-कोमारभावा भोदि। किंअ। उद्दाम-ससिमण्डलविडम्बणुब्भिदपण्डत्तिणीसन्दचन्दमणिहार-धारिणी

मदनोद्यानवर्त्मनायातेन दृष्टासि । अथ तस्मिन् वासादिवसे, निजजनौक-साभ्युदयदर्शनप्रत्यक्षरूपस्य भगवतः कामस्येव, कामकाननालङ्कारधारिणः तस्य, विविध विभ्रमाभिराममनुरूपानुरागानुबन्धमहार्घीकृतयौवनारम्भमन्योन्यदृष्टिविनि-पातवशनावसरखिन्नमाभिषितमरमाधकौतूहलं, समुल्लसितसाध्वसस्तम्भमन्थराय-

कप्पूर-पूरसविसेस सिसिर चन्दणरस च्छडा-सारणिपर-दन्तु-

सघनितलपत्स्वेदपुलकोत्कम्पसुन्दरं, आनन्दितसखीजनं, विकसच्छा पञ्चशरावली-कलसुखं समासादितं, ततः प्रभृति, सविशेषदुःसहावासविजृम्भमाणोद्दामदैव-दाहदारुणं दशापरिणाममनुभवन्ती मुहूर्तमात्रसम्भाषणपूर्णचन्द्रोदया बालकमलि-नीव प्रकाशयति ।

→ यत्र पर्वतादिनीत्यत्र कामावस्थां मृदजनै लज्जया वक्तुमनुचितमपि माञ्जल्या: निमित्तं माधवावस्थाश्रवणात् नापि तन्निमित्तं सन्मना जाता इति कथ्यत इति भाव: । अस्याकं भर्तृदारिका परिक्रमं दुर्नीतीत्यन्वय: । चाहित्वं स्फुटम् । मुग्धो बाल: । कन्दं विसम् । बालकमलिनीमूलं मृदुतरं रविकरस्पर्शान् म्लानं च भवति । तद्वचैन दृष्टान्तेन नि:सहत्वमनुक्तं च व्यवचारान्मुक्तं । तद्वचावामपि सौन्दर्ययोग-नाय सुन्दरपदम् । अभिकलतरमणीयापीत्यनेन कामाविष्टितकायस्य कान्ति-प्रकर्ष उक्त: । अतएवापिर्विश्वाही । अतिकान्तस्य सुखजनकत्वनैयत्येन दुःखजनकत्व-विधान् । दुःखप्रकारमाह । नानिमन्दति इत्यादि । अत्र यत इत्यध्याहार्यम् । केलि: क्रीडा । कथाचतु:पष्टि: । यथा । केलीनां कथा च प्रभावम् । कथं तर्हि दिनानि गमयतीत्याह । कैवलमित्यादि । कमलायमानं प्रसारितम् । दृष्टं अरतानुमतम् । यदाह । अथार्थे च प्रियं कार्यं: कौतिमन्तकान्वित: कर: ॥ पर्यन्तं चित्रम् । नि:स्पन्द: चरणम् । ईषदर्थे दराव्ययमिवमनर: । दर्शितं विकसितम् । माकन्दस्य तु: । पुष्पपरमत्र । माकन्द: सहकारेऽस्त्रीति मेदिनी । एतेन मायोत्कण्ठासूचनम् । यत्र प्रियमुख्या चाद्यादिने तत्र दर्शनसुखं समा-सादितं तत आरभ्य सा कमलिनीव प्रकाशयतीत्यन्वय: । ललितचक्रपदस्य प्रकृति-परिचायकम् । कामध्यानकृतान् पुरातनत्वाय । मदीयपदर्शनापेक्षिदसुखमिति भाव: । विविधविलासैरभिरामम् । यदा । विविधजनजनिराभोऽभिरतिमद्य-तम् । यथा दर्शनाभाव: । तरमात्वं क्रीडसुपजायमानम् । यथं पश्यामीति कुतुकं तयोर्विवर्तिऽमयदित्यालम्ब: । आनन्दितसखीजनं कामसम्पर्कोति भाव: । विजृम्भमाणो वर्धमान: । उद्दामो महान् । दारुणो भयङ्कर: । तरुण-प्रकृतीति भाव: । दशा कामावस्था । यथा बालमात्रकामचन्द्रोदया कमलिनी कार्यति तथा इयमपि प्रागपूर्वचन्द्रोदया कार्यति । चन्द्रकरमपि कौतुकमनीति भाव: । यथा । यथा मामचन्द्रोदया पद्मिनी कार्यति तथा प्रागदर्शनमनुमिय कार्यतीत्यर्थ: । ननु चन्द्रे च विरोधान्यथिना शानिर्दुका । अथास्तु नाव-

विडबालकदम्बीअस्स संवाहणादि-व्वावारतुवरन्त सहचरी-मण्डविरइदोवणीद कमलिणीदल अवहासमणीए उसिदा, रअणीओ गमेदि ।

तथापि च, मुहुर्मालवदवविनिर्वर्तितनिजयज्ञसमागमा निर्भरमभिला-षाभिलष्यमाणेव सिद्धिरसौ श्रीलक्षण इति जानामि । वैगमकुरस्कान्त-दलनवचरीचक्रहृतमौलिकावलिकालिमविनिर्भिन्नमीभिर्न, निरन्तरोन्मिलितपुलक-पङ्कजकपोलयुगलानन्दरसायनसम्बन्धीवविकसितनिष्पन्दतारोनाननमशूलम्-कमलवनमिवनीलीनयनं, अविरलोद्दिग्नप्रवेशमतनिन्दुसुन्दरभालपट्टं नवचन्द्ररेखा-मनोहरं, सुग्धमुग्धपुण्डरीकम् मदनो विदग्धसहचरीविरचितसंवर्धितकौमारभावा भवति ।

किञ्च । चन्द्रातपविलसदुपनिकृतकुसुमितपल्लवनिस्यन्दचन्द्रमणिहार-धारिणी, कदम्बपुष्पविमर्दविभ्रमनन्दनसदृशाटासारनिकरन्दनुरितबालकदम्बी-पक्षमवाहनादिव्यापारतत्परमाण सहचरीसार्धविरचितोपनीतबालकमलिनीदलज-लार्द्रास्तरणीये उषिता, रजनीर्गमयति ।

* मुरारातत्कृतमें कथं मानिनिति । मेवम् । यथा शीतरश्मिर्लभन चन्द्र अर्थ पद्मिनी मुकुलयति तथा माधवो मालतीमिति विवक्षितत्वात् । यथा । मुहुर्-पदेनैव प्रथमचन्द्रोदय सूचकः । एवं चाभिनवोदित चन्द्र रजतया मुग्धांश इदं आत्मा मुहुर्वे पद्मिनी निहत्यत प्रमापयति तदयमपीत्यर्थः ।

तथापि चन्द्रादि चेति भिन्नक्रमः । तथा शीतलायत इत्यपि जानामि चेति सम्बन्धः । निर्मितं भावारचितं मत्वमित्यर्थः । सुमा-गमेति भावनावशादिति भावः । सिद्धिरसौ योगावस्थानबालानीत्यर्थः । येन हरिद्राकालसदृशमैवं सा भवति तेन विदग्धसहचरीचित्तसंवर्धितकौमार-भावा भवति । वैदग्ध्यापूर्णतया सहचरीमहं भवं समजते यत्तत्परोऽपि विषयविषयम् । कथमपवेनाहृत संस्थानमस्या इति भावः । दलन-चंदनपत्रम् । कुसुमम् चलायमानः । चमरकृत इव भावनार्पितवियतम पुष्पमाल । मुक्तिका मौक्तिकं मुक्तेति प्रमाणः । निरन्तरेति । सहस्रकृत कलमममात्मनीड तदाश्लिष्टवानिवेनैवावः । कुसुमानं समवायम् । यद्यपि रोमाञ्च: कपोलेष्वेव एव भवति तथापि रामातिशयवशीलतया कपोलपुलक एव वक्ष्यते कविसंप्रदायेनैवमवैयम् । मन्दतारं निश्चिन्तारकम् । वनायमूर्ध्वं

अज्जंवि उववणणिद्दामुद्दा सेदपप्फुरिदपाद पसुत्तपिच्छालसचरणा थरथरायन्त पीवरोरुमूलबाल विसंवादिणीविब्भमा उक्कंठन्त हिअअमन्तवत्तरंमणीसास विसम-

अद्यापि उपवननिद्रामुद्रा स्वेदप्रस्रुतपादपङ्क्तीरागपिच्छालचरणा, थरथरायमाणपीवरोरुमूलबालविसंवादिनीविभ्रमा, अनुबद्धग्रामानद्धवाक्दीन-

विसृतम् । आवर्जोपनीतप्रिये सख्यादिहृदयाभ्यामीषद्विकसितम् । निष्पन्दता मौग्ध्यात् । मन्दतारता नवोद्भवत्कमलभावनया प्रियं प्रति मासृणत्वात् । अप्रा-मत्वं मुखादिहृदयया । मसृणत्वं भेदभावनया । मुकुलत्वं रसावस्थानभावनया । यदाह । निश्चलत्वं तदा यातौ मुकुलत्वं च तावभौ । इति प्रसृतम् । स्वेदोऽत्र रतिप्रमादादयं स्वेदः । तदनेन प्रबन्धेन हासकाः । यदाह । रोमाञ्चो वेपथुः स्वेदो मूर्च्छने च निवर्तने । सम्भ्रमा इव देहेषु चाङ्गे चप्रतिबन्धनम् ॥ तदिह यदीयं नवसमागमे न जानाति तदा अवधरत्यन्दादिमती स्यात् । कुमारस्य भाव कौमारं प्रेमत्वं तस्य भावोऽभिप्रायः कटाक्षविक्षेपादिः संज्ञयिती यस्याः सा ।

निद्रावेष्टामाह । कि चेति । निकृद्धत्वः । समुद्रः । घूर्णितेन घूर्णमेन प्रहर्षातिस्यन्दः अभ्यासवशः । कटाक्ष कट इति यस्याः प्रसिद्धिः । दम्-ऋत विकर्षितम् । संवाहनमर्दनम् । विरचितोपनीतं विरचनेनाकृष्टम् । कर्पूरपूरपदं पूरः समूहः पूरणं वा । सविशेषपदेन शीतलकर्पूरसंवादितशीतलत्वमुक्तम् । कदलीपत्रस्य बालत्वेन कोमलीकुमार्यो ज्ञेये । कर्णिकीदल-मेव अवादाङ्ग चार्द्रलसं तच्छ्याम् । चार्द्रलसं जवाद्रां स्यादिति चारावकी ।

निद्रैव सुखं निद्रासुखम् । दुःखादिदुःखमसमागमविपर्ययस्थानादि-दम् । निद्रेयं चिन्तावशात् । यदाह । दीर्घस्यालस्यचिन्ताधैर्निद्रा स्यात् अद्यापि चेति । नवसमागमसहृत्स्यन्दनेन प्रसूतचरणपदवीनीराजः पिञ्ची-भूतालक्तकरसौ यस्याः सा । नवसङ्गमानुरागमित्थं दर्शितोऽभिप्रायः । चलि-चलितमत्वं पिण्डपदम् । थरथरायमाणं कम्पमानम् । पीवरं महत् । विसंवादि स्खलितम् । प्रियोक्तोपालम्भनभावनया प्रकम्पः । तदाकर्षणभाव-नया नीवीस्खलनम् । अनुबद्धग्रामानुबन्धनम् । [illegible] यातायातयाम । विषमं यथा तथोच्छृतम् । पक्षतः [illegible] । वेदनं वेदः । इह

समुच्छसन्तपम्हल पओहरोवरिणिहित वेवन्त मुणालदा-
वेढ वम्महा अम्मि पडिबोध वेला विसमविज्जिदुव्विमादिट्ठि
विणिवाद विसाद सुण्ण मणणिज्ज सव्वादमोहमीलन्तलोअणा
ससम्भम सहीअण पअत्तपढिवण्ण मुच्छाविच्छेअसमअ संगलिद
दीहणीसास सेस जीविदा, किंकादव्वदामूढदाए पढमपत्थिद
णिअजीविदावसाणं दुव्वार देव्वविलसिदोवालम्भमेत्तव्वावारं
पच्चारिसं अणं करेदि.

ता पेक्खदु भअवदी, इमेसु दाव लावण्ण भूइट्ठणि-
म्माण परिवेलवेसु अङ्गेसु दारुणविजिम्भिदम्म किंचिरं
कुसलावसाणदा मम्महम्म भविस्सदि। कधं च इमाइं

रङ्गनिपात विषमसमुच्छ्वसत्पक्ष्मलपयोधरोपरिनिहित वेपमान मृणालिकावेष्टनमना
अहिनि प्रतिबोधवेलाविषमजिह्मितदृष्टिविनिपातविषादशून्यमननीयसत्वात्मोह-
मीलल्लोचना, ससम्भ्रमसखीजनप्रयत्नप्रतिपन्नमूर्च्छाविच्छेदसमयसङ्गलितदीर्घ-
निश्वासशेषजीविता, किंकर्तव्यतामूढतया प्रथमप्रार्थितनिजजीवितावसानम्
दुर्वारदैवविलसितोपालम्भमात्रव्यापारमञ्जरैषं जनं करोति।

तत् प्रेक्षतां भगवती, एतेषु तावल्लावण्यभूयिष्ठनिर्माणपरिपेलवेषु अङ्गेषु
दारुणविजृम्भितस्य किंचिरं कुशलावसानता मन्मथस्य भविष्यति। कथञ्च

उद्धीतमकरन्दादिकं निद्रव्योत्साहाभावमना। उपरिविनिहितस्य मृणालता-
वलयमाश्लिष्टमानमना। निद्रानन्तर प्रबुद्धा। प्रबोधस्य सम्यक्दिना भवति।
मोहेति: शून्यमनस्कत्वान्मोहितेत्यर्थ:। ससंभ्रम: सादर: सावेगो वा।
संगलितो नि:सृत:। यतेन पुष्पशालापुटनि:सरणात्। मूर्च्छाविच्छेदे तदैव
सावयवे:। जीवितेति। मोहे मनोजनपीडादिना मूर्च्छापगमे दीर्घनि:श्वा-
सेन जीवतीत्यवधार्यत इत्यर्थ:। किंकर्तव्येति। जीविता सती किं करोमि इति
न वेत्तीत्यर्थ:। प्रथमेति। प्रथममेव प्रथमं निरर्थकम् इत्यर्थ:।

सदनमवस्थावाङ्गवर्णिका कामन्दकी पृच्छति तदाह पेक्षतां भगवतीति।
पेलवं कोमलम्। दारुणत्वं हेतुदाहादिकारित्वात्। इमानि विभावरीमुखानि

रमणकेलिकलहकोवोवराअपल्लविअकेरलीकवोलकोमलुज्जल विमल चन्द-चन्दिओद्दामदलिदतिमिरावरणाइं विहावरीमुहाइं। इमे अ उल्लसिद दुद्ध सिन्धु पूर धवलुज्जलजोह्राजल प्पक्खालिद गअणांगणा, परिमलिद पाडलावउलणिम्महण्त बहल परिमलुग्गार मन्थलण मंसिण संवलापन्तमलअ मारुदधूमाविद दहदिहामुहा वसन्तरअणीपरिणामा अणत्थकारिणो भविस्सन्ति पिअसहीएत्ति * (फ)।

काम। लवङ्गिके !

यदि तद्विषयोऽनुरागबन्धः स्फुटमेतद्धि फलं गुणज्ञतायाः।
इति नन्दितमप्यवस्थयाऽस्या हृदयं दारुणया विदार्य्यते मे॥
(१२)

इमानि रमणकेलिकलहकोपोपरागपल्लवितकेरलीकपोलकोमलोज्ज्वलविमलचन्द्रचन्द्रिकोद्दामदलिततिमिरावरणानि विभावरीमुखानि। एते च उल्लसितदुग्धसिन्धुपूरधवलोज्ज्वलज्योत्स्नाजलप्रक्षालितगगनाङ्गणाः परिमलितपाटलाबकुलनिर्मथनबहलपरिमलोद्गारसंवलनमांसलमन्थरमलयमारुतधूमायितदशदिङ्मुखा वसन्तरजनीपरिणामा अनर्थकारिणो भविष्यन्ति प्रियसख्या इति।

प्रियसख्याः अनर्थं भविष्यन्तीत्यन्वयः। उपरागो लौहित्यम्। पल्लवितः पल्लवाकारीकृतः। केरली केरलदेशस्त्री। तस्या अतिगौरत्वेन लौहित्यार्थं ग्रहणम्। उज्ज्वलम् धवलम्। उद्दामदलितमतिदारितम्। इह कटकेरलीकपोलसाम्यं मो-दितचन्द्र च तिमिरावरणार्थं रात्रिरूपकम: कथितमतश्चन्द्रस्य दुःसहता माधव्या ध्वनिता। परिमलितं क्षतम्। निर्मथनं मर्दनम्। उद्गार उद्गमः। संवलनं मिश्रीभावः। मन्थरं मन्दम्। मांसलः पुष्टः। धूमायितं धूमेनेवाकुलीकृतम्। परिणाम आभोगः।

(१२) यदीति। अनुरागबन्धः प्रेमभावः यदि तद्विषयः अविषयो यस्य स ताडृशः स्यात् तदा एतद्धि निश्चयं गुणज्ञतायाः फलं स्फुटमित्युत्प्रेक्षायाम्।

माध। आगत एव कुहासो भगवत्याः।

मक। अहो! प्रमादः।

प्रकृतिललितमेतत्सौकुमार्य्यैकसारम्
वपुरयमपि सत्यं दारुणः पञ्चवाणः।
चलितमलयवातोद्धूतचूतप्रसूनः,
कथमयमपि कामं बालचन्द्रावतंसः॥ (१४)

लव। अन्यच्च, आणिदं भाद भअवदीए। एदं मालदिपडिकृदिमणाकं चित्तफलअं। [मालत्याः स्तनांशुकमपनीय दर्शयति।] एसावि तस्सज्जेव सहत्थविरइदेत्ति कण्ठावलम्बिदा बउलमाला जीवणं पिअसहीएत्ति (च)।

माध। [सस्पृहं।]

जितमिव भुवने त्वया यदस्याः,
सखि बकुलावलि! वल्लभासि जाता।

(च) अन्यच्च, आनीतं भगवत्या। एतन्मालतीप्रतिकृतिलाञ्छनं चित्रफलकम्। एषापि तस्यैव स्वहस्तविरचितेति कण्ठावलम्बिता बकुलमाला जीवनं प्रियसख्या इति।

इति मन्दितं चानन्दं प्रापितमपि मे मम हृदयं चञ्चा दारुणया चलितकृत्रिमया अवस्थया विदार्य्यते, एतदवस्थां द्रष्टुं वयमपि तावत् न समर्था इति भावः।

(१४) प्रकृतीति। सौकुमार्य्यस्य सुकुमारताया एकसारं एकनिकेतनं प्रकृतिललितं स्वभावसुन्दरं एतत् वपुः। अयमप्यपि पञ्चवाणः कामः दारुणः। चलितेन मलयवातेन उद्धूतानि उत्कम्पितानि चूतप्रसूनानि यस्मिन् स चासौ सुन्दरवसन्त एवावसरः चामरकौमुदी यस्य सोऽयं कालोऽपि वर्त्तते इति शेषः। तेन कथमियं जीविष्यतीति भावः।

(१५) जितमिति। हे सखि! बकुलावलि! भुवने संसारे त्वयैव जितम्। आदि सः। परिपक्वतीव... परिपक्वनवबालवन्धूकवत् पाण्डुः मुग्धः सुन्दरः

परिणतबिसकाण्डपाण्डुमुग्ध
स्तनपरिणाहविलासवैजयन्ती ॥ (१५)

[नेपथ्ये कलकलः । सर्वे आकर्णयन्ति ।]

[पुनर्नेपथ्ये ।] रे रे णअरघराधिवासिणो जाणवदा ! एसो क्खु जोव्वणारम्भ-गव्वसम्भविद दुव्विसहामरिसरोस-व्वदिअर बलामोडिविहडिदुग्घाडिद-लोहपञ्जर-पडिबद्धदढसिङ्खला-णिरोहपडिभङ्गमङ्गलिदथिर-लीलाविलास पेरन्तुद्धं सल्लक-लुसङ्कलङ्कुल-विघड-वेजयन्तिआ-डम्बरुद्दामसरीर--सण्णिवेसो, महाटो पच्चक्खमिव तक्खणं मसिक्ककवलिदाणं घट्टि-टङ्का-वयवमज्झणिट्टुर-अत्थि--खण्डट्टङ्कार - कडकडायन्तकरवत्त -कठिणदाढा-कराल मुहकन्दरो, पअण्ड वज्जणिग्घाददारुणच-

(स) रे रे नगरगृहाधिवासिनो जानपदाः ! एष खलु यौवनारम्भगर्वसम्भृत-दुर्विषहामर्षरोषव्यतिकरबलात्कार-विघटितोद्घाटितलोहपञ्जरप्रतिबद्धशृङ्खलानिरो-धप्रतिभङ्गमङ्गलितनिजलीलाविलासपर्यन्तोद्धं सद्धकलङ्कुलविघटवैजय

यः स्तनपरिणाहः कुचविस्तारस्तस्य विलासवैजयन्ती विलासपताकेव त्वं यद्व यस्मादस्याः मालत्याः वक्षसि जातासि । अर्थान्तरन्यासः अलङ्कारो ध्वन्यते । मालत्याश्च यः तवैव जातः स सर्वति । अयं तत्त्वमेवान्मधुकर ! कृतान्तं खलु करोषि न्यायादिति भावः ।

* अत्रैव व्याघ्रः कुतूहलविलासं कुरुते । सर्वे भयशीलाः । महाव्याघ्रसङ्कट-मुहाविमत्य । कीदृशः । यौवनारम्भेण दर्पो यो दुःसहाकालिकाणो मर्षो-ज्जितेन यो बलात्कारस्तेन विघटितं उद्घाटितं मोटितं च यल्लोहपञ्जरं तत्र प्रतिबद्धशृङ्खलानिरोधप्रतिभङ्गः विपरीतभङ्गेन कुण्डलिता निमिता या निजलीला तद्विलासपर्यन्तं उद्धतं कम्पमानोऽस्त एवोच्छलत्पुच्छं मण्डलेन यो बहुल-तुङ्गलाङ्गूलः कल्लोलितलाङ्गूलस्य निर्मीलवैजयन्तिकाडम्बरपरिणीतोद्दाम उत्-कटकठोरक्रियः शरीरसन्निवेशो यस्य सः । परस्पराक्षिप्ततया चर्चः । रौद्रः क्रोधः । यथा । स्थिरः क्रोध एवामर्षः । यदाह । क्रोधः कृतापराधेषु स्थिरोऽमर्ष इति स्मृतः । प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोध उच्यते । यथा ।

देहामोडण-कवलिदावेसपवरतुरङ्गजंगमुम्मारभरिदमलगुहागब्भगम्भीर घघ्घरोरसिगगूरपसद्द-संदब्भपडिरवा-भोअभीसिद-वडलिरुद्धविद्दाविद-जणविअडो, कठोरणहरकप्पर-कमणपिहु-पडालिद-जन्तुगत्तावमवप्पवत्तरत्तकद्दमिदग रवडो दुट्ठसद्दूलो कुविदकिदन्तलीलाअदं करेदि । ता रक्खध जधासत्ति पिअसहीए मदअन्तिआए जीविदं त्ति । [प्रविश्य बुद्धरक्षिता सभयम् ।] परित्ताअध, एसा क्खु पिअसही अमच्चणन्दणस्स बहिणिआ मदअन्तिआ, पदिणा दुट्ठसद्दूलेण विणिहदविद्दाविदमसेसपरिअणा अहिभवीअदि (अ) । *

निजपञ्जरोद्दामशरीरसन्निवेशो महादपक्रम्य, तत्क्षणमत्कवलितानेकदेहिदेहावयवप्रनिरूपाणि कटत्कारकटकटायमानकरपत्रकठिनदंष्ट्राकरालमुखकन्दरः, प्रचण्डतरनिर्घातताडनचपेटाभीषणकवलितानेकनरतुरङ्गमाङ्गलोद्गारभरितगलगुहागर्भगम्भीरघर्घरोरस्थलगुरुक शब्दसन्दर्भप्रतिरवाभोगभीषितनष्टनिद्रापितमधजननिवहः, कठोरनखरकर्पराक्रमणनिर्दयदारितजन्तुगात्रावलम्बप्रवृत्तरक्तकर्दमितमलिनपथो, दुष्टशार्दूलः, कुपितकृतान्तलीलायितं करोति । तद्रक्षत यथाशक्ति प्रियसख्या मदयन्तिकाया जीवितमिति । परित्रायध्वं, एषा नः प्रियसखी अमात्यनन्दनस्य भगिनी मदयन्तिका पतिना दुष्टशार्दूलेन विनिहतविद्राविताशेषपरिजना अभिभूयते ।

अमर्षोऽस्यास्ति । तत्क्षणं मया कवलिता येऽनेकमानुषशरीरावयवाः तेषां मध्ये कठोराणि यान्यस्थीनि तेषां खण्डे खण्डने यत्कारो ध्वनिभेदस्तेन कटकटायमानाः करपत्रवत् कठिना या दंष्ट्रास्ताभिः करालो भीषणो मुखकन्दरः यस्य सः । टङ्कारैव दुर्भेद्यमहुमम् । दुर्भेद्यप्रकृती दन्तानां कटकटाशब्दकरण स्वभावः । विस्तीर्णत्वात् कन्दर इव कन्दरः । प्रचण्डतरप्रहारदारुणो यश्चपेटः पाणितलप्रहारस्तेन यदाभीषणं चूर्णनं तेन कवलिता आस्वादिता येऽनेकनरास्तुरङ्गाश्च तेषां मांसं तस्योद्गारैः प्रपूरणेन भरितो यो गलगुहागर्भस्तत्र गभीरो घर्घरो दीर्घमधुरो य उपहिंस्रघनगर्जितं तेन यो गम्भीरशब्दस्तस्य सन्दर्भेण समूहेन प्रतिरवाभोगः प्रतिशब्दविस्तारस्तेन भीषितो भयं नीतो नष्टो विद्रावितो

माल। लवङ्गिए! अहो प्पमादो। (म)

माध। [ससंभ्रममुत्थाय।] बुद्धरक्खिदे!। क्वासौ।

माल। [दृष्ट्वा सहर्षलज्जं आत्मगतं।] अम्महे! एसोवि इहत्थो ज्जेव। (य)

माध। [स्वगतं।] हन्त! पुण्यवानस्मि, यदहमतर्कितोपनतदर्शनोच्छ्वसितलोचनया अनया।

अविरलमिव दाम्ना पौण्डरीकेण नद्धः,
स्नपित इव च दुग्धस्रोतसा निर्भरेण।
कवलित इव कृत्स्नश्चक्षुषा स्फारितेन,
प्रसभममृतवर्षेणेव सान्द्रेण सिक्तः॥ (१६)

बुद्ध। महाभाअ! उज्जाण-वाहिरत्था-मुहे। (र)

[माधवः साटोपं परिक्रामति।]

काम। वत्स! अप्रमत्तो भूत्वा विक्रमस्व।

(म) लवङ्गिके! अहो प्रमादः।

(य) आश्चर्यं एषोऽपि इहस्थ एव।

(र) महाभाग! उद्यानबाह्यरथ्यामुखे।

निवापितौ निवापयोग्यं कल्पितौऽग्रेसरजननिवहौ येन सः। कठोरनखकर्परा-क्रमणेन निर्दयं दारितं यद्दनुशरीरं ततः प्रसृतरक्तेन सान्द्रतररुधिरेण कर्दमीकृतौ गतिपथौ गमनमार्गौ येन सः। कर्पर इव कर्परः। निबन्धात्। उरश्छिन्नैक-मर्जितमिति रत्नकोषः।

(१६) अविरलमिति। अहं पौण्डरीकेण पुण्डरीकसम्बन्धिना दाम्ना पाशेन अविरलं अनवरतं नद्ध इव। निर्भरेण निरतिशयेन संभृतेन वा दुग्धस्रोतसा पयःप्रवाहेण स्नपित इव। स्फारितेन आकर्णविस्फारितेन चक्षुषा कृत्स्नः निःशेषोऽहं कवलितः ग्रस्त इव। सान्द्रेण घनेन अमृतवर्षेण सुधासारेण प्रसभं बलात् सिक्त इवास्मि। स्रोतसा निर्भरेण इति पाठान्तरे निर्झरेण प्रवाहेण इत्यर्थः।

माल। [जनान्तिकं।] सअक्खिए ! हद्धी ! हद्धी ! संसओ क्खु जादो। (क) [सर्वास्त्वरितं परिक्रामन्ति।]

माध। [पथे दृष्ट्वा सबीभत्सं।] अहह !

संसक्तत्रुटितविवर्तितान्त्रजाल-
व्याकीर्णस्फुरदुपदष्टकण्ठखण्डः।
कीलालव्यतिकरगुल्फदघ्नपङ्कः
प्रागल्भ्यं वहति नखायुधस्य मार्गः॥ (१७)

अहो प्रमादः।

अय एव विदूरतः क्रमगता पशोः कन्यका

सर्वाः। हा मदयन्तिए ! (ख)

[कामन्दकीमाधवौ सभयाकूतं।]

कथं मदभिपातितादधिगतायुधः पूरुषात्।
कृतोऽपि मकरन्द एष सहसैव मध्ये स्थितः

इतराः। साहु, महाभाअ ! साहु। (ग)

(क) सखि ! हा धिक् ! हा धिक् ! संशयः खलु जातः।

(ख) हा मदयन्तिके।

(ग) साधु महाभाग ! साधु।

---

(१७) संसक्तेति। संसक्तेन परस्परलग्नेन त्रुटितेन छिन्नेन विवर्तितेन अधऊर्ध्वं निर्यक् निपतितेन अन्त्रजालेन अन्त्रसमूहेन व्याकीर्णानां व्याप्तानां अतएव स्फुरतां चलतां उपदष्टानां चर्वितानां कण्ठानां छिन्नभिन्नानां खण्डाः यस्मिन् सः। तथा कीलालव्यतिकरेण रक्तसम्पर्केण गुल्फदघ्नो गुल्फपरिमाणः पङ्को यस्मिन् सः नखाः एव आयुधानि यस्य स व्याघ्रः तस्य मार्गः पन्थाः प्रागल्भ्यं औद्धत्यं वहति।

(१८) अयमिति। अत्र योग्ये अयं विदूरतः अत्यन्तदूरे वर्तामहे इति शेषः। कन्यका मदयन्तिका पशोः व्याघ्रस्य क्रमगता आक्रमणं प्राप्ता। कथं मदभि-

कामन्दकीमाधवौ। [सभयं।]—हन्त पशुना हतः

इतरा:। अच्चाहिदं! अच्चाहिदं! (च)

कामन्दकीमाधवौ। [सहर्षं।]—प्रमथितश्च दंष्ट्रायुधः॥ (१८)

इतरा:। [सानन्दं।] दिट्ठिआ परिहदं दुज्जादं। (म)

काम। [साकूतं।] कथं व्यालनखरप्रहारनिःसृतरक्तप्रवाहः, क्षितितलनिषण्णखड्गलतावष्टम्भनिश्चलः, संभ्रान्तमदयन्तिकावलम्बितः ताम्यतीव वत्सो मे मकरन्दः।

इतरा:। हद्धी! हद्धी! गाढप्पहारदाए किलम्मदि महाभाओ (छ)।

माध। कथं प्रमुग्ध एव। [कामन्दकीं प्रति।] भगवति! मां परित्रायस्व।

काम। अतिकातरोऽसि। तदेहि तावत्पश्यावः।

[इति परिक्रम्य निष्क्रान्ताः सर्वे।]

इति मालतीमाधवे शार्दूलविद्रावणो नाम तृतीयोऽङ्कः।

(च) अत्याहितमत्याहितम्।

(म) दिष्ट्या प्रतिहतं दुर्जातम्।

(छ) हा धिक्! हा धिक्! गाढप्रहारतया क्लाम्यति महाभागः।

पातितात् तेन व्याघ्रेण अवपातितात् रक्षितात् कुतोऽपि पुरुषात् अभिनतायुधः प्रसिद्धः, सहसैव एव आगत्य मकरन्दः मध्ये स्थितः। तथा हद् च यथा तथा पशुना व्याघ्रेण हतः ताडितः मकरन्द इति भावः। दंष्ट्रायुधो व्याघ्रश्च प्रमथितो व्यापादितः।

चतुर्थोऽङ्कः ।

ततः प्रविशतो मदयन्तिकाबुद्धरक्षिताभ्यामवलम्बितौ प्रमुग्धौ माधवमकरन्दौ, समाकुला कामन्दकी मालती बुद्धरक्षिता च ।

मद । पसीद भअवदि ! परित्ताहि परित्ताहि मदअन्तिआणिमित्त-संसइदजीविदं माहवजणाणुकम्पिणं महाभाअं (क) ।

इतरा: । हद्धी ! हद्धी ! किं दाणिं अह्मेहिं एत्थ पेक्खिदव्वं । (ख)

कामन्दकी । [उभौ कमण्डलूदकेन सिक्त्वा ।] ननु भवत्यः पटाञ्चलेन वक्षो वीजयन्तु ।

[मालत्यादयस्तथा कुर्वन्ति ।]

मक । [समाश्वस्यावलोक्य च ।] वयस्य ! कातरोऽसि, किमेतत्, ननु स्वस्थ एवास्मि ।

मद । [सहर्षं ।] अम्महे ! पडिबुद्धं दाणिं मअरन्द-पुण्णिमाचन्देण (ग) ।

माल । [माधवस्य ललाटे हस्तं दत्त्वा ।] सहि लवङ्गिए ! दिट्ठिआ वड्ढसि, णं भणामि, पडिबुद्धो ज्जेव्व दे पिअवअस्सो, पडिवण्णचेअणो महाभाओ मअरन्दोत्ति (घ) ।

(क) प्रसीद भगवति ! परित्रायस्व, मदयन्तिकानिमित्तसंशयितजीवितं माधवजनानुकम्पिनं महाभागम् ।

(ख) हा धिक् ! हा धिक् ! किमिदानीमस्माभिरिह प्रेक्षितव्यम् ।

(ग) आश्चर्य्यं ! प्रतिबुद्धमिदानीं मकरन्दपूर्णिमाचन्द्रेण ।

(घ) सखि लवङ्गिके ! दिष्ट्या वर्द्धसे ननु भणामि प्रतिबुद्ध एव ते प्रियवयस्यः प्रतिपन्नचेतनो महाभागो मकरन्द इति ।

माध। [आश्वस्य ।] वयस्य ! समाश्वसिहि ! एह्येहि ।

[इत्यालिङ्गति ।]

काम। [उभौ निरत्ययौ । *] दिष्ट्या जीवितवत्सास्मि ।

इतरा: । पिअं पिअं णो संवुत्तम् । (क)

[सर्वा हर्षं नाटयन्ति ।]

बुद्ध। [जनान्तिकम् ।] हला मदअन्तिए ! एसो क्खु सो । † (ख)

मद। तदा जेव्व जाणिदं मए, जधा एसो माहवो, अअंपि सो जणोत्ति ‡ (ग)।

बुद्ध। अवि, सच्चवादिणी अहम् ? । (घ)

मद। ण क्खु अण्णारिसेसु तुम्हारिसीओ पक्खवादिणीओ होन्ति । ¶ [माधवमवलोक्य ।] सहि ! मालदीए वि रमणीओ इमस्सिं महाणुहावे अणुराअप्पवादो (ङ)।

(क) प्रियं प्रियं न: संवृत्तम् ।

(ख) सखि मदयन्तिके ! एष एव स: ।

(ग) तदैव ज्ञातं मया यथा एष माधव: अयमपि स जन इति ।

(घ) अपि सत्यवादिनी अहम् ।

(ङ) न खलु अन्यादृशेषु युष्मादृश्य: पक्षपातिन्यो भवन्ति । सखि ! मालत्या अपि रमणीय एतस्मिन् महानुभावेऽनुरागप्रवाद:

---

* निरत्ययावेतावायुष्मन्ताविति हृष्टा: ।

† हलेति सखीसम्बोधनम् । मकरन्दनामाग्रहणेन ख्यातिमत्ताभिव्यक्तिरिति ।

‡ जनशब्देनात्मप्रियमकरन्द: ।

¶ न हि पक्षपातिन्योऽस्मादृश्यो मन्दं भद्रं वदन्तीति भाव: ।

[पुनर्मकरन्दमेव सस्नेहमवलोकयति ।]

काम। [स्वगतम्।] रमणीयोर्जितं * हि मदयन्तिकामकरन्दयोर्दैवादस्य दर्शनम्। [प्रकाशम्।] वत्स मकरन्द ! कथं पुनरायुष्मानस्मिन्नवसरे मदयन्तिकाजीवितत्राण[illegible]भगवता दैवेन सन्निधापितः।

मक। अथाहमन्तर्नगर एव काञ्चिद्वार्त्तामुपश्रुत्य, माधवस्य चित्तोद्वेगमधिकमाशङ्कमानस्त्वरितमवलोकितानिवेदितकुसुमाकरोद्यानवृत्तान्तः, परापतन्नेव शार्दूलावस्कन्दगोचरतामेतामभिजातकन्यकामभ्युपपन्नवानस्मि ।

[मालतीमाधवौ विलज्जतः † ।]

काम। [स्वगतम्।] इत्तेन खलु मालतीप्रदानेन भवितव्यम्। [प्रकाशम्।] वत्स माधव ! दिष्ट्या सुहृद्वधुरया वर्द्धितोऽसि मालत्याः, तदयमवसरः प्रीतिदायस्य ‡।

माध। भगवति ! इदं हि।

यद् व्यालम्बितसम्भ्रमोहमुग्धं
सौजन्यादिहितवती गतव्यथं माम्

---

* अर्द्धदीपनतयेन रमणीयम्। शार्दूलनाशेन उपकारपूर्वकमुत्पन्नत्वादूर्जितं शान्तिमयम्। आयुष्मानिति शब्देन वाच्यो वाच्यः प्रमाणयः। इति भरतः।

† उद्यानप्रत्यागमने मालतीमाधवयोः परिचयक्रमः। परापतन्नागच्छन्। अवस्कन्दोऽभिक्रमः। अभिजाता कुलीना। तथा चाभिजातत्वेन मदुपकारं स्मरिष्यतीति भावः। चाभिजातत्वेन ज्ञातं च तथाविधाकारादिना। कन्यकेत्यनेनानु कन्यायां वम्। अभ्युपपत्तिः प्राप्तिः। विलज्जतः। परस्परकृतोपकारित्वाल्लज्जेते इति भावः।

‡ प्रीतिदायस्य वर्धापनदानस्य।

(१) यदयमात् आर्येण किञ्चनेन प्रविष्टो वः सुहृद् बान्धवः तथा वः

तत्कामं प्रभवति पूर्णपात्रवृत्त्या

स्वीकर्तुं मम हृदयञ्च जीवितञ्च ॥ १ ॥

लव। पडिच्छिदो क्खु णो पिअसहीए अअं पसादो (ञ)

मद। [स्वगतम्] जाणादि महाभाअधेओ जणो अवसरे गुरुअरमप्पिअं * मन्तिदुम् (ट)।

माल। [स्वगतम्।] किं णाम मअरन्देण उवक्खेवकारणं सुदं भविस्सदि? (ठ)।

माध। वयस्य! का पुनर्ममाधिकोद्वेगहेतुर्वार्त्ता †?

[प्रविश्य पुरुषः।] वत्से मदयन्तिके! भ्राता ते ज्यायान् अमात्यनन्दनः समादिशति, यथा परमेश्वरेण स्वभवनमागत्य, भूरिवसोरुपरि परं विश्वासमख्याप्य च प्रसादमाविष्कुर्वता, स्वयमेव प्रतिपादिता मालती, तदेहि सभाजयामः प्रमोदमिति ‡।

(ञ) प्रतीष्टः खलु नः प्रियसख्या अयं प्रसादः।

(ट) जानाति महाभागधेयो जनोऽवसरे गुरुतरमप्रियं मन्त्रयितुम्।

(ठ) किं नाम मकरन्देन उपक्षेपकारणं श्रुतं भविष्यति।

प्रणीतः येन सुखं मूर्च्छितम् मां जीवनात् गतप्रायं व्यथाविहीनं विहितवती चकार, तत् तस्मात् पूर्णपात्रवृत्त्या यथादौ दिव्यमाल्यपूर्णपात्रवत्येव मम हृदयञ्च जीवितञ्च स्वीकर्तुमात्मसात्कर्तुं कामं यथा तथा प्रभवति समर्था भवति।

* गुरुतरमप्रियं भीतदुःखदम्।

† मकरन्देन काचिद्वार्त्तानुपलब्धेति मदुद्वेगमवगच्छमानः पृच्छति। वयस्येति।

‡ ज्यायान् ज्येष्ठः। परमेश्वरो राजा। विश्वासम् अभेदम्। सभाजयामः आदरयामः। उत्सवपूर्वको हर्षः प्रमोदः।

मक। वयस्य ! सेयं वार्त्ता।

[मालतीमाधवौ वैलक्ष्यं नाटयतः।]

मद। [मालतीं सहर्षमालिङ्ग्य।] सहि मालदि! तुमं क्खु एक्कणअरणिवासिणा सहपंसुकीळणादो पहुदि मे पिअसही आसि बहिणिआ अ, सम्पदं उण णो घरस्स मण्डणं जादासि (ड) *।

काम। वत्से मदयन्तिके! दिष्ट्या वर्द्धसे भ्रातुर्मालतीलाभेन।

मद। भअवदि! तुम्हाणं आसिसां प्पहावेण। लवङ्गिए! फलिदा णो मणोरहा तुम्हाणं लाहेण (ढ) †।

लवं। सहि! किं अम्हाणम्पि अत्थि मन्तिदव्वं (ण)।

मद। सहि बुद्धरक्खिदे! दाणिं विवाहमङ्गलं सम्भावेम्ह। (त)

बुद्ध। सहि! एहि गच्छम्ह। (थ) [इत्युत्तिष्ठतः।]

(ड) सखि मालति! त्वं खलु एकनगरनिवासेन सहपांशुक्रीडनात् प्रभृति मे प्रियसखी आसीर्भगिनिका च, साम्प्रतं पुनर्नो गृहस्य मण्डनं जातासि।

(ढ) युष्माकमाशीःप्रभावेण। सखि लवङ्गिके! फलिता नो मनोरथा युष्माकं लाभेन।

(ण) सखि! किमस्माकमप्यस्ति मन्त्रयितव्यम्।

(त) सखि बुद्धरक्षिते! इदानीं विवाहमङ्गलं सम्भावयावः।

(थ) सखि! एहि गच्छावः।

---

* मद्गृहस्य पूर्णविधात्रीति भावः।

† नीचत्वेऽस्याकाङ्क्षितमर्थे निवेदे च तुल्यत्व इति निर्वेदोऽस्यात्र वृत्ति। अत एव सौत्सुक्यमाह। भ्रातुरित्यादि।

लव । [जनान्तिकम् ।] भअवदि ! जहा एदे हिअअ-भरिदुव्विल्लविब्भमाणन्द-सुन्दरा-दोलिद-धीरत्तण-मणोहरा, पट्टुस्सन्ति मदअन्तिआमअरन्दाणं दरदलिदणीलुप्पलदाम-सरिच्छा कडक्खविक्खेवा तह तक्केमि मणोरहणिव्वुत्तसम्बन्धा एदे त्ति । (८)

काम । [विहस्य ।] ननु इमौ विलोकनेन मानसं मुहुर्मुहुः प्रमोदमनुभवतः ।

तथाहि । ईषत्तिर्य्यग्वलितविषमं कुञ्चितप्रान्तमेतत्
प्रेमोद्भेदस्तिमितलुलितं किञ्चिदाकुञ्चितभ्रु ।
अन्तर्मोदानुभवमसृणं स्तब्धनिष्कम्पपक्ष्म
व्यक्तं शंसत्यचिरमनयोर्दृष्टमाकेकराक्षम् ॥ (९)

---

(८) भगवति ! यथैते हृदयभरितोद्वेल्लविभ्रमानन्दसुन्दरान्दोलितधीरत्व-मनोहराः परिवर्त्तन्ते मदयन्तिकामकरन्दयोर्दरदलितनीलोत्पलदामसदृशाः कटाक्षविक्षेपाः तथा तर्कयामि मनोरथनिर्वृत्तसम्बन्धावेताविति ।

---

(९) ईषदिति । ईषत् तिर्य्यक्वलितविषमं ईषत् अल्पम् तिर्य्यक्वलितेन विषमं किञ्चित् वक्रिमभावापन्नं कुञ्चितप्रान्तं कुञ्चितो मुद्रितः प्रान्तः प्रान्तभागः यस्य तत् प्रेमोद्भेदस्तिमितलुलितं प्रेमोद्भेदेन अनुरागोदयेन स्तिमितं निश्चलं स्थिरमित्यर्थः । अतएव लुलितं मनोहरमित्यर्थः । किञ्चिदाकुञ्चितभ्रु किञ्चिदाकुञ्चिते उन्नमिते भ्रुवौ यत्र तत् मदनसूचितं तदनयोर्नायकोचितभावः । अन्तर्मोदानुभवमसृणं अन्तर्मोदस्य आन्तरिकहर्षस्य अनुभवेन ज्ञानेन मसृणमनुज्ज्वलं, स्तब्धनिष्कम्पपक्ष्म स्तब्धानि जडीभूतानि निष्कम्पानि पक्ष्माणि यत्र तत् आकेकराक्षं आकेकरं (ट्यारा) इति प्रसिद्धाक्षं अक्षीणि यत्र तत् अनयोर्युवयोः दृष्टं परस्परदर्शनं अचिरं झटिति व्यक्तं स्फुटं मनोगतं प्रमोदं शंसति कथयतीवेति उत्प्रेक्षमाणोत्प्रेक्षा । अनयोः परस्परदर्शनसुखपारवश्येन कुञ्चि-तत्वादिना सुखस्य मुग्धानुभवेन च प्रेमातिशय्यं भवति ।

बुद्धर:। इत: इत:।

मद। सहि बुद्धरक्खिदे! अवि णाम पुणो वि दाव दीसइ एस जीविदप्पदो पुण्डरीअलोअणो? (ख)।

बुद्ध। जइ दैव्वमणुऊलं भविस्सदित्ति। (ग)

[पुरुषेण निष्क्रान्ते।]

माध। [अपवार्य्य।]

चिरादायातस्तु स्फुटतु बिसिनीसूत्रभिदुरो,
महानाधिव्याधिर्निरवधिरिदानीं प्रसरतु।
प्रतिष्ठाव्याजं व्रजतु मयि पारिप्लवधुरा,
विधि: साम्यं वस्तां, भवतु कृतकृत्यश्च मदन:॥ (३)

अथवा। समागम्य मार्गं जनमसुलभं प्रार्थितवतो,
विधौ वामारम्भे मम समुचितैषा परिणति:।

(ख) सखि बुद्धरक्षिते! अपि पुनरपि दृश्यते एष जीवितप्रद: पुण्डरीकलोचन:।

(ग) यदि दैवमनुकूलं भविष्यति।

---

(३) चिरादिति। बिसिनीसूत्रभिदुरो पद्मिनीतन्तुवत्भिदुर: भेदनस्वभाव: चिरात्बहुदिनपर्यन्तं सञ्चित इत्यर्थ:। आयातस्तु मानसोत्तापस्त्वायास: स्फुटतु भिद्यताम्। इदानीम् अधुनैव महान् विपुल: आधिव्याधि: मनोव्यथारूपरोग: निरवधि: अपरिच्छिन्न: सन् प्रसरतु प्रकाशरूपेण वर्त्ततु। पारिप्लवधुरा चाञ्चल्यवत्ता मयि अस्माकं समागमेन प्रतिष्ठामाधिपत्यं व्रजतु प्राप्नोतु। विधिर्विधाता साम्यं विश्रामं वस्तां कुरुताम्। मदनश्च कृतकृत्य: कृतार्थो भवतु। एतत् सर्वं दु:खकरमपि मया तत् सोढुं शक्यते इति माधवाभिप्राय:। अथवा एतदुत्तरश्लोके अविहायापरिहार्यविवेकैकपक्ष: इत्यत एव सर्वत्र प्रार्थनायां सोढ्।

तथाप्यस्मिन् दानश्वसनसमयेऽस्याः प्रविगल-
त्प्रभं प्रातश्चन्द्रद्युति वदनमन्तर्दहति माम् ॥ (४)

काम। [स्वगतम्।] एवमतिदुर्मनायमानः पीडयति मां वत्सो माधवो, वत्सा मालती च। दुष्करं निराशा प्राचिति। [प्रकाशम्।] पृच्छामि तावदायुष्मन्तं, अपि भवान् अमंस्त यथा भूरिवसुरेव मालतीमस्मभ्यं दास्यति ?।

माध। [सलज्जम्।] नहि नहि।

काम। न तर्हि प्रागवस्थाया: परिहीयसे ?

मक। भगवति ! दत्तपूर्वेत्याशङ्क्यते।

काम। जानासि तां खलु वार्त्तां, इदन्तु प्रसिद्धमेव, यथा नन्दनाय मालतीं प्रार्थयमानं भूरिवसुं पतिमुक्तवान्, प्रभवति निजस्य कन्यकाजनस्य महाराज इति।

मक। अस्त्येतत्।

काम। अस्य च स्वयं राज्ञैव दत्ता मालतीति पुरुषेण्या-वेदितं, तद्वत्स ! श्रुतिप्रतिष्ठानिबन्धनानि देहिनां व्यवहार-मन्त्राणि, वाचि पुण्यापुण्यहेतवो व्यवस्थिता:, सर्वस्य वचना-नामायत्तं, सा च भूरिवसोर्वागनृतान्तिकैव, न खलु महा-

(४) विधाविति। विधौ अदृष्टे वामाचरणे प्रतिकूले सति अनुकूलं दुर्लभं र्लभं समागमनमात्रं सुखप्रेमिणं प्रार्थितवती याचमानस्य मम एषा इति कथेन पदेषु:। परिवर्तितः दृष्ट्यापरिवर्तनं मनुचिता युक्तैव। तथापि ताहृशदशा-कालेऽपि अस्मिन् दानश्वसनसमये अपरस्मै दानश्वसनकाले अस्याः स्त्रियाः प्रवि-गलत्प्रभं दीप्तिशून्यं प्रातश्चन्द्रद्युति प्रभातकालीनचन्द्रप्रभातुल्यकान्ति वदनं मुखं मामन्तर्दहति अन्तस्तापयति एतदेवैकं वैवशमस्य ज्ञातमिदं:। वाह्यो दर्शनमात्रमेव अनुचिता, ततो विधौ तु प्रतिकूले अनुचिततरः दुर्लभजनप्रार्थ-ति भावः।

राजस्य मालती निजा कन्यका, कन्याप्रदाने च नृपतयः प्रमाणमिति नैवंविधो धर्माचारसमयः, तस्मादिदमचिन्तनीय-मेतत्। अथवा, वत्स! माम् अनवधानां मन्यसे। पश्य।

मा वा सपत्नेष्वपि नाम तद्भूत् पापं यदस्यां नु मया विचिन्त्यम्।
तत्सर्वथा सङ्गमनाय यत्नः प्राणव्ययेनापि मया विधेयः ॥ (५)

मक। साधु युज्यमानमादिश्यते युष्माभिः।

अपि च। दया वा, स्नेहो वा, भगवति! निजेऽस्मिन् शिशुजने
भवत्याः संसाराद्विरतमपि चित्तं द्रवयति।
अतश्च प्रव्रज्यासमयसुलभाचारविमुखः,
प्रसक्तस्ते यत्नः प्रभवति पुनर्दैवमपरम् ॥ (६)

---

(५) मेति। नु भोः! अस्यां मालत्यां यत् पापं अनिष्टम् विवाहानिर्वाहे मरणरूपम् मया विचिन्त्यम् आशङ्क्यम्। तदनिष्टं सपत्नेषु शत्रुषु अपि किं पुनस्ता-दृशजनानुभावानाम् इत्यर्थः। माभूत् न भवतु। तत् तस्मात् सर्वथा सर्वप्रकारेण सङ्गमनाय परस्परसङ्घटनाय मया प्राणव्ययेनापि प्राणत्यागेनापि किं पुनः सामान्यधनसाध्यव्यापारविशेषैरित्यर्थः। यत्नो विधेयः कार्य्यः। अत्र कैमुतिकन्यायेन तादृशार्थापत्त्या अर्थापत्तिरलङ्कारः।

(६) दयेति। हे भगवति! निजे आत्मीये अस्मिन् शिशुजने बालके माधवे मालत्यां च दया करुणा वा स्नेहो वात्सल्यं वा संसाराद्विरतमपि संसारस्थ-विषयवर्गव्यापाराद्विरतमपि तत्त्वज्ञानरतमपीत्यर्थः। भवत्याश्चित्तं द्रवयति आर्द्री-करोति विषयाकृष्टं करोतीत्यर्थः। अतः कारणात् प्रव्रज्यासमयसुलभाचार-विमुखः प्रव्रज्यासमये संन्यासाश्रमकाले सुलभो य आचारः शौचादिकं तस्मा-दपि वा संन्यासाश्रमे आचारबाहुल्यसत्त्वादिति भावः। तस्माद्विमुखः त्यक्तः ते तव यत्नः प्रसक्तः परिपक्वः सन् प्रभवति। एवं कृते कार्यसिद्धिः अवश्यमेव भविष्यति। अथवा यत्नात् यदि कार्यसिद्धिर्न भविष्यति तदा दैवमेव अत्र कारणम् इत्याशयेनाह। पुनः पश्चादपि अपरं दैवमेव प्रभवति। दैवाधीनं सर्वं कार्यमिति भावः।

[नेपथ्ये ।] भअवदि कामन्दइ ! एसा महिणी विण्णवेदि. जधा मालदीं घेत्तुअ तुरिदमाअच्छदुत्ति (प) ।

काम । वत्से ! उत्तिष्ठ । [सर्वे उत्तिष्ठन्ति ।]

[मालतीमाधवौ सकरुणानुरागमन्योन्यमवलोकयतः ।]

माध । [स्वगतम् ।] कष्टमेतावती लोकयात्रा मालत्या समं माधवस्य, अहो नु खलु भोः ।

सुहृदिव प्रकटय्य सुखप्रदः प्रथममेकरसामनुकूलताम् ।
पुनरकाण्डविवर्तनदारुणो विधिरहो विशिनष्टि मनोरुजम् ॥७॥

माल । [स्वगतम् ।] महाभाअ ! लोअणाणन्द ! एत्तिअं दिट्ठोसि । (फ)

लव । हद्धी ! हद्धी ! सरीरसंसयं जेव्व णो पिअसही आरोविदा अमच्चेण (ब) ।

माल । [स्वगतम्] परिणदं दाणीं मे जीविदत्तिण्हाए फलम् ।

(प) भगवति कामन्दकि ! एषा महिषी विज्ञापयति यथा मालतीं गृहीत्वा त्वरितमागच्छतु इति ।

(फ) महाभाग लोचनानन्द ! एतावद्दृष्टोऽसि ।

(ब) हा धिक् हा धिक् शरीरसंशयमेव नः प्रियसखी आरोपिता अमात्येन ।

---

(७) प्रथमम् आदौ एकरसां निरन्तरां अनुकूलतां आनुकूल्यं सुहृदिव बन्धुः इव प्रकटय्य प्रकाश्य सुखप्रदः सुखदाता अहो ! आश्चर्यम् विधिः पुनः पश्चात् अकाण्डे अकस्मात् वहिर्विवर्तनं दशापरिवर्तनं अनीतिरिव: तेन दारुणः कठिनः सन् मनसः चित्तस्य रुजम् व्यथां विशिनष्टि प्रकटीकरोति भगवतोऽर्थः ।

[आकाशम्।] णिव्वूढं च णिअवअदाए तादस्सवि कावालि-अत्तणं, पडिट्ठिदो दुद्दैवस्स दारुणसमारम्भसरिसो परिणामो, तं एत्थ उब्बन्धामि मन्दभाइणी, तं वा असरणा सरणं पडिवज्जामि (अ)।

लव। सहि हदो हदो (ब) [इति निष्क्रामन्ति।]

माध। [स्वगतम्।] नूनमाश्वासनमात्रमेवैतत् माधवस्य मदनस्नेहकातरा करोति भगवती। [सोद्वेगम्।] हन्त सर्वथा संशयितजन्मसाफल्यः संवृत्तोऽस्मि, तत्किमिदानीं कर्त्तव्यम्।

[विचिन्त्य।] न खलु महामांसविक्रयादन्यदुपायान्तरं पश्यामि। [प्रकाशम्।] वयस्य! मकरन्द! अपि भवान् उत्कण्ठते मदयन्तिकायाः?

मक। अथ किम्।

तस्यां मनः क्षिपति यः स्मरसंप्रहार-
मालोक्य मामगणितस्खलदुत्तरीया।

(अ) परित्यजामीदानीं मे जीवितहताशायाः फलम्। निर्व्यूढं च निजवयस्या तातस्यापि कापालिकत्वम्। प्रतिष्ठितो दुर्दैवस्य दारुणसमारम्भसदृशः परिणामः। तदिहैवात्मानं उद्बध्नामि मन्दभागिनी त्वं वा अशरणा शरणं प्रतिपद्ये।

(ब) सखि! हत हतः।

---

(८) तस्यामिति। स्मरसंप्रहारं भूतनाथानयुक्तं माम् आलोक्य दृष्ट्वा, अत एवाऽगणितस्खलदुत्तरीया स्खलदुत्तरीयमगणितं यया सा मकरन्दनयन-वसी मदयन्तिका इति यावत्। तथा सशैलशावकतुरङ्गविलोलदृष्टिः तस्या आद्र्-नादिवर्षमाद्रयीतस्य एकदाऽऽननस्य एकसंवत्सरस्य एकवर्षपरिमितायुःशावके-

अस्तैकहायनकुरङ्गविलोलदृष्टि-

राश्लिष्टवत्यमृतसंवलितैरिवाङ्गैः ॥ (८)

माध। सुलभैव दुरक्षिता प्रियसखी भवतः।

अपिच। प्रमथ्य क्रव्यादं मरणसमये रक्षितवतः

परिष्वङ्गं लब्ध्वा तव, कथमिवान्यत्र रमताम्।

तथा च व्यापारः कमलनयनाया नयनयो-

स्त्वयि व्यस्तस्नेहस्तिमितरमणीयश्चिरमभूत् ॥ (९)

मक। तदुत्तिष्ठ पारासिन्धुसम्भेदमवगाह्य, (य) नगरीमेव प्रविशावः। [उत्थाय। परिक्रामतः।]

(य) पारा च सिन्धुश्च ते नद्यौ तयोः सम्भेदः सङ्गमः। अवगाह्य विलोड्य। स्नात्वेति यावत्। श्रमशान्तिहेतुतया मङ्गलाचारहेतुतया च स्नानम्।

अर्थः। कुरङ्गस्य कुरङ्गशावकस्येत्यर्थः। विलोले चपले दृष्टी इव दृष्टी नेत्रे यस्याः सा सती चादौ नवीन चपलं तत एकहायनस्य चपलतरत्वमित्यर्थः। अमृतसंवलितैः अमृतसिक्तैरिव अङ्गैः अवयवैर्मां आश्लिष्टवती आलिङ्गितवतीत्यनु-मेया॥ एतेन तस्या मय्यनुरागातिशयसूचनात् मनोमुग्धता तव युक्तैव तत् तस्मात् मे मम मनः चिपति चपलं करोतीत्यर्थः। अन्यथा कथमिताहक् कट-मित्यर्थः।

(९) प्रमथ्येति। क्रव्यं मांसमत्तीति क्रव्यादं व्याघ्रं प्रमथ्य विनाश्य मरण-समये मृत्युकाले रक्षितवतो रक्षितुस्तव परिष्वङ्गं आलिङ्गनं लब्ध्वा आलिङ्गनजन्य-सुखमनुभूयेत्यर्थः। कथमिवातिशङ्के च अन्यत्र अपरत्र कुत्र रमतां नैव तादृशी अनुरागिणी एकवारमप्यन्यमालिङ्गनमर्हतीति भावः। आलिङ्गनमात्रमेव न, अनुरागव्यञ्जनमप्यासीदित्याह तथा चेति। कमलनयनायाः पद्माक्ष्या नयनयोर्व्या-पारः कटाक्षविक्षेपादिः त्वयि व्यस्तस्नेहस्तिमितरमणीयः व्यस्तः न्यस्तः स्नेहो यत्र तथा स्तिमितः निश्चलः अतएव रमणीयः सुन्दरः चिरमतिकालपर्यन्तं अभूत् जातः। एवंविधेन नयनव्यापारेण एकरसानुरागद्योतनं जायते। मदयन्तिका-लाभिलाषम् आलोकितोऽपि इति भावः।

माध। अयमसौ महानद्योः सम्भेदः य एषः (१)।

अलनिर्विच्छितवस्त्राञ्चलनिर्वीयताभिः
परिमततटभूमिः स्नानमात्रोत्थिताभिः।
रुचिरघनकुचश्रीमदाभोगतुङ्ग-
स्तनविनिहितहस्तस्वस्तिकाभिर्वधूभिः॥ (१०

[इति निष्क्रान्ताः सर्वे।]

चतुर्थोऽङ्कः समाप्तः।

---

(१) सम्भेदः सङ्गमः।

---

(१०) अलेति। स्नानमात्रोत्थिताभिः स्नानं कृत्वा उत्थिताभिरत एव अल-निर्विच्छिन्नवस्त्राञ्चलनिर्वीयताभिः अलेन निर्विच्छितं विशिष्टमित्यर्थः यत् वस्त्रं तेन अञ्चलं चर्चितं नितम्बतटस्य स्पष्टमितिशेषः। यासां, ताभिः। रुचिरघनकुच-श्रीमदाभोगतुङ्गस्तनविनिहित हस्तस्वस्तिकाभिः, रुचिरा मनोहराः घनकुचा निरन्तरं घनाः यासां ताः, याश्च श्रीमन्तो दृश्याभोगाः अर्थेषि यत्। उपभो-ग्यायां दृश्यः पीनत्वः सुकुमाराकारा ये तुङ्गा उन्नतपीवराः स्तना तेषु विनि-हिता अर्पिता हस्ता एव स्वस्तिका यासां ताभिर्वेति सामानाधिकरण्यसमासः। अथवा रुचिरैत्यादिस्तनविशेषणं पौनरुक्त्यनिरासः। वधूभिर्नारीभिः परिमततट-भूमिः स्नानतीरभूभाग इत्यर्थः। सम्भेदो भवतीति पूर्वेण सम्बन्धः। नाम्नैव स्नानोपरकार्यं वर्णे कथसमादाय बाहं यसना स्नानमायामीति प्रसिद्धिः। अत्र उपमादयश्च परस्परमेकसम्बन्धप्रतीतिहेतुत्वेन तथा च ईतौ रसवत्वेन पदार्थ-हेतुकमलङ्कार इत्यनयो रसाभिप्रायः।

पञ्चमोऽङ्कः ।

[ततः प्रविशति आकाशयानेन औद्धत्यवेषा कपालकुण्डला ।]

कपा । षडधिकदशनाडीचक्रमध्यस्थितात्मा,
हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः ।
अविचलितमनोभिः साधकैर्मृग्यमाणः,
स जयति परिणद्धः शक्तिभिः शक्तिनाथः ॥ (१)

इयमहम् इदानीम्
नित्यं न्यस्तषडङ्गचक्रनिहितं हृत्पद्ममध्योदितम्,
पश्यन्ती शिवरूपिणं लयवशादात्मानमभ्यागता ।
नाडीनामुदयक्रमेण जगतः पञ्चामृताकर्षणा-
दप्राप्तोत्पतनश्रमा विघटयन्त्यग्रे नभोऽम्भोमुचः ॥ (२)

---

(१) षडिति । षडधिकदशनाडीचक्रमध्यस्थितात्मा षडधिका या दशनाडी षोडशसंख्यकेत्यर्थः । वर्णनातिरिक्तफलतामुन्मध्यस्थिता षट्संख्यका नाड्यः । दशनाडीचक्रं यथा । इडा पिङ्गला सुषुम्णा गान्धारी हस्तिजिह्वा पूषा यशस्विनी अलम्बुषा-कुहूशङ्खिन्यः । तैव चक्रं चक्राकारेण परिणममानमित्यर्थः । तस्य मध्ये स्थित आत्मा स्वरूपं यस्य सः । तथा तद्विदां तादृशात्मवेदिनामित्यर्थः । हृदि विनिहितरूपः आत्मज्ञानी हृदयेऽवस्थित इत्यर्थः । यः सिद्धिदः जयति । अविचलितं विषयान्तराक्रष्टं मनो येषां तैः साधकैर्योगिभिर्मृग्यमाणः अन्विष्यमाणः । तथा शक्तिभिः ब्राह्म्याद्यष्टसंख्यकाभिः परिणद्धो व्याप्तः सन् स शक्तिनाथः शिवः जयति सर्वोत्कर्षेण वर्तते । यद्वा शक्तिभिः अणिमाद्यष्टशक्तिकाभिः परिणद्धः रूपितः; शक्तीनाम् अणिमादीनां नाथः प्रभुः जयति । ब्राह्मी माहेश्वरी कौमारी वैष्णवी-वाराही माहेन्द्री चामुण्डा चण्डिका इत्यष्टमातरः ।

(२) नित्यमिति । न्यस्तषडङ्गचक्रनिहितं न्यस्तानि अङ्गन्यासक्रमेण अर्पितानि यानि षडङ्गानि हृदयशिरःशिखाकवचनेत्रास्त्राणि तेषां चक्रे समुदाये निहितम् आरोपितं हृत्पद्ममध्योदितं हृदयपुण्डरीकान्तर्वर्तिनमित्यर्थः । शिवरूपिणं शिवात्मकं पश्यन्ती अन्तरिन्द्रियेण ज्ञात्वा अनन्तरं लयवशात् आत्मना सह तादात्म्यभावमापन्ना-

अपि च। उल्लोल-स्खलित-कपाल-कण्ठमाला-
सङ्घट्ट-क्वणित-कराल-किङ्किणीकः।
पर्य्याप्तं मयि रमणीयडामरत्वम्,
सन्धत्ते गगनतलप्रयाणवेगः ॥ (३)

तथाहि।
विष्वग्वृत्तिर्जटानां प्रचलति निविडग्रन्थिनद्धोऽपि भारः,
संस्कारश्लाघदीर्घं पटु रटति कलाहस्तिखट्वाङ्गघण्टा।

भावात् तद्गतचित्ततेत्यर्थः: आत्मानं आत्मस्वरूपं अध्यात्मता विषयध्यानस्यात्मज्ञान-नाशकत्वादिति भावः। नाडीनामिडापिङ्गलादीनां उदयक्रमेण वायुपूरणरीत्या अतः पाञ्चभौतिकशरीरस्य पञ्चात्मताकर्षणात् पञ्चभूतानां पृथिव्यप्तेजोवाय्वाका-शानां यदाकर्षणं तस्मात् अपार्थोऽपि ननु मा अवश्याकाशयानक्षमा तथा च पुरीभावी नभोऽभिमुखः आकाशसम्बन्धात् विघटयन्तौ विधाकुर्वन्तीति यावत्। अवगम्यत इत्यर्थः।

(३) उल्लोलेति। उल्लोलायाश्चलाया वेगवशादित्यर्थः। अतएव स्खलि-ताया भ्रष्टाया कपालकण्ठमालाया नृकपालरूपमाल्य इत्यर्थः। सङ्घट्टेन परि-मर्देन क्वणिता मुखरा शब्दायमानेति यावत्। कराला भीषणा किङ्किणी क्षुद्र-घण्टिका यस्मात् ईदृशो वा। तत्र कणितस्य कर्मणि क्तः। अपरत्र तारकादि-त्वादितच्प्रत्यय इति भेदः। गगनतलप्रयाणवेगः आकाशेऽप्यनन्तगमनवेगो कर्त्ता। मयि रमणीयडामरत्वं भीषणत्वं एकत्र कपालिनामत्र कपालकुण्डलेन रमणीयत्वमित्यर्थः। पर्य्याप्तं निकामं सन्धत्ते जनयति। अत्रैकस्य कपालस्य पतन-स्खलनाभ्यां विभावनाविशेषोक्त्यलङ्कारद्वयं व्यज्यते। कपालरूपकारणाभावेऽपि भीषणत्वरूपकार्य्योत्पत्त्या विभावना तस्य च सत्त्वेऽपि भीषणत्वरूपकार्य्यानुत्पत्त्या विशेषोक्तिः। तथालङ्कारद्वयं कपालकण्ठमालेतिरूपकेण संसृज्यते इत्यलङ्कार-त्रयस्य संसृष्टिः।

(४) विष्वगिति। निविडग्रन्थिनद्धोऽपि घनग्रन्थियुक्तोऽपि विष्वग्वृत्तिर्वात-वेगात् सर्वतश्चलनशीलः जटानां भारः जटाकलापः प्रचलति, कलाहस्ति-खट्वाङ्गघण्टा वारंवारं चलनात्मकः खट्वाङ्गस्य चापमिदस्य घण्टा संस्कारेण मार्जनादिविशुद्धिना वेगाख्यसंस्कारेण वा। यः श्लाघः श्लाघः तेन दीर्घमविच्छिन्नं

ऊर्ध्वं धूनोति वायुर्विततशवशिरःशेखरकूटेषु गुञ्ज-
न्स्रुतास्रः किङ्किणीनामनवरतरणत्कारहेतुः पताकाम्॥ (४)

[परिक्रम्यावलोक्य च गन्धमाघ्राय।] इदं तावत्पुराण-निम्बतैलाक्तपरिभुज्यमानरमोन्मत्ताग्निभिश्चिताधूमैः पुरस्ताद्विभावितस्य महतः श्मशानवाटस्य नेदीयः करालायतनं, यत्र पर्यवसितमन्त्रसाधनस्य चक्रगुरोरघोरघण्टस्याज्ञया सविशेषमद्य पूजासम्भारो मया सन्निधापनीयः, कथितञ्च मे गुरुणा, वत्से कपालकुण्डले! अद्य मया भगवत्याः करालायाः प्रागुपयाचितं स्त्रीरत्नमुपहर्तव्यम्। तदत्रैव नगरे विदितमास्त इति तद्विचिनोमि। [सकौतुकमग्रेऽवलोक्य।] तत्कोऽयमतिगम्भीरमधुराकृतिः श्लक्ष्णस्निग्धकुटिलकुन्तलः, कृपाणपाणिः श्मशानवाटमवतरति? य एषः। (५)

पटु च तीव्रं यथा भवति तथा रटति शब्दायते। तथा स्रुतास्रः क्षरदस्रः किङ्किणीनां क्षुद्रघण्टिकाविशेषाणाम् अनवरतरणत्कारहेतुर्निरन्तरनिनादकारणं चलदेव विततानि स्फीतीकृतानि बहुलानीत्यर्थः, यानि शवशिरांसि मृतमस्तकानि तेषां शेखर एव कूटानि लताच्छादितवनविभागास्तेषु गुञ्जन् रवं कुर्वन् वायुः पवनः पताकां ध्वजपटलध्वजं ऊर्ध्वं धूनोति कम्पयति वायुवेगवशेनोर्ध्वभागे पताका कम्पते इति यावत्। अत्र शवशिरःशेखरां तत् साहचर्यादिपातित्वदर्शनात् सा वीभत्सता व्यज्यते।

(५) पुराणमतिजीर्णं यन्निम्बतैलं तेनाक्तानां मर्दितानां परिदह्यमानानां मानवीकृतानां शवितानामिति यावत्। शवानां रसः देहस्थवसादिः तेन ऊनो हीनः निकट इति यावत्। अथवा मज्जमार्गं यद्दहनं यद्दग्धं तत्र यत्र इव गन्धो यत्र विद्यते तैलदग्धैरेव गन्धशब्दादुत्तरे मत्वर्थीय इनिप्रत्ययः। यस्मिन् शेरते मृताः इति वाटः। स्वगृहाङ्ग इति वाटः पथी मार्ग इति मातृका। नेदीयो निकटम्। पर्यवसितं समाप्तं मन्त्रसाधनं पुरश्चरणादि यस्य। सम्भारः समूहः। उपयाचितं मनौतिकार्थं स्वीकृतम्। अभीष्टे तु दैवेभ्यो मनोरथस्य सिद्धये। उपयाचितकं तत्तु दोहदं सम्प्रचक्षते इति हारावली। स्त्रीरत्नमिति। जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षते इति

कुवलयदलश्यामोऽप्यङ्गं दधत्परिधूसरम्,
ललितचरणन्यासः श्रीमान्मृगाङ्कनिभाननः।
हरति विनयं वामो यस्य प्रकाशितसाहसः
प्रविगलदसृक्पङ्कः पाणिर्ललन्नरजाङ्गलः ॥ (६)

[निरूप्य।] अये! स एष कामन्दकीसुहृत्पुत्रो महामांसस्य पणयिता माधवः। तत्किमनेन, भवतु समीहितं सम्पादयामि विगलितप्रायश्च पश्चिमसन्ध्यासमयः।

तथाहि सम्प्रति।

ज्योत्स्नालिप्तापिच्छगुच्छावलिभिरिव तमोवल्लरीभिर्व्रियन्ते
पर्यन्ताः प्रान्तवृत्त्या पयसि वसुमती नूतने मज्जतीव।

विन्दः। विदितमुपलक्षम्। विचितमिति पाठेऽप्येवम्। गम्भीरेत्यादि। विकाराः सहजा यस्य हर्षक्रोधभयादिषु। भावेषु नोपलभ्यन्ते तद्गाम्भीर्यमुदाहृतम् ॥ इति। अभ्यासात् करणानां तु श्लिष्टत्वमुपजायते। महत्स्वपि विकारेषु तन्माधुर्यमुदाहृतम् ॥ इति भरतः। जटाग्रन्थिनी जटाकारेण बद्धः कुटिलो वक्रः कुन्तलः केशो यस्य सः। एतेन रौद्ररसवत्तोक्ता।

(६) कुवलयेति। कुवलयदलश्यामः नीलकमलदलस्निग्धश्यामोऽपि परिधूसरं धूसरवर्णं अङ्गं दधत् दधानः। धूलिकादौ पतनात् धूसरत्वम्। ललितः सुन्दरः चरणन्यासः पादक्षेपः यस्य सः। श्रीमान् सुन्दरः मृगाङ्कनिभाननः चन्द्राननः। ललत् चपलं नरजाङ्गलं महामांसं यत्र सः तथा प्रविगलदसृक्पङ्कः। प्रविगलन्ति क्षरितानि असृञ्जि रक्तानि पङ्कानि इव यस्मात् स चन्दनरुधिरपङ्किल इति यावत् अतएव प्रकाशितसाहसः व्यक्तीकृतसाहसः यस्य माधवस्य वामः सव्येतरः प्रतिकूलश्च पाणिः करः विनयं माधवनिष्ठस्वाभाविकविनयगुणं हरति नाशयति। एतादृशकर्मदर्शने भीतिरिव जायते सुतरां विनयशालित्वं नास्ति इत्यस्येति भावः। अत्र सुन्दरोऽप्यसुन्दर इत्यादार्थमहावादबोधात्विरोधालङ्कारः।

(७) ज्योत्स्न इति। ज्योत्स्नः पर्यन्ताः आकाशसीमानः तापिच्छानां तमाल-वृक्षाणां गुच्छावलिभिर्वल्लरीभिरिव न तु तद्रूपैः तदपेक्षया निबिडान्धकारत्वमन्ध-कारस्येति भावः। तमोवल्लरीभिस्तमःपटलैर्व्रियन्ते कर्मणि लट्। पयस्यर्थ

वात्यासंवेगविष्वग्विततवलयितस्फीतधूम्याप्रकाशम्
प्रारम्भेऽपि त्रियामा तरुणयति निजं नीलिमानं वनेषु ॥७

परिक्रम्य निष्क्रान्ता विष्कम्भकः ।

ततः प्रविशति यथानिर्दिष्टो माधवः ।

माधव । [साशंसम् ।]

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणात्
आशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रोदयः ॥ (८)

ुमनी पृथिवी म्लानच्छाया। म्लानप्रकाशरहिता सदृशी कृतेव। मध्यमानेऽपि ऽधूमसङ्घात् ततोयुर्नेति यत् नीलवर्णेन इत्यादि कैयटादयः। नूतनं वयः- ऽस्ति यस्मिन् अतं गच्छतीव निरूपय। त्रियामा रजनी प्रारम्भेऽपि प्रदोषकाले थमपौरुषे:। वात्याया: संवेगेन विष्वक् समन्तात् वितता विस्तारिता लयिता वलयाकारा स्फीता महती या धूम्या धूमसमूहो नीहारो वा तद्दर्श अप्रकाशं प्रकाशरहितं वैशारोर्त्कृतमिति यावत्। तेन: धूम्या- व अन्धकारं वदन्ति नैयायिका:। निजं स्वीयं नीलिमानं नीलत्वं पुष्पा- त्यादिमनिन्तरणस्य इतीमनिच् प्रत्यय:। वनेषु तरुणयति नाऽऽ करोति वर्णवत्त्वदर्शनात् स्वार्थे णिच्प्रत्ययो जायत इति भ्रान्तिमदलङ्कार:।

(८) प्रेमार्द्रा इति। प्रेमार्द्रा: प्रेमसहिता अतएव प्रणयस्पृश: अनुराग- ज: परिचयात् परिचयजनितविश्वासात् उद्गाढरागोदया उद्गाढानुराग- ढ़ाया ता: पूर्वकृता इत्यर्थ:। निसर्गमधुरा: स्वभावसुन्दरा मुग्धदृशो मालत्या: टा भावहावादय: मयि भवेयु: इत्याशंसा। आशंसया मनोरथेन परिकल्पि- सु भावितास्वपि यासु चेष्टासु अन्त:करणस्य अन्तरिन्द्रियस्य बाह्यकरणव्यापार- धी बाह्येन्द्रियव्यापारनिरोधक: आनन्दसान्द्रोदय: सान्द्रो गाढोदय आनन्द: संचारेऽपि उभयत्रापि प्राङ्निपातमलक्षणात् आनन्दस्य तथात्वं वैलक्षण्यमाप- ति भाव:। तदोदय: प्रकाश: क्षणाद् भवति। तदुक्तप्रयत्ना मालती- संचारेऽपि प्रवृत्ति इतोऽन्यत् न किमप्यस्तीति भाव:। अत्र पूर्णेन्दुमुखपेटादि- रचनात् काव्यालङ्कार:।

किञ्च। अतिमुक्तमदग्रथितकेशरावली-
सततधिवाससुभगार्पितस्तनम्।
अपि कर्णलग्नविनिवेशिताननः
प्रियया तदङ्गपरिवृत्तमाप्नुयाम्॥ (९)

अथवा। दूरे तावदेतत् इदमेव प्रार्थये।

सन्त्येव सुखानि चेतसि परं भूमानमातन्वते,
यत्रालोकपथावतारिणि रतिं प्रस्तौति नेत्रोत्सवः।
यद् बालेन्दुकलोच्चयादवचितैः सारैरिवोत्पादितम्,
तत्पश्येयमनङ्गमङ्गलगृहं भूयोऽपि तस्या मुखम्॥ (१०)

यत्सत्यमधुना तत्सन्दर्शनेनातिस्वल्पोऽपि न विशेषः।

---

(९) अतीति। अतिमुक्ताया लताया मुक्तारहितायाश्च मदग्रथिताया उभ-यत्र सम्यग् निर्मितायाः केशरावल्या हारभेदस्य मालायाश्च यः सततमधिवासः देह नियतावस्थानं अन्यत्र यः गाढ़परिमलः तेन सुभगं यथा भवति तथा उभयत्रैव रमणीयमित्यर्थः। अर्पितस्तनं न्यस्तकुचं तस्याः अङ्गपरिवृत्तं अङ्गस्य परिवर्त्तनं एकत्र कालोक्तादिनाऽन्यत्र पार्श्वपरिवर्त्तनं अहं कर्णमाङ्गे कर्णमूले विनिवेशिताननः न्यस्त-मुखः सन् प्रियया सह आप्नुयां लभेयं ममापि तद् भवतु इत्यर्थः। प्रियाकर्ण-मूले मुखं न्यस्य तदङ्गपरिवर्त्तनजन्यसुखदुःखोभयविधाकारमस्फुटरसं अनुभविष्या-मीति भावः।

(१०) सन्त्येवेति। सुखानि अन्यान्यपि सन्त्येव किन्त्विव चेतसि मदन्तःकरणे परं भूमानं अतिशयाधिक्यं परिमितिराहित्यं वा आतन्वते कुर्वन्ति। मनसि महान् सुखोदयो जायते इत्यर्थः। यत्र जने मालतीरूपे आलोकपथावतारिणि दर्शनपथं वर्त्तमाने दृष्टे इति यावत् नेत्रोत्सवः तद्दर्शनजन्यनयनचरितं रतिमनु-रागं प्रस्तौति आचरति। बालेन्दुकलोच्चयात् नवविधुकलासमूहादिवेत्युत्प्रेक्षा, एतेन मालत्याः सर्वाङ्गीनसौन्दर्यमुक्तम्। अवचितैः संचितैः सारैः सारांशैः उत्पादितं विरचितमिव अनङ्गमङ्गलगृहं मदनमनोहरावासगृहमिव स्थित-मित्यर्थः। यत् तस्याः प्रेयस्या मुखं तत् पश्यन् द्रक्ष्यामीत्याशया।

मम हि सम्प्रति सातिशयप्रागल्भ्योपलब्धभावितात्मजन्मनः संस्कारस्यानवरतप्रबोधात्प्रतायमानस्तद्विसदृशप्रत्ययान्तरैः अतिरस्कृतप्रवाहः, प्रियतमास्मृतिप्रत्ययोत्पत्तिसन्तानः तन्मयमिव करोति वृत्तिसारूप्यतश्चैतन्यम् । * तथाहि ।

लीनेव प्रतिबिम्बितेव, लिखितेवोत्कीर्णरूपेव च,
प्रत्युप्तेव च, वज्रलेपघटितेवान्तर्निखातेव च ।
सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभि-
श्चिन्तासन्ततितन्तुजालनिबिडस्यूतेव लग्ना प्रिया ॥ (११)

[नेपथ्ये कलकलः ।]

---

* आत्मनस्तन्मयत्वमाह । मम हीति । आत्मजन्मः प्रियाविषयक-ज्ञानोत्पत्तेः सन्तानः प्रियतमास्मृतिरूप एव मम चैतन्यमात्मानं तन्मयमिव करोति आत्मानमेव करोतीत्यर्थः । कीदृशः । प्रतायमानो दीर्घीभवन् । अत्र हेतुः । संस्कारस्य भावनाया अतिशयितप्रबोधादुद्बोधात् । कीदृशस्य संस्कारस्य । सातिशयात्प्रागल्भ्यात् स्फुटाकाराद्वा वकुलवीथ्यां पूर्वकालानुभवाज्जन्म यस्य । प्रतायमानत्वमेवोपपादयति । तद्विसदृशैर्मालतीविलक्षणविषयैर्ज्ञानान्तरैः अतिर-स्कृतप्रवृत्तिः । तथा चान्तरा विषयान्तरास्फुरणाच्च प्रवाहस्तिरस्कार इति भावः । आत्मतत्त्वस्य पुष्करपलाशवन्निर्लेपतया कथं मालतीमयत्वमत आह । वृत्ति-ति । अन्तःपदमिह बुद्धितत्त्वपरम् । तथाच बुद्धितत्त्वस्य या प्रवृत्तिः सदृश-वृत्तिर्व्यापारः सा यत आत्मतत्त्वे भेदाग्रहात् प्रतिभासते तस्मात् । सारूप्यकर्मणि ष्यञ्कृत्यात् । यद्वा । वृत्तिसारूप्यादिति भावप्रधानम् । तथा चान्तर्वृत्तिरूपज्ञान-स्यात्मरूपं साम्यं सादृश्यमात्मवृत्तित्वात् ।

(११) लीनेवेति । सा प्रिया मालती नोऽस्माकं चेतसि लीनेव प्रतिबिम्बि-तेव, लिखितेव मुद्रितेव उत्कीर्णरूपेव, उत्खचितेव, वज्रदारीतेव, प्रत्युप्तेव प्रोथि-तेव वज्रलेपेन घटितेव सम्पादितेव अन्तरन्तःकरणे निखातेव चेतोभुवः कामस्य पञ्चभिर्विशिखैर्बाणैः कीलितेव विद्धेव तथा चिन्तासन्ततिश्चिन्ताप्रवाहः, सैव तन्तु-जालं तन्तुसमूह उपादानकारणमित्यर्थः तेन निबिडं घनं यथा भवति तथा स्यूतेव रचितेव ।

माध। अहो! सम्प्रति प्रगल्भमानकौणपनिकायमहती श्मशानवाटस्य रौद्रता। अस्मिन् हि

पर्यन्तप्रतिरोधिमेदुरघनस्कन्धं चिताज्योतिषा-
मौज्ज्वल्यं परभागतः प्रकटयत्याभोगभीमं तमः।
संसक्ताकुलकेलयः किलकिलाकोलाहलैः सम्मदा-
दुत्तालाः कटपूतनाप्रभृतयः सांराविणं कुर्वते॥ (११)

भवतु आघोषयामि तावत्। भो! भोः श्मशाननिकेतनाः कट-पूतनाः!

अशस्त्रपूतमव्याजं पुरुषाङ्गोपकल्पितम्।
विक्रीयते महामांसं, गृह्यतां गृह्यतामिदम्॥ (१२)

[पुनर्नेपथ्ये कलकलः।]

माध। कथमाघोषणानन्तरमेव सर्वतः समुच्चलदुत्तालवेतालमुक्ततुमुलाव्यक्तकलकलाकुलः प्रचलित इवाविर्भवद्भूतसङ्कटः श्मशानवाटः। आश्चर्यम्!

---

(११) पर्यन्तेति। पर्यन्तप्रतिरोधिभिः सीमावरकैः मेदुरघनैः मांसलघनैः स्कन्धं कोषं चिताज्योतिषां चितानलानामौज्ज्वल्यं कर्तृ परभागतः गुणोत्कर्षात् आभोगभीमं आभोगेन दृष्ट्या भीमं करालं तमः कर्म प्रकटयति, तथा किलकिला-कोलाहलैः (किलकिलेत्यनुकरणशब्द) तद्रूपचीत्कारैः उत्ताला उत्कटा भीमा इत्यर्थः। संसक्ताकुलकेलयः सङ्गतचपलक्रीडाः कटपूतनाप्रभृतयः श्मशान-वासिप्रभृतयः सांराविणं सम्यक् भीषणशब्दं कुर्वते जनयन्ति।

(१२) अशस्त्रेति। अशस्त्रपूतं शस्त्रैरनाविद्धं अव्याजं सुन्दरं पुरुषाङ्गोप-कल्पितं पुरुषाङ्गेन सम्पादितं इदं महामांसं शुष्कमांसमित्यर्थः। मालतीमन्तरेण अशरीरधारणे फलाभावात् शुष्कमिति भावः। हैमं कृते तथा कांसि नरकस्थो न दीयते इत्यनुशासनादिति। विक्रीयते दीयते तद्गृह्यतां स्वीक्रियतां गृह्यतामित्यर्थः। इहापि … ब्राह्मणात् यदुपार्जितम्। अशस्त्रपूतं निर्व्याजमेतत् मांसं विदुर्बुधाः। इति परिभाषितमेव मांसं महामांसम्।

कर्णाभ्यर्णविदीर्णशुष्कविकटव्यादानदीप्ताग्निभि-
र्दंष्ट्राकोटिविसङ्कटैवित इतो धावद्भिराकीर्यते ।
विद्युत्पुञ्जनिकाशकेशनयनश्मश्रुज्वालैर्नभो,
लम्बालम्बविशुष्कदीर्घवपुषामुल्कामुखानां मुखैः ॥(१४)

अपि च * । एतत्पूतनचक्रमक्रमचलत्पादार्धभुग्नैर्हुहाम्
उत्प्लुत्य परितो नृमांसविघसैराघर्घरं क्रन्दतः ।

---

(१४) कर्णेत्यादि । उल्का ज्वाला मुखे येषां ते उल्कामुखाः प्रेतावभेदाः । तेषां मुखैर्नभ आकीर्यते व्याप्यते । यद्वा । उल्कामुखा एतन्नामकपिशाचा एव पिशाचिनो जनभेदाः । कीदृशैः । कर्णाभ्यर्णे कर्णसमीपे विदीर्णशुष्काणि विकटं करालं यद्व्यादानमास्यविकाशनं तेन दीप्तोऽग्निर्येषु तैः । दंष्ट्राणां कोटिभिरग्रैर्विसङ्कटैः सङ्कटैर्विकरालैर्वा । इतः इतः सर्वतो धावद्भिः । विद्युत्पुञ्जनिकाशानि तडित्पुञ्जतुल्यानि केशनयनश्मश्रुज्वालानि येषु तैः । पिङ्गलत्वात् केशादीनां विद्युत्तुल्यता । अतएवोल्कामुखः प्रेतावान्तो जनभेद इति पक्षः साधीयान् । लम्बालम्बानि अत्यन्तं लम्बमानानि विशुष्काणि दुर्बलानि दीर्घाणि वपूंषि येषां तेषाम् । एतेन दुर्दर्शत्वमुक्तम् । प्राप्तावस्थायां क्रन्दो पञ्चमः । केशेत्यादौ पूर्वनिपातविधेरनित्यत्वाद् मुखशब्दमपहाय केशशब्दस्य पूर्वनिपातः । बहुवचनं जाति-कारणात् । कर्मणि णिच् तङ्भित इत्यर्थः । शार्दूलविक्रीडितम् ।

* अपि चेति । अपिर्भूयप्रशंसायाम् । चः समुच्चये ।

(१५) गर्दाभाह । एतदित्यादि । एतत् पूतनचक्रं प्रेतानीकसमूहः परिकीर्यते । किं कुर्वत् । अक्रमचलता अक्रमेण युगपत्चलती यौ पादौ तयोरर्धं भूमौ निखातमर्धं उर्ध्वेन मुक्तम् एव स्थितम् । तत्र भुग्नपक्षितैर्वंशभुग्नैर्भुग्नमांसविघसैः भक्षितैः सर्वत्र इमाम् कीकाशादिककुहरादीनुत्प्लुत्य प्लुताम् कुर्वत् । आघर्घरं निपतद्रूपा । अभिक्षापातिशयात् । कीदृशाम् । बहलकणिका मांसखण्डात् आघर्घरमव्यक्तशब्दं यथा स्यादेवं क्रन्दतः क्रदतः । एतत् कृकु रिपु क टवेव । ईदृशं पूतनचक्रम् । स्थूलरङ्गुमदङ्गुष्ठा तत्प्रमाणा यष्टि यस्य तत् । एतेन अङ्गानां निर्मांसत्वं तथा गौरस्थूलश्लोमप्रमाणानि दर्शितानि । अस्थिता ज्वाला या यस्य तथा यष्टिः विषक् सर्वतः तता विस्तीर्णा याः सावर्णी यष्टि इति व्याख्या-

कर्णे रहुमदक्षगज-मसितलकूविष्णत-

कायुधनिधनाभिपच्छरजरलक्ष्णकमालोक्यते ॥ (१५)

[समन्तादवलोक्य विहस्य च *]

अहो प्रकारः पिशाचानां एते हि

ततपुरुरमनीयमाननगर्तं दधति विदार्य विवर्णदीर्घदंष्ट्राः ।

चलदजगरघोरकोटराणां श्रुतिमिव दग्धपुराणरोहिणानाम् ॥ (१६)

[परिक्रम्य ।] हन्त ! बीभत्समेवाग्रे † वर्तते ।

कालो वन्धिषु सन्धिभागेषु यानि हृदानि यथा पञ्चराणि येषां तादृशा अरण्यो जीर्णाः करालाः मांसादिशून्यास्थिभागा यस्य तत् । एकपदं समासादुपलक्षणपरम् । कीकस कंकालमस्थि इत्यमरः । यद्वा । कालाङ्गकाः कपिकोटनाम इति नाना-र्थेऽमरवर्णनादिनत्वेनैकदेशो दृकशब्दः । तेन भीमसेनादिवदस्यापि तावदर्थप्रति-पादकत्वमवधेयम् । यद्वा । दृको यौघ इति ख्यातः । विघसो भोजनशेषे-ऽपीत्यमरः । व्याघ्रदीराशिषु करालं इत्यमरः ।

* विहस्येति । यतिनाशितत्वेऽपि मयि भीषणत्वमनी पुनराः कुर्वन्तीम-मन्यार्थिकया हासः । यदाह । असम्बन्धेषु हासः स्यादासंप्रयुक्तिवादिभिः । इति । प्रकारो वैलक्षण्यम् ।

(१६) ततेत्यादि । एते पूर्वोक्तादयो पिशाचाः ततपुरुरमनीयम् आस्य-विवरं विस्तृतदीर्घनिम्नाभीषणं मुखविवरं विदार्य आदाय दग्धपुराणरोहिणाना-मिव श्रुतिं दधति धारयन्ति । दग्धत्वेन श्यामत्वं पुराणत्वेन जीर्णत्वं दर्शितम् । रोहिणो रोहण इति ख्यातस्तरुः । पीपरापि इति ख्यातो वा । रोहितोऽपि स एव । अतएव रोहितः प्रोहनाशक इत्यमरोऽपि । रोहणानामिति पाठे रोहणीति रोहणाख्यवृक्षाणामित्यर्थः । चलता चलता अजगरेण सर्पेण घोर-कोटराणां भीषणच्छिद्राणाम् । निष्कुहः कोटरं वा नेत्यमरः । तदिह कोटरेष्वज-गरैरेव रसना रोहिणेन पिशाच उपमीयन्ते । भयानको रसः । यदाह । विकृतरवसत्त्वदर्शनशिवाघोरस्वरूपगृहवनगमनात् । गुरुनृपयोरपराधात् कृतश्च भया-नको ज्ञेयः ।

† बीभत्सं जुगुप्साकरम् ।

निर्भिद्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।
आर्त्तः पर्य्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥ (१७)
पिब । निष्टापस्विद्यदस्रः कथनपरिचमत्कृद्रसः प्रेतकायान्
जग्ध्वा संसक्तधूमानपि कुणपभुजो भूयसीभ्यश्चिताभ्यः ।

---

(१७) निर्भिद्येत्यादि । अयं प्रेतरङ्कः प्रेताधमः क्षुधातिशयव्याकुलीभू-
तमनाकुलं यथा तथा क्रव्यं मांसमत्ति खादति । किं कृत्वा । प्रथमतादौ
तं चर्म निर्भिद्य निर्भिद्योत्कृत्य पश्चादुत्कृत्य छित्त्वा । उत्कृत्येति पाठे चर्म-
पाकर्षणमुत्कर्षणं तत्पुनः पुनः कृत्वेत्यर्थः । अथानन्तरं पृथुना महता उच्छोफेन
...ांसि बहूनि मांसानि जग्ध्वा भक्षयित्वा । कीदृशानि । अंसयोः स्कन्धयोः
...योः कटिमांसपिण्डयोः पृष्ठे कायपश्चाद्भागे पिण्डयोर्जङ्घापाश्चात्यभागयोरादि-
...त् कथामूलाद्यवयवेषु सुलभानि । उच्छूनत्वादेषाम् । उग्रपूतीनि उत्कट-
गन्धानि । पृथूत्सेधेति पाठे पृथुर्महानुत्सेधो येन कायेन बहुतरं मलामीत्यर्थः । यद्वा ।
...ेधेनौन्नत्या भूयांसीत्यर्थः । आर्तश्च क्षुधातिशयेनातुरः । कीदृशः प्रेतरङ्कः ।
...करालान् । पर्यस्तनितम्बतः क्षिप्तं नेत्रं येन सः । एतदुभयं प्रेतरङ्केषु प्रसिद्ध-
। अन्तःपर्यस्तनेत्र इति पाठेऽत्यर्थं क्षिप्तनेत्रः । प्रेतरङ्कत्वेन कोटराक्षता-
र्थः । आपन्नाश्रुनेत्र इति पाठे आपन्नानि गृहीतानि अश्रुमयानि नेत्राणि येन
। अत एवास्याधुत्पाटनाच प्रकटितदन्तः । दीर्घत्वप्रकर्षात् प्रकटित-
दशनम् । अङ्कस्थात् क्रोडीकृतात् करङ्कात् कपालादाकृष्यास्थिपिण्डः । अन्यथा-
त्मनामनुपपत्तिः । कीदृशं क्रव्यम् । अस्थिषु यत् सन्निहितं तत् । स्थपुट-
मपि निम्नोन्नतविषमस्थानगतमपीत्यर्थः । अयं बीभत्सो रसः ।
(१८) निष्टापेत्यादि । एतेऽपि कुणपभुजः शवभक्षकाः पिशाचाः चिताभ्यः
कायानाकृष्य तेषामेव ...महाभयानकमस्ति निष्टप्य विसरमांसावयवं
... मज्जधाराः मज्जमज्जितकेशाम् । पिबन्ति । मज्जधाराः कीदृशीः ।
...दूरत एवोद्गिरन्तीर्मज्जमानाः । द्रवमयत्वात् । यद्वा । धाराः कीदृशीः
कीति बोजना । धाराद्दूरसमीपयोरिति मिश्रः । चिताभ्यश्चैतासिद्धौषध-

उत्पक्वस्कंसि मांसं प्रचलदुभयतः सन्धिनिर्मुक्तभारा-
स्तेते निष्कुष्य जङ्घानलकमुदयिनीर्मज्जधाराः पिबन्ति॥(१७)

[विहस्य ।] अहो ! प्रादोषिकः प्रमोदः पिशाचाङ्गनानाम् [illegible] ।

तथाहि । धन्यैः खचितमङ्गलप्रतिसराः स्त्रीहस्तरक्तोत्पल-
व्यक्तोत्तंसभृतः, पिनह्य सघना हृत्पुण्डरीकस्रजः ।

ग्रीवा । जीर्णानाम् । निष्ट्यूतैर्निःसारितैरिव ख्यातास्थि दिशाम् । पश्य [illegible] नूतनान्नस्थूलत्वाच्छन्नाटवीर्यीशीर्षोऽपि रूपम् । धन्ध इति पाठो न युक्तः । [illegible] दावलीव्यादिनालक्षविषादान् । यदा । मेलकादारादिति पञ्चम्यन्तः [illegible] । पतोऽस्तु इति पञ्चम्यामलङ्कि रूपम् । चिताभ्य इति स्थलेऽपि पञ्चमी । [illegible] यतापिव्यनध्वादन्त्री वलम् । क्रमेण पाकक्रमेणाङ्गेषु परिणमत् जीर्णान् मेदो [illegible] तान् संसृष्टधूमानपि । जीर्णं जङ्घानलकम् । उत्पक्वमुत्कृत्य कृत्वा पक्वमत एव च समग्रीवं मांसं भक्षात् । यदा उत्पक्वं मोक्षतपाकेन च हि मांसं यथात् । उत्पक्व इति भावे क्तः । प्रचलन्तः शिथिलीभवन्त उभयतो जानूरुपर्वणी गुल्-फाद्ये यस्मिंस्तादृशं परस्परनियमनस्थानानि तैर्निर्मुक्तम् । प्रचलदिति पाठे उभयतः पार्श्वाभ्यां प्रचलम् । अत एव सन्धिपरिमुक्तमित्यर्थः । कुणपः शवम-स्थिकास्थिमित्यमरः । नलकं नरकङ्क इति ख्यातम् । सरो इति ख्यातं वा । बीभत्स एवात्र रसः ।

• अहो इति बीभत्सशृङ्गाररसदर्शनेन आश्चर्यम् । प्रादोषिको रात्रिप्रारम्भजः । शृङ्गारबीभत्सयोः परस्परविरोधेऽपि संस्थानसाम्यात् संभेदाभाव इव । प्रसाध-नाभाव शृङ्गारः । यदाह, 'अनुभावाद्यलङ्कारैः प्रियजनगान्धर्वकाव्यसेवाभिः । उपवनगमनविहारैः शृङ्गाररसोऽपि समवति । अतएवायं श्लोकः कस्याञ्चरणेऽपि रसव्यवहाराभाव उदाहृत इति ।

(१८) धन्यैरित्यादि । एताः पिशाचस्त्रियः कान्तैः सह स्थित्वा कपाल-चषकैः शर्कराकर्दमपूरा मज्जमयानि पिबन्ति । बीभत्सः । धन्यैः खचितः रचितो मङ्गलप्रतिसरो यस्यास्तद् सूत्रांशकं यासां ताः । अवैधव्यचिह्नं मङ्गलप्रतिसरो भवति । यदा । प्रतिसरः कङ्कणम् । तदव्यवैधव्यचिह्नतया मङ्गलम् । कङ्कणे करसूत्रे च भवेत् प्रतिसरोऽस्त्रियामिति मेदिनीकारः । स्त्रीहस्त एव रक्तपद्मं तेन व्यक्त-

पन्ताः शोणितपङ्ककुङ्कुमभुजः, संभूय कान्तैः पिब-
न्त्यस्थिस्नेहसुराः कपालचषकैः प्रीताः पिशाचाङ्गनाः ॥(१८)

[परिक्रम्य पुनरन्त्रप्रोतेति पठित्वा।] कथं द्रागतिप्रशान्त-
नीचगभीरविकारप्रकारैर्झटिति अपक्रान्तं पिशाचैः। अहो!
निःसत्त्वता पिशाचानाम्। [परिक्रम्य दृष्ट्वा सनिर्वेदम्।]
वञ्चितस्त्वेव समन्तात् श्मशानवाटः।

तथाहि। इयं पुरत एव *।

गुञ्जत्कुञ्जकुटीरकौशिकघटाघूत्कारसंवलित-
क्रन्दत्फेरवचण्डडात्कृतिभृतप्राग्भारभीमैस्तटैः।

मेव कर्णभूषणं बिभ्रति याः। उच्छ्रया शोभा हृत्पुण्डरीकस्य सः हृत्पद्ममालाः नन्त्र परिभाष्य। हृत्पद्म येतत्तया पुण्डरीकवर्द्धनीयम्। यदाह। बालस्या- ननम्पूर्णे यत हृदयपङ्के। इति। मालायाः सर्वोदरतया अन्या सा प्रहा- र्यति पादयामि शोभना। अत एव प्रीताः। शोणितपङ्ककुङ्कुमभुजः रक्तचन्दन- कुङ्कुमवन्तः। अत्र विपक्षशोभादौ यतिभङ्गसङ्गा न कार्या। छन्दोभ्रंशपद- स्थंदे तस्यादोषत्वात्। दैवां द्रव्यमुपगविष्यमाणित्यादौ तथा दर्शनात्। अपदं नपादं स्यादिति कारावली। इह बीभत्साभिधः प्रकारस्तु।

* झटिति शीघ्रम्। बिभीषिका परभयदायिनी रौद्ररूपता। प्रकाराः कारा भेदाः। अपक्रान्तं पलाय्य गतम्। निःसत्त्वा स्वयमेवाभयीतिर्दर्शिता। पिशाचविकारादपि भेतव्याम इति निर्वेदः। विचित्रो न्यासः। तत्रोन्माद- न कथं विचितत्वमार्गविजय चाह इयमिति।

(२०) गुञ्जदित्यादि। इयं सरित् पुरत एवास्ति। पारिप्लवानां श्मशानपार- म्। पारे मध्ये यस्याः वेति समासः। कुञ्ज एव कुटीरोऽल्पा कुटी तत्र या कौशिकघटा पेचकसमूहः। गुञ्जन्तीनां कुञ्जकुटीरकौशिकघटानां घूत्कारस्य संवलि- तं ध्वनितम्। क्रन्दत्फेरवाणां चण्डडात्कृतिः डात्कारः शब्दविशेषः। नदीरवः। ताभ्यां भृतः पूरितो यः प्राग्भारोऽग्रतटं तेन भीमैः भीषणैस्तटैर्न्- दिता। अपरं इतीया। अनरभ्रमरं शोणोत्पुटिता ये चरवाः कपालानि तेषां

भअवदि ! चिरस्स आआसिदासि दुःखं सिणेहेण, * हा पिअ-सहि लवङ्गिए ! सिविणआवसरमेत्तदंसणा अहं दे संवुत्ता (ख)।

माध। हन्त † ! सैवेयं मदिरेक्षणा, सम्प्रति निरस्त एव सन्देहः, तदहमपि नामैनां जीवन्तीं सम्भावये।

[सत्वरं परिक्रामति।]

अघोरघण्टकपालकुण्डले। देवि चामुण्डे ! नमस्ते नमस्ते।

सावष्टम्भनिशुम्भनिर्भरनमद्भूगोलनिष्पीडन-
न्यञ्चत्कर्परकूर्मकम्पविगलद्ब्रह्माण्डखण्डस्थिति।
पातालप्रतिमल्लगल्लविवरप्रक्षिप्तसप्तार्णवम्
वन्दे नन्दितनीलकण्ठपरिषद्व्यक्तर्द्धि वः क्रीडितम् ॥२३॥

(ख) निष्करुण ! एष इदानीं ते नरेन्द्रचित्ताराधनोपकरणं जनो विपद्यते, हा अम्ब ! वत्सलहृदये ! त्वमपि हतासि दैवदुर्विलसितेन, हा मालतीमय-जीविते ! मम कल्याणमाधवैकमङ्गलव्यापारे ! भगवति ! चिरस्य ग्लापि-तासि दुःखं स्नेहेन, हा प्रियसखि लवङ्गिके ! स्वप्नावसरमात्रदर्शना अहं ते संवृत्ता।

---

* अत्र भगवति कामन्दकि इति शेषः। चिरस्य बहुकालम्।

† हन्तेति विषादार्थे।

(२३) सावष्टम्भेत्यादि। देवि। युष्माकं क्रीडितं नृत्यं वन्दे। कीदृशम्। सावष्टम्भः साटोपो यो निशुम्भो निर्दलनव्यापारः चरणभेदनम्: निर्भरात् नम-न्तावनमती भूगोलस्य धरणिमण्डलस्य निष्पीडनेन न्यञ्चद्गच्छत् कर्परं पृष्ठास्थि यस्य एवम्भूतस्य कूर्मस्य कम्पेनाकूपारणेन विगलन्ती भ्रश्यन्ती ब्रह्माण्डखण्डस्य स्थितिर्येन तथा। कर्परं भूतस्य पृष्ठम्। तथा च मम भुजभुजौ नृ च-पातालमुखकान्यातालप्रतिमल्ले पातालमुखे गल्लविवरे प्रक्षिप्ताः सप्तार्णवा यत्र

अपिच ।

प्रचलितकरिकृत्तिपर्यन्तचञ्चन्नखाघातभिन्नेन्दुनिष्यन्द-मानामृतश्च्योतजीवत्कपालावलीमुक्तचण्डाट्टहासत्रसद्भूरिभूत-प्रवृत्तस्तुति, श्वसदसितभुजङ्गभोगाङ्गदग्रन्थिनिष्पीडनस्फार-फूत्कृतफणापीठनिर्यद्विषज्योतिरुज्जृम्भणोड्डामर-व्यस्तविस्ता-रिदोःखण्डपर्यासितक्ष्माधरम् । ज्वलदनलपिशङ्गनेत्रच्छटाच्छ-न्नभीमोत्तमाङ्गभ्रमिप्रस्तुताकालचक्रक्रियाप्लुतदिग्भागम् उग्र-

---

तम् । नन्दिनलीलकण्ठपरिवृत् चर्वितभैरवसमं व्याकर्षि प्रकटविम्बम् । तत्रपिना नु भर्थ्याधानं्वयोऽयं निगद्यते । चङ्क्योपाश्रिताः सर्वाः पादावतरणचारि ॥ इति भरतः । कटाक्षे च अपाङ्गेऽपि पृष्ठाभ्यां च वर्धे इति शाश्वतः । नाट्यं सर्वोपलभ्यमिदम् ।

* दण्डकमाह प्रचलितेत्यादि । देवि ! युष्माकं ताण्डवमुद्धतं नृत्यमव्याज-मनोज्ञं चण्डमनाशाय हर्षे आनन्दाय च भूयात् । अपिचेति पाठे शिष्ट-रथमं तदभावोऽशिष्टताशी । अनेन भाव्यमिष्टार्थमुपक्षेपोऽभ्युक्तः । यदाह । भाविविकमसंवद्धं समर्थमिव वर्तते । भावाभवं स दण्डः आशाभिष्टार्थ-सूचकः ॥ शिष्टः खड्गं नायके क्षीति मेदिनीकारः । अशिष्टं तु प्रभायन दण्ड-मरः । यथा । अकारो देवमाता अदिति कौभाद्यवन्दाम्बुजौ गुणं च ई चः ईवमातः इन्द्रे वनीर्थ्ये भूर्वादिक्षयः । कीदृशम् । प्रचलितगजासुरचर्मपर्यन्तेषु चञ्चतां नखानामाघातैर्भिन्नात् स्फुटिताद्धीनमलकलचन्द्रात् चरदमृतस्य च्युतिः मामवेन जीवन्तीभिः कपालावलिभिर्मुक्तमानाभिश्चण्डाट्टहासैः चकितचकितेव सतां भूरिभूतानां बहुभूतगणानां प्रवृत्ता स्तुतिर्यत्र तत् । यथा । भूतगणैः प्रकृत्या प्रक-ल्पिता स्तुतिर्यत्र तत् । चन्द्रोपितचर्म । यथा । प्रचलितः करिचर्मवीतपयोपयि तत् । पश्चात् कर्मधारयः । तथा ताण्डवाडम्बरावासेन श्वसतां अमितभुजङ्गा-नामनपावृता भोगैः कायैर्ये अङ्गदग्रन्थयः केयूराकारबन्धास्तेषु निष्पीडनेन स्फार-स्फुटमुद्धविकासकरणी वा फूत्कृत् विषाग्निरोत्पन्नः फणापीठः । विषाग्नि-तथा पीठेन कम्पकम् । ततो निर्यद्विषज्योतिषः निर्गतविषाग्नेः उज्जृम्भणमभि-व्याप्तोड्डामरः भयङ्करो विषमो वा अत्र इतस्ततोगामी विस्तारी दीर्घो दो

[illegible]कोटिज्वलोद्धूतिविक्षिप्ततारागणम्, प्रमुदितकटपूतनो-त्तालवेतालतालस्फुटत्करतलध्वानसम्भ्रान्तगौरीघनाश्लेषहृष्यन्मनस्त्र्यम्ब-कानन्दि वस्ताण्डवं, देवि ! भूयादभीष्ट्यै च हृष्ट्यै च नः ॥

[इत्यभिनयतः ।]

माध। हा धिक् प्रमादः [१]।

अध्यासीनकरालमारवमना, पाषण्डचाण्डालयोः
पापारम्भवतोर्मृगीव वृकयोर्भीरुर्गता गोचरम्।
सेयं भूरिवसोर्यशोधनसुता मृत्योर्मुखे वर्त्तते
हा धिक्कष्टमनिष्टमस्तकरुणः कोऽयं विधेः प्रक्रमः ॥ (२४)

टीत्कारः चञ्चलसूत्कारेण पर्याकुलितः क्षिप्तः आडम्बरः पर्वतो यत्र तत्। दंष्ट्रा चर्मिकवाष्पमालिकया टीत्कारं कृतम्। चकारादिकदम्बं समूहमस्त्रियामित्य-मरः। तथा अनन्तो चञ्चलेन पिङ्गं पिङ्गलं यत् तत् ललाटलोचनं तस्य कटा-क्षाग्निनिर्गमप्रसरः तथा चाण्डवं भीमं यदुत्तमाङ्गं शिरस्तस्य भ्रमितमण्डला-कारेण भ्रमणं तथा प्रस्तुता प्रारब्धा चलातपत्रक्रिया वह्निप्रज्वलितार्धकायविशेष-कर्म तथा स्थूला इवैकप प्रतिबद्धा इव दिग्भागा यत्र तत्। तथा प्रमुदित कट-पूतनोत्तालवेतालानां कुटकटपूतनादैवतानां तालेन करतलेन स्फुटत्करतला-वात एव सम्भ्रान्ता असतो सत्वरा वा या गौरी तस्या घनाश्लेषेण निबिडालिङ्गनेन हृष्यत् मनः चित्तं यस्य एवम्भूतं त्र्यम्बकं त्रिनयनमानन्दयति तत्। आभीष्ट्यं इ-ष्टिः।

१ धिक्प्रमादं इत्यत्र वर्त्तते इति क्रियाध्याहारः। तत उपपदविभक्तेः कारकविभक्तिर्बलीयसीति निर्णीते द्वितीयां बाधित्वा प्रथमैवमर्थेयम्।

(२४) अध्येति। यशोरिव चण्डस्यकरमुनामकस्येव भूरिवसोरन्वर्थनाम-कस्य मालतीपितुः इयं पुरोवर्त्तिनी सुता मालती मालव इतस्तते चतस्रकेन रक्षे मारवमनी यस्या वर्त्तितं यत्र यमीरयस्तकपालकुण्डलाभ्याविन्यस्ते:। पा पापारम्भवतीरन्याकपापकर्मारम्भाकयोरित्यर्थः। पाषण्डचाण्डालयोः ताडव-कमावयोरित्यर्थः। इववीर्य्यावयद्विवकभावयोर्गोचरं विषयं गता भीरुभंग-शीला मृगीव मृत्योर्यमस्य मुखे वर्त्तते हा विषादे धिक् एतादित्यर्थः। कष्टमनिष्ट

कपाल । तं भद्रे ! स्मर हृदितोऽयं यस्तवाभू-

देष त्वां त्वरयति दारुणः कृतान्तः * ।

माल । हा दइअ ! णाह माहव ! परलोअगदोवि सुमरिदव्वो तुम्हेहिं अअं जणो, ण क्खु सो उवरदो, जस्स वल्लहो जणो सुमरेदि † (ग) ।

कपाल । हन्त ! माधवानुरक्तेयं वराकी तपस्विनी ‡ ।

अघोर । [असिमुद्यम्य ।] यदस्तु, व्यापादयामि ।

चामुण्डे ! भगवति ! मन्त्रसाधनादा-

वुद्दिष्टामुपनिहितां भजस्व पूजाम् ¶ ॥

(ग) हा दयित नाथ माधव ! परलोकगतोऽपि स्मर्तव्योऽयं जनो युष्माभिः, न खलु स उपरतो यस्य वल्लभः स्मरति ।

समीप्सितः । निधिः सदुपदेशकरुणः करुणायुक्तः कोऽयं प्रक्रम आरब्ध इत्यर्थः । एतद्दुर्विधिविलसितम् अन्यथा नैतत् घटितुं शक्यते ।

* तं भद्रेत्यादि । प्रहर्षिणीच्छन्दसा श्लोकार्द्धेन । चामुण्डे भगवतीत्याद्यर्द्धमाद्यम् । हे भद्रे ! यस्तव दयितो वल्लभस्तेन हृदयं स्मर । कृतान्तात् त्वरयन्नस्ति । यदाह । पतिरेको गुरुः स्त्रीणामिति । यद्वा । मद्गुरुणोऽवलम्ब न इह अन्यथा ते वल्लभो न भूत एव । अतो जन्मान्तरेऽपि तल्लाभाय तं स्मर । यदाह । यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय ! सदा तद्भावभावितः ॥ इति । कृतान्तो यमः ।

† स्मरणमाह । परलोकगतोऽपीत्यत्र स्मर्तव्य इति । यस्य स्मरन्निति वा । अन्तकाले माधवस्मरणं मुक्तिहेतुरिति कटाक्षितम् ।

‡ हन्त खेदे । चामुण्डायोग्यमुपहारमपि माधवानुरक्तैव । तदनुरक्ता चेयं कथं भविष्यतीति खेद इति भावः । अतएव तपस्विनी अनुकम्प्या ।

¶ उद्दिष्टा वाचा प्रतिज्ञाताम् । उपनिहितामुपढौकिताम् ।

[इति अनुसृत्य पराक्रान्तः ।]

माध।

[सहसोपसृत्य प्रकोष्ठे मालतीं निक्षिप्य ।]

दुरात्मन्! एष प्रतिहतोऽसि कापालिकापसद *! नन्वयं न भवसि।

माल। [सहसावलोक्य।] परित्ताअदु मं महाणुभाओ माहवो।

[इति माधवमालिङ्गति ।]

माध। महाभागे! न भेतव्यम् भेतव्यम्।

मरणसमये त्यक्त्वा शङ्कां प्रतापनिरर्गल-
प्रकटितनिजस्नेहः सोऽयं सखा पुर एव ते।
सुतनु! विसृजोत्कम्पं सम्प्रत्यसाविह पाप्मनः
फलमनुभवत्युग्रं पापः प्रतीपविपाकिनः॥ (२५)

अघो। आः क एष पापोऽस्माकमन्तरायः संवृत्तः?।

कपा। मालत्या एवायमस्याः स्नेहभूमिः कामन्दकीसुहृत्पुत्रो, महामांसस्य पणयिता, माधवो नाम।

---

* कर्णोपरिभागाधो मणिबन्धपर्यन्तः प्रकोष्ठः। निक्षिप्य आपकर्ष्य। बलात्कारेण बाहुमध्येऽपसारणम्। प्रतिहतो निराकृतः। अपसद! निन्दित!

(२५) मरणेति। मरणसमये शङ्कां जीवनसंशयमिति यावत्। त्यक्त्वा प्रतापेन निरर्गलः अप्रतिहतवीर्यः तथा प्रकटितः निजः स्नेहः येन स चासौ इति कर्मधारयः। स दृष्टपूर्वः अयं दृश्यमान इत्यर्थः। ते तव सखा बान्धवः पुर एव अग्रे इति शेषः। अतएव हे सुतनु! शोभनाङ्गि! उत्कम्पं भयं विसृज त्यज सम्प्रति असौ पापकारित्वात् पापः अघोरघण्टः इहाव प्रतीपेन प्रतिकूलाचरणेन विपाकिनः परिपक्वस्य परिणामकठिनस्येत्यर्थः। पाप्मनः कलुषस्य उग्रं मरणरूपमुत्कटं फलमनुभवतु अनुभवतीत्यर्थः।

माध। [साश्चर्य्यम्।] महाभागे! किमेतत्?

माल। [चिरादाश्वस्य।] महाभाअ! अहं ण किम्पि जाणामि, एत्तिअं उण जाणामि, उवरिमलिन्दे पसुत्ता, इह-प्पबुद्धम्हि, तुम्हे उण कहिम्? (घ)।

माध। [सलज्जं।] त्वत्पाणिपङ्कजपरिग्रहपुण्यजन्मा

भूयासमित्यभिनिवेशकदर्थ्यमानः।

भ्राम्यन्नमांसपणनाय, परेतभूमा-

वाकर्ण्य, भीरु! रुदितानि तवागतोऽस्मि॥ (२६)

माल। [स्वगतम्।] हद्धी! कधं मम कारणादो एव्वं एदे अप्पणिरवेक्खा परिक्कमन्दि (ङ)!

माध। अहो नु खलु भोः! तदेतत्काकतालीयं नाम सम्प्रति हि।

(घ) महाभाग! अहं किमपि न जानामि, एतावदेव पुनर्जानामि, उपर्य्यलिन्दके प्रसुप्ता इह प्रबुद्धास्मि, यूयं पुनः क?।

(ङ) हा धिक्! हा धिक्! कथं मम कारणादेवमेते आत्मनिरपेक्षाः परिक्रामन्ति।

---

(२६) त्वदिति। हे भीरु! आकर्णय! तव पाणी एव पङ्कजं तस्याः वा परिग्रहः ग्रहणं तदीयमिति वा। स एव पुण्यं तस्मात् जन्म यस्य तादृशः भूयासं अहमिति शेषः। इत्यभिनिवेशेन कुत्साग्रहेण कदर्थ्यमानः पीड्यमानो भ्राम्यन् भ्रमन् पर्य्यटन्। नृमांसपणनाय नरमांसविक्रयाय परेतभूमौ श्मशाना-वनौ तव रुदितान्याकर्ण्य श्रुत्वा आगतोऽस्मि।

राहोश्चन्द्रकलामिवाननचरीं दैवात्समासाद्य मे,
दस्योरस्य कृपाणपातविषयादाच्छिन्दतः प्रेयसीम् ।
आतङ्काद्विकलं, द्रुतं करुणया, विक्षोभितं विस्मयात्,
क्रोधेन ज्वलितं, मुदा विकसितं, चेतः कथं वर्त्तताम् ॥ २७

अघो । रे रे ब्राह्मणडिम्भ !।

व्याघ्राघ्रातमृगीकृपाकुलमृगन्यायेन, हिंसारुचेः
पाप ! प्राण्युपहारकौतुकवतः प्राप्तोऽसि मे गोचरम् ।
सोऽहं प्राग्भवतैव भूतजननीमर्च्चामि, खड्गाहति-
च्छिन्नस्कन्धकबन्धरन्ध्ररुधिरप्राग्भारनिष्यन्दना ॥ (२८)

---

(२७) राहोरिति । आननं चरति या तां मुखप्रविष्टामित्यर्थः चरेष्ट इति ट टित्वात् ङीप् । राहोर्मुखगतां चन्द्रकलामिव स्थितामित्युत्प्रेक्षा । प्रेयसीं प्रियतमां मालतीं अस्य पुरः स्थितस्य दस्योः चौरस्य कृपाणपातविषयात् खड्गप्रहार-घातात् आसाद्य प्राप्य आच्छिन्दतः बलात् गृह्णतः मे मम चेतः कथमतिक्रान्तं च आतङ्कात् किमिदमिति भयात् विकलं विह्वलं वर्त्तताम् करुणया एतादृश्यवस्थेति दयया, विस्मयात् अघटनघटनारूपात् विक्षोभितं चलितं क्रोधेन एतस्य दुष्टा-चाराकरणरूपेण ज्वलितम् मुदा हर्षेण अन्याश्चर्येण विकसितं प्रफुल्लं वर्त्तताम् । अत्रैकस्य चित्तस्य बहुविधचित्तधर्मैस्तथा पर्यायालङ्कारभेदः । एकमनेकेष्वनेक-मेकस्मिन्नुक्तिरित्याद्युक्तत्वात् ।

(२८) व्याघ्रेति । रे पाप ! पापानुष्ठायिन् माधव ! व्याघ्रेण आघ्राता गृहीता या मृगी तस्यां या कृपा तत्प्रकारयापेत्यर्थः । तया आकुलः व्याकुलः यो मृग तस्यापि न्यायेन तादृश्येव स यथा तथेत्यर्थः । प्राणिनां जन्तूनां च उपहारः करालायै निवेद्य दानं तस्य कौतुकवतः तत्र स्थितस्य अतएव हिंसारुचेः हिंसाभावपद्यमानस्य मे मम गोचरं प्राप्तोऽसि । खड्गाहत्या छिन्नस्कन्धस्य अतएव कबन्धस्य अपमूर्द्धकलेवरस्य तस्य रन्ध्रेभ्यो निर्गच्छन्ति इति यावत् यानि रुधिराणि तेषां प्राग्भारस्य यो निष्यन्दः स्रावः स विद्यतेऽस्य तेन भवतैव प्राग्बालेन भूतानां जननीं देवीं करालामित्यर्थः । अर्च्चामि पूजयामि । यादृशी मदीयकृपा-पात्रविषयस्य तव एतेन दर्शं भवतो हन्तु ह्यर्थः ।

माध। दुरात्मन्! पाषण्ड! चाण्डाल!!

असारं संसारं, परिमुषितरत्नं त्रिभुवनम्,
निरालोकं लोकं, मरणशरणं बान्धवजनम्।
अदर्पं कन्दर्पं जननयननिर्माणमफलम्,
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः॥ (२८)

अपि च। रे रे पाप!

प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत्।

---

(२८) माधवोऽपराधमाह। असारमित्यादि। रे पाषण्ड! जगत् असारं सारशून्यं विधातुं कर्तुं कथं व्यवसितः कृतप्रयत्नोऽसि। तथा च संसारसारभूतैवेयं। अनया विना असार एव स इति। यदाह। सारं तु मदिरेक्षणा संसार इति निश्चयः। इति। जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षते॥ इति। तत्सर्वंसारभूतेयं निर्मिता। अतो रत्नमियम्। मनोहरत्वदीप्तिमत्त्वतरलत्वादि-मेयं वा रत्नम्। अतएव तदभावात् प्रमुषितरत्नं त्रिभुवनं कर्तुं व्यवसितोऽसि। तदेतत्सर्वविषयं चौर्यं दुरन्तमिति भावः। इयमतिकान्त्या जगदुद्योतयन्त्या-लोकभूता। एतदभावान्निरालोकं तमःप्रविष्टं लोकं जनं कर्तुं व्यवसितोऽसि। अतएवोत्कृष्टं प्रति लोकोक्तिरेव विनान्धकारतमस्याभावात् ज्योत इति। बान्धव-जनानामेतज्जीवनमिदं जीवनहेतुः। अत एतदभावान्मरणशरणं सर्वजनं विधातुं व्यवसितोऽसि। बन्धुलोकाश्च तदभावे दुःखिताः। एतदभावे तु म्रियन्त एवेति भावः। अत्रासारं संसारमित्यादिना नायिकायास्तदालोकत्वातिशय-वर्णनमुपक्रम्य मरणशरणमित्यादिना उक्तविषयताप्रतिपादनात्तथाप्यतद्वैरस्यानि-योग इत्यवरोपणम्। भावादिदम्भुक्तितिरिक्तोऽहंकारोपोद्घातसंदर्भकपराक्रमप्रसङ्गात् अस्यैव माधवस्य विपत्तिं सूचयतीत्यदोषात्। यद्वीक्षमाणानामुद्यच्छिन्नमादिव मरणशरणता प्रतिज्ञाश्लेषनिर्वाहाच्च। कन्दर्पश्च तया लोकानां च दर्पं करोति। एतदभावाददर्पम्। जननयननिर्माणमफलम्। अत एतदभावादफलम्। जगत् अनया अवष्टब्धमिव। एतदभावाज्जीर्णारण्यतुल्यं तदिति। अत्र विधातुर्मदस्या प्रकारो बन्धुरत्वात् अथवा पाषण्डापेक्षया चौरः कर्मनिरूपणमपि नाना रसाः।

वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः,
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥ (१०)

अघोर। आः दुरात्मन्! प्रहर, नन्वयं न भवसि।

माल। पसीद णाह साहसिअ! दारुणो क्खु अअं हदासो, परित्ताहि मं पडिणिवत्तीअदु इमादो अणत्थसंसआदो * (ब)।

कपा। भगवन्! अप्रमत्तो भूत्वा, दुरात्मानं व्यापादय †।

माधवोऽघोरघण्टो मालतीकपालकुण्डले प्रति।

अयि भीरु!
धैर्य्यं निधेहि हृदये, हत एव पापः,
किं वा कदाचिदपि केनचिदन्वभावि।

(ब) प्रसीद नाथ साहसिक, दारुणः खल्वयं हताशः, परित्रायस्व मां प्रतिनिवर्त्ततामस्मादनर्थसंशयात्।

---

(१०) पुनरपि दोषमुद्भाव्य दण्डं विकीर्षुराह। वपुषीत्यादि। हे पाप! तव शिरसि एव भुजः आकस्मिकयमदण्ड इव पततु। आकस्मिकत्वेनाप्रतिक्रियत्वमुक्तम्। कीदृशस्य तव। तत्र वपुषि अतिसुकुमारे मालतीशरीरे वधाय शस्त्रम् उपक्षिपतः उत्तोलयतः। अत्र भुजपदेन बाहुव्यापारमात्रेणैव हन्तव्योऽसीति शौर्यातिशय उक्तः। यत् मालत्याः वपुः सुकुमारशिरीषपुष्पाघातैरपि ताम्यति क्लाम्यति। कीदृशैः। [illegible] अपि। अत्रापि शृङ्गारवीररसयोः सम्भेदः।

* अत्र त्वज्जीवने मम जीवनमपि सफलम्। अन्यथा तु मरणमेव वरमिति भावः।

† मालतीव कपालकुण्डलापि समानमाह। [illegible]। [illegible] प्रमत्त इति।

(११) मालतीमाश्वासयति। धैर्य्यमित्यादि। हे भीरु! त्वं हृदये

सारङ्गसङ्गरविधाविभकुम्भकूट
कुट्टाक-पाणिकुलिशस्य हरेः प्रमादः ॥ (११)

[नेपथ्ये कलकलः । सर्वे आकर्णयन्ति ।]

[पुनर्नेपथ्ये ।] भो भो मालत्यन्वेषिणः सैनिकाः ! इयम् अमात्यभूरिवसुम् आश्वासयन्ती अप्रतिहतप्रज्ञागतिः भगवती कामन्दकी वः समादिशति ।

पर्य्यवष्टभ्यतामेतत्करालायतनं द्रुतम् * ।
नाघोरघण्टादन्यस्य कर्मैतद्भीषणाद्भुतम् ।
न करालोपहाराच्च फलमन्यद्विभाव्यते ॥ (१२)

कपा । भगवन् ! पर्य्यवष्टब्धाः स्मः † ।

अघोर । सम्प्रति विशेषतः पौरुषस्य अवसरः ‡ ।

धैर्यं कुरु । एष पापी हतः । अस्य वधे कुतः संशय इति कथा अयं ते इति भावः । अत्र युक्तिमाह । सारङ्गेण समेन सह युद्धविधायी हरिः सिंहस्य प्रमादोऽनवधानता किं वा केनचित् कदाप्यनुभूतः । कोऽपीत्यर्थः । सारङ्गस्य यत् कूटमुत्तरदेशस्तस्य कुट्टाकः कुट्टनशीलः पाणिः कर एव वज्रं यस्य । तथा । हरिः सिंहस्य हस्तिना सह युद्धे नास्ति प्रमादः । कोऽपीत्यर्थः । हस्तिकुम्भस्थलीदलन-कुट्टाकं पाणिवज्रकुलिशं यस्य । कुम्भकूटपाणिकुलिशपदैः साम्यपार्थिवादिः । सारङ्गः पुंसि हरिणे चातके च मतङ्गजे इति मेदिनीकारः । अत्र वीरो रसः ।

* मालतीमपहृत्यानयनाभावात् । कौ इति । अप्रतिहतेति अव्याहत-बुद्धिः । एतेनाघोरघण्टकृती मालतीमपहार इति कामन्दकीवचनं कथनम् । मालतीमन्वेषयन्तीव विचारः स्व इति मलाशावभार इति सूचितम् । पर्य्यवष्ट-भ्यतं वर्त्तनी वेष्टनम् ।

(१२) नेत्यादि । एतत् कर्म मालत्यपहरणात्मकं भीषणं दिश्य आहुतं बहुरक्ततरस्थितावा अपि हरणात् ।

† कोलाहलेन पलायनेच्छुराह । अवष्टब्धेति ।

‡ संज्ञायां इदमघोरघण्टस्य अत्यन्तं निकृष्टतया कथितव्यता आह । सम्प्रतीति ।

मालती। हा ताद ! हा भअवदि ! (क) *।

माधव। भवतु, बान्धवसमाजसुखितां मालतीं विधाय, तत्समक्षमेनं दुरात्मानं व्यापादयामि।

[मालतीमन्यतः कापालिकमन्यतः प्रेरयन् परिक्रामति † ।]

माधवाघोरघण्टौ। [अन्योन्यमुद्दिश्य।] आः पाप !

कठोरास्थिग्रन्थिव्यतिकररणत्कारमुखरः,
खरस्नायुच्छेदक्षणविहितवेगव्युपशमः।
निरातङ्कः पङ्केष्विव पिशितपिण्डेषु विलस-
न्नसिर्गात्रं गात्रं सपदि लवशस्ते विकिरतु ॥ (२२)

इति निष्क्रान्ताः सर्वे।

मालतीमाधवे पञ्चमोऽङ्कः।

(क) हा तात ! हा भगवति !

पौरुषं पुरुषस्य व्यापारैस्तेजो वा। पौरुषं पुरुषस्योक्तं भावे कर्मणि तेजसीति विश्वः।

* मालती तत्रावेशातिभयादाह। हा तात ! हा भगवति ! इति।

† मालतीरक्षार्थं कापालिको मया हत इति अमात्यो जानातु इत्याशयेन मालतीं च कातरां वीक्ष्याह भवत्विति। बान्धवेत्यादिना भाविकार्य्योपक्षेप उक्तः। अन्यतः कापालिकादन्यदिशं स्वसंमुखमिति यावत्।

(२२) तावदन्योन्येन प्रहारव्यापारमाहतुः। कठोरेत्यादि। हे पाप ! कर्दमेष्विव मांसपिण्डेषु निरातङ्को निर्भयः यथावत् विचरन् सन्। तथा कठोरास्थिग्रन्थिव्यतिकरैः कठिनास्थिग्रन्थिसङ्घट्टनैर्यो रणत्कारो व्यक्तध्वनिः तेन मुखरः सशब्दः। खरस्नायुच्छेदेषु कठिनस्नायुच्छेदेषु क्षणं मुहूर्त्तं विहितवेगव्युपशमः कृतवेगोपरमः असिः खड्गः ते गात्रं गात्रं प्रत्यङ्गं लवशः खण्डं खण्डं सपदि इदानीमेव विकिरतु विक्षिपतु।

षष्ठोऽङ्कः ।

—:•:—

ततः प्रविशति कपालकुण्डला ।

कपा । आः दुरात्मन्! मालतीनिमित्तं व्यापादितगुरो! माधवहतक! एवं त्वया तस्मिन्नवसरे निर्दयं निघ्नता अपि स्त्रीति अवज्ञाता । [सक्रोधम् ।] तदवश्यमनुभविष्यसि कपालकुण्डलाकोपस्य विजृम्भितम् ।

शान्तिः कुतस्तस्य भुजङ्गयोषिद्यस्याविसुप्तानुशया सदैव ।
जागर्ति दंशाय निघातदंष्ट्राकोटिर्विषोद्गारगुरुर्भुजङ्गी ॥ (१)

[नेपथ्ये।] भो राजानः! वरगमनयात्रामङ्गल्या संचरध्वम्,
कर्तव्येषु, स्वस्त्ययनसुभगं भूमिदेवाः पठन्तु ।
चित्रं नानारचननिवहैर्बध्यतां मण्डपेषु,
प्रत्यासन्नस्त्वरयतितरां लग्नवेलाप्रवेशः ॥ (२)

---

(१) शान्तिरिति । यस्मिन् भुजङ्गयोषी सर्वं प्रसुप्तानुशया अपरित्यक्तकोपा, निघाता दंष्ट्राकोटिर्दंशनसाधनभूता यस्याः सा, विषोद्गारगुरुर्भरोद्गारेण कठिना भुजङ्गी सर्पिणी दंशाय दंशनाय सदैव जागर्ति उद्युक्ता तस्य भुजङ्गयोषिद्वैरिणः कुतः शान्तिः सुखमित्यर्थः ।

(२) भो इति । भो राजानो नृपाः! वरगमनयात्रामङ्गल्या कर्तव्येषु वैवाहिककर्मविधिषु संचरध्वं प्रवर्तध्वम् भूमिदेवा भूसुराः मङ्गलसूक्तं यथा भवति तथा पठन्तु वेदमित्यर्थः । नानारचननिवहैर्विविधरचनाप्रकारैर्मण्डपैः चित्रं यथा तथा [illegible] बध्यतां [illegible] । लग्नवेलाप्रवेशः लग्नसमयप्रवेशः अत्यासन्नः [illegible] अतितरां त्वरयति शीघ्रताम् उत्पादयतीत्यर्थः ।

यावत् सम्बन्धिनो न परापतन्ति, तावत् वत्सया मालत्या सह नगरदेवतागृहम् अविघ्नमङ्गलाय गन्तव्यम् इति आदिशन्ति भगवतीनिदेशवर्त्तिनोऽमात्यदाराः। तथा गृहीतसविशेषमण्डनः प्रतीक्षतामागुयाविको जनः।

कपा। भवतु इतो मालतीविवाहपरिकर्मसत्वरप्रतीहारजनकुलाद्बाह्यदेशादपक्रम्य, माधवापकारं प्रति अभिनिविष्टा भवामि। [इति निष्क्रान्ता। विष्कम्भकः।]

[ततः प्रविशति कलहंसकः।]

आअदोह्मि, अवरदेवदाभवणभन्तरट्ठिदेण समअरन्देण, माहमाहवेण, जधा आआहि दाव अत्ताहिमुहं पउत्ता मालदी ण वेति, ता जाव णं आणन्देमि (क)।

ततः प्रविशतो माधवमकरन्दौ।

माध। मालत्याः प्रथमावलोकनदिनादारभ्य विस्तारितै-
र्भूयः स्नेहविचेष्टितैर्गहनतां नीतस्य कोटिं पराम्।
अद्यान्तः खलु सर्वथास्य मदनायासप्रबन्धस्य मे,
कल्याणं विदधातु वा भगवती नीतिर्विपर्य्यस्यतु वा॥ (१)

(क) आगतोऽस्मि, नगरदेवताभवनाभ्यन्तरस्थितेन समकरन्देन माधमाधवेन, यथा आगच्छ तावत् आत्माभिमुखं प्रवृत्ता मालती न वेति, तथावदेहि, आनन्दयिष्यामि।

---

(१) मालत्या इति। अनयोर्मध्ये मालत्याः प्रथमावलोकनदिनात् प्रभृतिपरस्परदर्शनादारभ्य विस्तारितैर्भूयः पुनरपि विवर्द्धमानैः स्नेहविचेष्टितैः परामधिकां कोटिम् उत्कर्षं नीतस्य प्रापितस्य मे मम अस्य मदनायासप्रबन्धस्य सर्वथा सर्वप्रकारेण अद्य अन्तोऽवसानं सम्भविष्यति। पूर्वं कल्पितकामन्दकीनीतेः फलं जातमित्यर्थः। तथान्तरमाह भगवती कामन्दकी कल्याणं क्षेमं विद-

मक। वयस्य! कथं हि भगवत्याः सुनिश्चितो नीतिविपर्य्ययं गमिष्यति।

कल। [उपसृत्य।] णाह माहव! दिट्ठिआ वड्ढसि, पउत्ता क्खु अत्ताहिमुहं मालदित्ति। (ख)

माध। अपि नाम सत्यम्?

मक। सखे! किमश्रद्दधान इव पृच्छसि, न केवलं प्रवृत्ता, प्रत्यासन्ना च वर्त्तते। तथाहि।

पश्चादनेकपट एव महर्द्धिकीर्ण-
जीमूतजालजनितानुकृतिर्निनादः।
गम्भीरमङ्गलमृदङ्गसमुद्भवश्च
यः शान्तरप्रहरशान्तिमपाकरोति॥ (४)

तदेहि जालमार्गेण पश्यामः। [तथा कुर्वन्ति।]

कल। णाह! पेक्खध, पेक्खध, इमिणा दाव उप्पाडिअ-रायहंस विब्भमाहिराम-चामरसमीरणोव्वेल्लमाणकदलिआवलि-तरङ्गिदुत्ताल-गअणङ्गण-सरोवर-विरअन्तवहन्त-पुण्डरीअविब्भमं वहन्तो, धवलादवत्तणिवहा दीसन्ति। एदाओ

(ख) नाथ! दिष्ट्या वर्द्धसे प्रवृत्ता खलु आत्माभिमुखं मालतीति।

भातु वा करोतु वा नीतिभंगः विपर्य्ययं तु वैपरीत्यं गच्छतु वा। यदि भगवती अनुकम्पेत तदा साफल्यं, नीतिभ्रंशे तदापि मरणेन साफल्यमिति तात्पर्य्यार्थः।

(४) पश्चादनेकेत्यादि। महर्द्धिकीर्णं जीमूतजालजनितानुकृतिः जालविकारि-निःसृतमूर्च्छितततुल्यो गम्भीरमङ्गलमृदङ्गसमुद्भवजन्मा गम्भीरमङ्गलार्थमृदङ्गसमुद्भव-जन्मा निनादः अस्य एकपदे एकस्मिन् पदे अभ्यन्तरवर्त्तिजनकलकल-श्रवणसामर्थ्यं निराकरोति। कापरवेणाभ्यन्तरो न श्रूयत इत्यर्थः। वसन्ततिलक-मर्वकोपजनयम् वसन्ततिलकम्।

सविलास-कवलिद-तंबूल-वीडिआपूरिद-कवोल-मण्डलाभोअ-अवरपर-क्खलिद-महुरमङ्गलगीद बहु-कोलाहलेहिं विविहरअणालङ्कार-किरणावली-विडम्बिद-महिन्द-चाव खण्ड विच्छेअविच्छुरिअ-णहत्थलेहिं, वारसुन्दरीकदम्बेहिं अज्झासिआ, कणअ-कणअकिङ्किणि-जाल-झणझणझङ्कारिणीओ करिणीओ (ग) *।

माधवमकरन्दौ। सकौतुकं पश्यतः।

मक। रमणीयाः खलु अमात्यभूरिवसोर्विभूतयः। तथाहि।

प्रेङ्खद्भूरिमयूरमेचकचयैरुन्मि चाषच्छद-
च्छायासंवलितैर्विवर्त्तिभिरिव प्रान्तेषु पर्य्याहृताः।

(ग) नाथ! पश्य, पश्य एते तावदुत्पतितरजोहंसविभ्रमाभिरामचामर-समीरणोर्मि [illegible] सरोवरनिरन्तरोद्दण्डपुण्डरीक-विभ्रमं वहन्तो, धवलातपत्रनिवहा दृश्यन्ते। एताश्च सविलासकवलिततांबूल-वीटिकापूरितकपोलमण्डलाभोग अतिकरस्खलित मधुरमङ्गलगीत--बहुकोलाहलैः विविधरत्नालङ्कार-किरणावलीविडम्बित--महेन्द्रचापविच्छेदविच्छुरितनभःस्थलैर्वार-सुन्दरीकदम्बैरध्यासिताः कनककनककिङ्किणीजालझणझणझङ्कारिण्यः करिण्यः।

---

* माधवीमाकाङ्क्षमाह नाथेति। उद्ध उत्पतितः उड्डीनः। विभ्रमो विलासो विशिष्टभ्रमणं वा। अभिरामः मनोहरः। उर्ड्डन् कम्पमानः। ध्वज-शिखा पताका। तरङ्गितः तरङ्गयुक्तः। तेन उत्तालः सकम्पमिव सरोवरः। तत्र उद्दण्डमुन्नतदण्डम् पुण्डरीकं पद्मं तस्य विभ्रमं विलासं वहन्तः धारयन्तः। आतपत्रं छत्रम्। धवलातपत्रनिवहा इति पाठे विशेषणं ध्वजयष्ट्याः सम्भ्रमतया ऊर्द्ध्व-पदेन चेतनागुणत्वम्। एताः करिण्य इत्यन्वयः। अध्यारोऽध्यासितामर्थः। चर्व्वितं भक्षितम्। स्खलितः कदः स्खलितं कम्पितम्। अङ्गलीकरीन्द्र बहुस-कलहंसैर्वान्तम्। विडम्बितं वक्रीकृतम्। विच्छेदः खण्डः। विच्छुरितं व्याप्तम्। झणझणायन्ते झङ्कारशब्दः।

(१) प्रेङ्खदित्यादि। तदाविकिरणसमुच्चयोरुद्धैः सुवर्णमणिदीप्तिभिरिव विवर्त्तिभिः

व्यक्ताखण्डलकार्मुका इव भवन्त्युद्भिन्नचीनांशुक-
प्रस्तारस्थगिता इवोच्चु समभिज्योतिर्वितानैर्दिशः॥ (५)

कल। कधं, सम्भममाणेण पडिहारमण्डलावज्जिदुज्जल-कणअ-कलहोअ-पट्ट-विचित्त--वेत्त--लदा-परिक्खित्त--रेहा--रइ-ट-मण्डलो दूरदो ज्जेव्व से संट्ठिदो परिअणो। एसा अ बहुल-सिन्दूर--णिअर--सञ्झा--राओवरत्त-चडुल--मुह--घोलन्त--चम्म-चामरस्स-मालाभरण-धारिणिं करेणुरमणिं पलङ्घन्ती, इदो ज्जेव्व कोदूहलुम्मुह-समत्थ-लोअ-दीसन्त-मणोहरा, पांडुर-परिक्खाम-देहसोहा, पढम-चन्द-लेहा-विब्भमं वहन्ती किंचिअन्तरं पसरिदा मालती (घ) *।

मक। वयस्य! पश्य पश्य।

(घ) कथं सम्भ्रममाणेन प्रतिहारमण्डलावर्जितोज्ज्वलकनककलधौतपट्टवि-चित्रवेत्रलतापरिक्षिप्तरेखारचितमण्डलो दूरत एव संस्थितोऽस्याः परिजनः। एषा च बहुलसिन्दूरनिकरसन्ध्यारागोपरक्तचटुलमुखपूर्णघोलच्चमरमालाभरणधारिणीं करेणुरमणीम् अलङ्कुर्वती, इत एव कौतूहलोन्मुखसमस्तलोकदृश्यमानमनोहरा, पाण्डुपरिक्षामदेहशोभा, प्रथमचन्द्रलेखाविभ्रमं वहन्ती, किञ्चिदन्तरं प्रसृता मालती।

इतस्ततो वर्तैः प्रान्तेषु निकटेषु दर्शिताः श्यामा इव दिशो व्यक्तेन्द्रचापा इव भवन्ति। कीदृशैः। पिङ्गलः इतस्ततश्चलन्तो भूरीणां सुवर्णानां मयूखाः किरणा यत्र तादृशो मेचकः स्निग्धवर्णो येषु तैः। मयूरमेचकनिभैरिति पाठे पिङ्गश्चासौ भूरिमयूखः बहुमयूखश्च मेचकाश्चन्द्रकाञ्चितिवद्वा येषां तैः। मेचकश्चन्द्रके स्निग्धे श्यामलेऽपि च दृश्यते इति विश्वः। भूरि क्लीबं सुवर्णे च प्राज्ये स्यादभिधेयवत् इति मेदिनीकारः। उच्चैर्मुक्तोर्मी चलाचः पक्षमिदशक कनकावदात पञ्च-कान्ता संवलितैरिव निचितैः इव। कीदृश्यः। उद्गतचित्रक चीनदेशभवपट्टवस्त्र प्रसारित स्थगिता अर्पिता वा आर्पिताः छन्ना इव। प्रस्तारस्थगिता इति छादिताः। भवन्ति इत्याद्यन्वयः।

* चक्रावर्जिता तिर्यग्भूता। कनकं हिरण्यम्। कलधौतं रजतम्।

इयमवयवैः पाण्डुक्षामैरलङ्कृतमण्डना
कलितकुसुमा बालेवान्तर्लता परिशोषिणी ।
वहति च वरारोहा रम्यां विवाहमहोत्सव-
श्रियमुदयिनीमुत्कण्ठां च व्यनक्ति मनोभवम् ॥ (६)

कथं निषादिता * गजवधूः ?

माध । [सानन्दम् ।] कथमवतीर्णे भगवतीलवङ्गिकाभ्यां ममम् पुनः प्रहृतैव ।

ततः प्रविशति कामन्दकी मालती लवङ्गिका च ।

काम । [सहर्षमपवार्य ।]

अवचीनं हैमरीमारीरिति मिथः । पदेन पीठेन । वेत्रलता वेत्रदण्डिका । परिचिता रचिता । मण्डल इति । अस्मात् मण्डलात् केनापि न बहिर्गन्तव्य-मिति भावः । दूरत एव मार्गणा दृश्यताम् । पुरुमिन्दुरपुर एव सम्भाराजमलेन अवरुद्धा किङ्किरात्रा चटुला चपला घूर्णती भ्रम्यमाणा वा मथ्यमाना सन्-निर्झरिणीनिरुध्यमाना चलितपत्रावलम्बिनी वा सैवाभरणं तद्वारिणीम् । रात्रिपक्षे नक्षत्रमाला तारकामाला । करिपक्षे कनी सैव राजिताम् । दृश्यमाना चारी मनोहरा चेति समासः । पाण्डुरा धूसरा परिक्षामा अतिकृशा अङ्गदीभिर्यस्याः सा । एतेन चन्द्रकलासाम्यमुक्तम् । दृश्यमाना दृष्टेन चर्येण दर्शनमात्रं तव परमुपनीतो मालत्या इति सूचितम् । पाण्डुरेत्यादिना मालत्यास्तामतर उद्दीप-कत्वः । किञ्चिदन्तरं किञ्चिद्दूरम् । प्रहृता गता । कलधौतटङ्कपत्रेति पाठे टङ्कपत्रं वहिरिवाथः ।

(६) इयमिति । पाण्डुभिः क्षामैः कृशैश्च अवयवैरङ्गैः अलङ्कृतमण्डना भूषिता-लङ्कारा अलङ्कारमपि अलङ्कुर्वतीत्यर्थः । अन्तरभ्यन्तरे परिशोषिणी शोषवती गता कलितकुसुमा धृतपुष्पा लतेवेयं वरारोहा उत्तमाङ्गना मालती रम्यां मनोहरां विवाहमहोत्सवश्रियं वहति च धत्ते च उदयिनीमुत्थितामत एवोत्कण्ठां अभीरां मनोभवं कामोत्कण्ठां व्यनक्ति च ज्ञापयति च । यद्यन्तरशोषि सपुष्पा यथा लता कुत्रचित् देशान्तरात् यथा अन्तः शोषं धारयति तथा मालती अपि इति भावः । कुसुमवत्त्वं तु पुष्पयुक्तत्वं लतासाम्यमतः वाङ्मयाः शेषादिदर्शना ।

* निषादिता उपवेशिता अवतारयाचरितार्थः ।

विधाता भद्रं नो वितरतु मनोज्ञाय विधये,
विधेयासुर्देवाः परमरमणीयां परिणतिम्।
कृतार्थीभूयासं प्रियसुहृदपत्योपयमने,
प्रयत्नः सत्कोऽयं फलतु, शिवदायी च भवतु॥ (७)

मालती। [स्वगतम्।] केण उण उवाएण सम्पदं मरण-णिव्वावणस्स अन्तरं सम्भावइस्सं? मरणम्मि मन्दभाअहेआणं अहिमदेत्ति सुदुल्लहं होदि (क)।

लव। [स्वगतम्।] अतिक्किलाविदा क्खु पिअसही एदिणा अणुऊलविप्पलम्भेण * (ख)।

[प्रविश्य पेटकहस्ता प्रतीहारी।] अमच्चो भअवदीं विण्णवेदि, एदिणा णरिन्दाणुप्पेसिदेण विवाहणेवच्छेण देव-दापुरदो अलङ्करिदव्वा मालदित्ति (ग)।

(क) केन पुनः उपायेन साम्प्रतं मरणनिर्वापणस्यान्तरं सम्भावयिष्ये? मरणमपि मन्दभागधेयानामभिमतमिति सुदुर्लभं भवति।

(ख) अतिक्लामिता खलु प्रियसखी एतेन अनुकूलविप्रलम्भेन च।

(ग) अमात्यो भगवतीं विज्ञापयति, एतेन नरेन्द्रानुप्रेषितेन विवाहनेपथ्येन देवतापुरतोऽलङ्करणीया मालती इति।

---

(७) विधातेति। विधाता स्रष्टा मनोज्ञाय प्रतिकल्पकसुन्दराय विधये विधानाय मङ्गलविधानाय नोऽस्माकं भद्रं वितरतु ददातु इत्याशीरर्थे मङ्गलमत्र चतुर्थी। इतोऽपि विवाहे नृपतिविरोधात् अनिष्टमाशङ्क्य आशीर्वादमाह। देवाः परमरमणीयामतिशोभनां परिणतिं परिणामं विधेयासुः क्रियासुरित्यर्थः। प्रियसुहृदपत्यस्य माधवस्य उपयमने विवाहे अहं कृतार्थी कृतकार्या भूयासं अकृतार्थाः कृतार्थाः सम्पद्यमानाः अभूततद्भावे च्विः। अयं मया क्रियमाणः सत्कः सत्कृतः प्रयत्नः फलतु शिवदायी च कल्याणकारकश्च भवतु।

* अनुकूलो माधवः तेन सह विप्रलम्भः विरहः तेन।

कामन्द। युक्तमाह अमात्यः, माङ्गलिकमेतत् स्थानम् अतो दर्शय।

प्रती। इदं दाव धवलपट्टंसुअजुअलं, इदं च उत्तरीअं रत्तपट्टंसुअं इमे अ सव्वङ्गिआ आहरण-सञ्जोआ, अअं च मोत्तिआहारो, एदं चन्दणं, कुसुमापीडं अ (ज)।

कामन्द। [अपवार्य।] रमणीयं हि वत्समकरन्दम् अवलोकयिष्यति मदयन्तिका। [प्रकाशं गृहीत्वा।] भवतु ओम् इति उच्यताममात्यः।

प्रतिहारी। तथा।

इति निष्क्रान्ता।

कामन्द। वत्से लवङ्गिके! प्रविश त्वम् अभ्यन्तरं वत्सया मालत्या सह।

लव। अध भअवदी उण कहिम्? (झ)

कामन्द। अहमपि तावद्विविक्ते अलङ्करणरत्नानां प्रामाण्यं साक्षात् परीक्षिष्ये। [इति निष्क्रान्ता।]

माल। [स्वगतम्।] कधं, लवङ्गिआमेत्तपरिवारह्मि संवुत्ता। (ञ)

लव। इदं देवदामन्दिरदुआरं ता पविसह्म। (ट)

[इति प्रविशतः।]*

मक। वयस्य! इतः स्तम्भापवारितशरीरौ तिष्ठावः।

(ज) इदं तावद्धवलपट्टांशुकयुगलं इदमुत्तरीयं रक्तपट्टांशुकम्, इमे च सर्वाङ्गिका आभरणसंयोगाः, अयञ्च मौक्तिकाहारः, इदं चन्दनं कुसुमापीडश्च।

(झ) अथ भगवती पुनः क?

(ञ) लवङ्गिकामात्रपरिवारास्मि संवृत्ता।

(ट) एतद्देवतामन्दिरद्वारं तत् प्रविशावः।

[तथा कुरुतः ।]

लव । सहि ! अअं अङ्कराओ, इमाओ कुसुममालाओ । (ट)

माल । तदो किं ? (ड)

लव । सहि ! इमस्सिं पाणिग्गहणमङ्गलारम्भे, कण्णकसम्पत्तिणिमित्तं देवदाओ पूजेहित्ति, अम्बाए अणुप्पेसिदामि (ढ) ।

माल । किं दाणिं दारुणममारम्भदेव्वदुव्विलासपरिणामदुःखणिद्दड्ढमाणसं पुणो पुणो वि मम्मच्छेअदुःसहं मन्दभाइणीं कुणासि (ण) ।

लव । अह किं अणुकामासि ? (त)

माल । जं दाणिं दुल्लहाहिणिवेसिमणोरहविसंवदन्तभाअधेओ * जणो मन्तेदि (थ) ।

मक । सखे ! श्रुतम् ।

माध । श्रुतमसन्तोषस्य हृदयस्य ।

माल । [लवङ्गिकां परिष्वज्य ।] ता, परमत्थवच्छलि पिअ-

(ट) सखि ! अयमङ्गराग इमाः कुसुममालाः ।

(ड) ततः किम् ?

(ढ) सखि ! अस्मिन् प्राणिग्रहणमङ्गलारम्भे, कन्यकासम्पत्तिनिमित्तं देवताः पूजयेति, अम्बया अनुप्रेषितास्मि ।

(ण) किमिदानीं दारुणमारब्धदैवदुर्विलासपरिणामदुःखनिर्दग्धमानसां पुनः पुनर्मर्मच्छेददुःसहां मन्दभागिनीं करोषि ।

(त) अथ किमसि अनुकामा ?

(थ) यदिदानीं दुर्लभाभिनिवेशिमनोरथविसंवदद्भागधेयो जनो मन्त्रयते ।

---

* दुर्लभे माधवे अभिनिवेशिनः मनोरथस्य विसंवदत् प्रतिकूलं भागधेयं भाग्यं यस्य सः । बहुव्रीहिः ।

सहि लवङ्गिए ! एसा दाणिं दे पिअसही अणाहा, मरणे वट्टमाणा आगब्भ-णिम्मम-णिब्भिद-णिरन्तरोपआर-णिक्कड-वीसम्भ-सरिसं परिस्सइअ तुमं पत्थेदि, जइ दे अहं अणुवट्टणीआ,* तदो मं हिअएण धारअन्ती, समअ-सोहग्ग-लच्छीपरिग्गहेक्क-मङ्गलं माहवसिरिणो मुहारविन्दं आणन्दमसिणं अवलोअइस्ससि (द)

इति रोदिति ।

माध । वयस्य मकरन्द !

आनन्द्य जीवकुसुमस्य विकाशनानि,
सन्तर्पणानि सकलेन्द्रियमोहनानि ।
आनन्दनानि हृदयैकरसायनानि,
दिष्ट्या मयाप्यधिगतानि वचोऽमृतानि ॥ (८)

(द) सख्यरमार्थभगिनि प्रियसखि लवङ्गिके ! एषा इदानीं ते प्रियसखी अनाथा, मरणे वर्त्तमाना, आगर्भतो निरन्तरोपकारविकटविस्रम्भसदृशं परिष्वज्य त्वां प्रार्थयते, यदि ते अहमनुवर्त्तनीया ततो मां हृदयेन धारयन्ती समयसौभाग्यलक्ष्मीपरिग्रहैकमङ्गलं माधवश्रियो मुखारविन्दम् आनन्दमसृणमवलोकयिष्यसि ।

---

* अनुवर्त्तनीया उपचरणीया ।

(८) आनन्द्यन्त्यादि । यथाभिलषितानि मयापि दिष्ट्या निपीतानि । तथा मुरलिकादिना निपीतानि मया तु अनुमितिमपि पदार्थः । अमृतमुपलक्षणम् । आनन्द्य प्रकाशाभावप्रायेण सञ्जीवितस्य जीवकुसुमस्य विकाशनानि प्रकाशनानि । अमृतेऽपि सर्वप्रकाशकतया आमकुसुमप्रकाशकत्वम् । सन्तर्पणानि तृप्तिकराणि । अमृतेऽप्येवम् । सन्तर्पयन्ति इति सर्वेन्द्रियसन्तर्पणानि । अमृतेऽप्येवम् । आनन्दनानि आनन्ददायकानि । आयतौ आजीवति अनेनेत्यायतनम् । रसायनं रसायनम् । यथा पितौषधादिकमिव अमृतमञ्जनादिव अमृतस्य अगदादिवासनमिव मन्मथजनार्दिदमिति भावः । अमृत । अमृतपदेन अवलोकपीयूषाणि वचनानि । महाकाव्यपदेन अमृतस्य । जीवनाभावजनितपरपदमयम् । लोके हि सम्यक्दर्शिविषये

माल । जहा तस्स जीविदप्पदाइणो जणस्स, पज्जसिदेत्ति मं सुणिअ सन्तप्पमाणस्स, तं तहाविहं सरीररअणं ण परिहीअदि, जधा अ परलोअगदं पि मं उद्दिसिअ सो जणो संस्सरणकधामेत्तपरिसेसं कालन्तरेवि लोअजत्तं ण सिढिलेदि तधा करेसि । एवं ज्जेव पिअसहीए पसादादो मालदी किदत्था भोदि (थ) ।

मक । हन्त ! अतिकरुणं वर्त्तते ।

माध । नैराश्यकातरधियो हरिणेक्षणायाः
श्रुत्वा निकाममकरुणस्य मनोहरस्य ।
वाक्यस्य मोहपरिदेवितसुन्दराणि,
चिन्ताविषादविपदस्य महोत्सवस्य ॥ (८)

लव । अइ ! पडिहदं दाणिं दे अमङ्गलं ण अदोवि अधिअदरं सुणिस्सम् । (न)

(थ) यथा तस्य जीवितप्रदायिनो जनस्य पर्य्युषितेति मां श्रुत्वा सन्तप्यमानस्य, तत्तथाविधं शरीररत्नं न परिहीयते, यथा च मां परलोकगतामप्युद्दिश्य स जनः संस्मरणकथामात्रपरिशेषो कालान्तरेऽपि लोकयात्रां न शिथिलयति, तथा करिष्यसि, एवमेव प्रियसखीप्रसादात् मालती कृतार्था भवति ।

(न) अयि प्रतिहतम् इदानीं ते ऽमङ्गलम् । नातोऽप्यधिकतरं श्रोष्यामि ।

निराशाकुलेव । इन्द्रियमोहेऽपि विषयग्रहणाभावात् । आनन्दं प्रकर्षो हर्षं तत्र मोहे प्रतिष्ठितम् । इति श्रुतेरानन्दजनकता मोहे । यद्वा । वाक्यपदाभ्यां जनतामञ्जितपदाभ्यां मोहपदाभ्याम् । पीयूषाभ्यामर्द्धे मिथपदम् । [illegible] मोह- मोहपरिदेवितं श्रुतेऽपि चेति चरितः ।

(८) नैराश्येति । नैराश्येन दुराशया कातरा आकुला धीः अन्तःकरणं यस्यास्तस्या हरिणेक्षणाया मालत्या निकाममकरुणस्य दयापरिशून्यस्य मनोहरस्य वाक्यस्य मोहपरिदेवितं वाक्यस्य मोहजनितविलापं श्रुत्वा चिन्तया विषादेन च या विपद् तां महोत्सवमानन्दस्य [illegible] वयं ।

• •

माल। सहि! पिअं क्खु तुम्हाणं मालदीजीविदं, ण उण मालदी। (प)

लव। किं एव्वं भणिदे भोदि। (फ)

माल। [आत्मानं निर्दिश्य।] जेण अम्मजणपच्चामाणिबन्धणेहिं वअणसंविहाणेहिं जीआविअ इमं ज्जेव्व महावीभच्छारम्भं अणुभाविदह्मि, सम्पदं उण मम मणोरहो एसो ज्जेव्व जं तस्स देवस्स परोक्खगुणकित्तणेण अणवरदं अत्ताणं परिच्चइस्संति, ता, इमस्सिं पओअणे पिअसही मे अपरिपन्थिणी होदु (ब)।

इति पादयोः पतति।

मक। सैषा सीमा स्नेहस्य।

लवङ्गिका। माधवं संज्ञया समाह्वयति।

मक। वयस्य! उपसृत्य लवङ्गिकायाः स्थाने तिष्ठ।

माध। वयस्य! परवानस्मि साध्वसेन।

मक। इयमेव नेदीयसां प्रकृतिरभ्युदयानाम्।

माधवः। धीरं लवङ्गिकास्थाने तिष्ठति।

माल। सहि! करेहि अणुऊलदाए पसादं (भ)।

(प) सखि! प्रियं खलु युष्माकं मालतीजीवितं न पुनर्मालती।

(फ) किमेवं भणिते भवति।

(ब) येन अम्बजनप्रत्याशानिबन्धनैर्वचनसंविधानैर्जीवयित्वा इममेव महाबीभत्सारम्भमनुभाविताऽस्मि। साम्प्रतं पुनर्मम मनोरथ एष एव यत्, तस्य देवस्य परोक्षगुणकीर्त्तनेन अनवरतमात्मानं परित्यक्ष्यामीति। तदस्मिन् प्रयोजने प्रियसखी मे अपरिपन्थिनी भवतु।

(भ) सखि! कुरु अनुकूलतया प्रसादम्।

माध। सरले! साध्वसरागं परिहर, रम्भोरु! मुञ्च संरम्भम्।

विरसं विरहायासं, सोढुं तव चित्तमसहं मे ॥ (१०)

माल। सहि! अणुग्गहीदो क्खु दे मालदीप्पणामो। (म)

माध। सहर्षं। किं वा भणामि विच्छेददारुणायासकारिणि!

कामं कुरु वरारोहे! देहि मे परिरम्भणम् ॥ (११)

माल। [सहर्षम्।] कधं अणुगहीदम्हि। [उत्थाय।] इमं आलिङ्गामि। दंसणं उण पिअसहीए बाप्फोपीडिअं णिरुद्ध पच्चक्खं च ण्णोअदि। * [आलिङ्ग्य सानन्दम्।] सहि!

(म) सखि! अनुगृहीत एव ते मालतीप्रणामः।

(य) कथमनुगृहीतास्मि। इयमालिङ्गामि। दर्शनं पुनः प्रियसख्या बाष्पोत्-

(१०) माधवस्य संस्कृतभाषया अवहित्थामसौ न ज्ञास्यतीति भाषासमावेश- माह। सरले इत्यादि। साध्वसं आत्मनिरपेक्षकार्यं रागमनुरागं परिहर। हे रम्भोरु! हे कदलीस्तम्भोरु! संरम्भं मदर्थे त्वरां त्यज जीवन्त्यां प्रव्राजिकायां ज्ञास्यतीति भावः। विरसं दुःसहं तव विरहायासं विरहदुःखं सोढुं मे चित्तम् असहम् अक्षमम्। यतोऽयं बहुमत्यपि बहुतः अतस्तत्र मदर्थाभिनिवेशमिति अवहित्थाभिप्रायः। अत एव सरले अत्र अनुरक्तेति वा। मालतीपक्षे हे सरले! अज्ञासि तव विरहायासं सोढुं मे चित्तमसहमतएव समीपमागतोऽस्मि तत्परत्वं त्यज। इत्यादि समानम्। अहिह संस्कृतप्राकृतयोः साम्यात् प्राकृतसमत्वम्।

(११) किं वेत्यादि। किं वा भणामि। सहाराभिनिवेशं न करोमीत्यर्थः। हे विच्छेददारुणायासकारिणि! हे विरहदुःखकष्टकारिणि! हे वरारोहे! सुश्रोणि! कामममीष्टं कुरु। कथं तदा भणामि किं देवीति अवहित्था- पक्षे। मालतीपक्षे तु किं वा भणामि किं वक्तव्यम्, कामं कामव्यापारं कुरु। अतः परिरम्भणं देहि। आरोहः श्रोणिकाञ्चीरिति अमरः। श्रोण- र्वक्रिमं श्रोणिका। वराश्च आरोहाः यस्याः सा वरारोहा: इत्यमरः। अत्रत्यं निकटवासा: संस्कृताद्यनुगता।

* अत्र उभयोः एकीभूय विलंबः। उभयोः समूहो वा। पठितं भवतम्।,

कठोरकमलगब्भपम्हलो अम्हारिसो ज्जेव्व दे अज्ज णिव्वावेदि मं सन्तप्पमाणं पिअसहीए सरीरप्फंसो । [साम्रम् ।] किञ्च, मउलिविणिवेसिदञ्जली मम वअणेण विण्णावेसि तं जणं, जधा, ण मए मन्दभाइणीए, विअसन्तपुण्डरीअलच्छीविलासहारिणो संपुण्णचन्दमण्डलाहिरामस्स मुहस्स दे सच्छन्ददंसणेण सम्भाविदो चिरं मणोरहो लोअणाणं । सुधामणोरहेहिं अ अविरदविअम्भमाणदुव्वारव्वं पज्जलन्तमाणवम्महं धारिअं हिअअम् । गमिदा अ वारंवारं सविसेसदूसहा अण्णदूसणाइणसंहीअणा सरीरसन्दावा, कधंवि चदिवाहिदा चन्दादवमलअमारुदप्पसुहा अणत्थपरम्परा, सम्पदं उ

पीडेन निवहं पथिमं न लभ्यते । सखि ! कठोरकमलगर्भपक्ष्मलः अस्मादृश एव ते अद्य निर्वापयति मां सन्तप्यमानां प्रियसख्याः शरीरस्पर्शः । किञ्च मौलिविनिवेशिताञ्जलिर्मम वचनेन विज्ञापयिष्यसि तं जनं, यथा, न मया मन्दभाग्यया, विकसत्पुण्डरीकलक्ष्मीविलासहारिणः सम्पूर्णचन्द्रमण्डलाभिरामस्य मुखस्य ते स्वच्छन्ददर्शनेन सम्भावितश्चिरं मनोरथो लोचनानाम् । सुधामनोरथैश्च अविरतविजृम्भमाण दुर्वारैर्दह्यमानविकरोदरसंमानमन्मथं धारितं हृदयम् । गमिताश्च वारंवारं सवि-

---

विवक्षमोहावाप्तात् वर्णनम् । कठोरकमलगर्भो बीजकोशः । पक्ष्मलो रोमा-वलीमान् । अस्मादृश एव अनुभूतपूर्वोऽस्मद्विधमो न अन्यानुभूतस्पर्शतुल्यः । निर्वापयति तापं शमयति । तथा तादृशः स्पर्शः अन्यविषयोऽप्यत्र नेति निर्वेदात् व्याकुला । मण्डलपदं संपूर्णत्वार्थम् । चिरमित्यनेन स्वाधीनभर्तृकात्व-सूचनम् । सुरताहितवैर्थ्यता वहः पार्श्वगतः प्रियः । स्वामीदृग्वशंगामा भवेत् स्वाधीनभर्तृका । विधिर दुःखं सुखी भवेदिति पूर्वानुभूतदुःखं निवेदयति । अविरतेत्यादि । अविरतं विजृम्भमाणस्य दुर्वारस्य उद्वेगस्य व्यतिकरेण सम्पर्केण उद्वर्तमानमुच्च चित्तं पक्षनं जीवं यस्य तत् । गमितेत्यादिना व्याख्यस्तीका ।

चिरासाम्हि संवुत्तेति, तुएवि पिअसहीए सव्वदा सुमरिदव्वम्हि। एसा अ सिरिमाहवसहत्थविणिम्मिअमणोहरा बउलमाला मालदीजीविदणिव्विसेसं पिअसहीए दट्ठव्वा सव्वधा हिअए धारणीएत्ति (य)। *

स्वकण्ठादपनीय माधवस्य हृदि विन्यस्यन्ती सहसा चपलया साध्वसौत्सुक्यं नाटयति।

माध। [अपवार्य।] हन्त!

एकीकृतस्त्वचि निषिक्त इवावपीड्य
निर्भुग्नपीनकुचकुड्मलया नया मे।
कर्पूरहारहरिचन्दनचन्द्रकान्त-
निष्यन्दशैवलमृणालहिमादिवर्गः ॥ (१२)

---

* अतः दुःसहदुर्मनायितसखीजनाः शरीरसन्तापाः, अतएव अतिवाहिताः चन्द्रातपमलयमारुतप्रमुखा अनर्थपरम्पराः, साम्प्रतं पुनर्निराशास्मि संवृत्ता इति, त्वयापि प्रियसख्या सर्वदा स्मर्तव्यास्मि। एषा च श्रीमाधवस्वहस्तनिर्माणमनोहरा बकुलमाला मालतीजीवितनिर्विशेषं प्रियसख्या द्रष्टव्या, सर्वथा हृदये धारणीया इति।

अतिवाहिता अतिक्रान्ता। चन्द्रातप इति तापकारित्वादातपः। एतेषा-मनर्थत्वमाह भरतः। सर्वाणि ये सुखं कुर्युस्ते दुःखं विरहे ध्रुवम्। इति। असंलक्ष्येन कृतव्यभिचारिभावं मरणमाह। यदाह। व्यभिचारिणोऽत्र, निर्वेदो ग्लानिमरणव्याधिदैन्यमुखादयः। व्यभिचारिणोऽत्र, निर्वेदो ग्लानिमरणव्याधिदैन्यमुखादयः। नैराश्याच्च मरणोद्यमः। यदाह। सर्वैरेतैः प्रकारैर्यदि नास्ति समागमः। कामाग्निना प्रदीप्तायाः जायते मरणं ततः। विप्रलम्भकथान्तरं ग्लानिः प्रकारोपक्रममाह। एषा चेति। साध्वसं भयम्।

(१२) एकीति। निर्भुग्नपीनकुचकुड्मलया कुञ्चितपीनकुचमुकुलया अनया मालत्या ह्रवर्गः। कर्पूरहारहरिचन्दनचन्द्रकान्तानां निष्यन्दः द्रवः तथा शैवल-

माल। [स्वगतम्।] अम्हो! लवङ्गिआए मालदी विप्पलद्धा। (र)

माध। अयि! स्ववेदनामात्रनिवेदिनि! परव्यथानभिज्ञे! इयमुपालभ्यसे।

उद्दामदेहपरिदाहमहाज्वराणि,
सङ्कल्पसङ्गमविनोदितवेदनानि।
त्वत्स्नेहसंविदवलम्बितजीवितानि,
किं वा मयापि न दिनान्यतिवाहितानि?॥ (१३)

लव। सहि! उवालम्भणिज्जेव उवालद्धासि। (ल)

कल। अम्हो! सरसरमणीअदा संविहाणस्स। (व)

(र) अहो लवङ्गिकया मालती विप्रलब्धा।

(ल) सखि! उपालम्भनीयैवोपालब्धासि।

(व) अहो सरसरमणीयता संविधानस्य। संविधानकं नायिकासङ्गम-प्रकारः।

स्वाङ्गिकादीनां वर्णो राशिः एकीकृतः सन् मे मम त्वचि अवयवे अवपीड्य निपीड्य निखात इव कीलित इवेत्युत्प्रेक्षा।

(१३) आत्मानुरागप्रकाशनाय अनुभूतवेदनामाह। अयीति उद्दामेत्यादि। एतादृशानि दिनानि मयापि किं वा न अतिक्रान्तानि। अपि तु अतिक्रान्तान्येव। किं वेति प्रश्नावधारणायाम्। यथा। किं निषेधे वा प्रश्ने। कीदृशानि दिनानि। उद्दाम उत्कटो देहपरिदाह एव महाज्वरो येषु तानि। एतेनोद्वेग उक्तः। सङ्कल्पसङ्गमेन मानसिकसङ्गमेन विनोदिता अपनीता वेदना व्यथा येषु तानि। अनेन उन्माद उक्तः। यदाह। यत्र यथार्थं मनसं सङ्कल्पाकल्पिते प्रिये। निवृत्तिः स्वप्नाद्यभिलाषादि हि प्रजायते॥ यथा। सङ्कल्पसङ्गमेनाप्यजीविषः सुचिरदेन च निःश्वसीमन्यमाहरयीमनाह। यदाह। आवर्ति वा दर्शयेत् सुखमनुभवत-कैवल्यमपि वा सर्ववेदिति। त्वत्स्नेहसंविदा त्वदीयवृत्तान्तेन अवलम्बितं धीरं यत्र तेषु तानि। उपलब्धिस्त्वत्स्नेहसंविदित्यमरः।

मक। महाभागे ! एवमेतत्।

त्वं वत्सलेति कथमप्यवलम्बितात्मा,
सत्यं जनोऽयमियतो दिवसाननैषीत्।
आबद्धकङ्कणकरप्रणयप्रसाद-
मासाद्य, नन्दतु चिराय, फलन्तु कामाः॥ (१४)

लव। महाणुभाव! हिअए वि अपडिहदसअंगाहसाहसो अअं जणो, किं दाणिं कङ्कणाभरणं करं विआरेदि महाभाओ (अ) ?

माल। [स्वगतम्।] हा धी! हा धी हदम्हि, कण्णआजणविरुद्धं किम्पि एसा उवण्णसदि (प)।

प्रविश्य कामन्दकी। पुत्रि ! कातरे ! किमेतत् ?।

मालती। कम्पमाना कामन्दकीमालिङ्गति।

काम। तथाविधमेव उन्नमय्य।

पुरस्तादुरागस्तदनु मनसोऽनन्यपरता,
तनुग्लानिर्यस्यास्त्वयि समभवद्यत्र च तव।

(अ) महानुभाव! हृदयेऽपि अप्रतिहतस्वयंग्राहसाहसोऽयं जनः किमिदानीं कङ्कणाभरणं करं विचारयति महाभागः। अप्रतिहतः परिगृहीतः स्वयं ग्राहसाहसः येन सः अयं जनः मालती। त्वं मालत्याः करं सहसा गृहाण इति तात्पर्यम्।

(प) हा! हा धिक्! हा धिक्! हतास्मि, कन्यकाजनविरुद्धं किमपि एषा उपन्यस्यति।

---

(१४) त्वमित्यादि। त्वं वत्सला सर्वं मा इति हेतोरयं जनो माधवो विधृत-जीवितः सन् एतावतो दिवसान् कथमप्यनैषीत् नीतवान्। अत आबद्धकङ्कणो कृत-विवाहसूत्रो इव विमुक्तो या यः करस्तस्य प्रणयो विवाहस्वीकृतिः तद्रूपं प्रसाद-मासाद्य प्राप्य नन्दतु। चिराय बहुकालम् कामाः अभीष्टाः मनोरथाः फलन्तु। सफलं भूयासुः इति शिवः।

(१५) पुर इति। पुरः आदौ अनुरागो नेत्रप्रीतिः तदनु तदनन्तरं मनसः

युवा सोऽयं, प्रेयानिह सुवदने! मुञ्च जडताम्
विधातुर्वैदग्ध्यं विलसतु, सकामोऽस्तु मदनः ॥ (१५)

लव। भअवदि! कमणअचउद्दसीरअणीमसाणसञ्चरण-णिव्वत्तिदविसमव्ववसाअणिट्ठाविअघोरघण्टपअण्डदोद्दण्ड-साहसो साहसिओ क्खु एसो, जदो मे पिअसही उक्क-म्पिदा (क)।

मक। [स्वगतम्।] साधु लवङ्गिके! साधु, अवसरे खलु अनुरागोपकारयोर्गरीयसोः उपन्यासः।

माल। हा ताद! हा अम्ब! (ख)

काम। वत्स माधव!।

माध। आज्ञापय।

काम। इयम् अग्रेपसामन्तमस्तकोत्तंसपरागरञ्जितचरणाङ्गुलिः अमात्यभूरिवसोः एकम् अपत्यरत्नं मालती, भगवता सहृदयसंयोगरसिकेन वेधसा, मन्मथेन, मया च, तुभ्यं प्रदीयते। [इति रोदिति।]

मक। फलितं हि अस्माकं भगवतीपादप्रसादेन।

(क) भगवति! कृष्णचतुर्दशीरजनीश्मशानसञ्चरणनिर्वर्त्तितविषमव्यवसायनिष्ठापितघोरघण्टाप्रचण्डदोर्दण्डसाहसः साहसिकः खलु एषः, यतो मे प्रियसखी उत्कम्पिता। विषमव्यवसायः महामांसविक्रयः। निष्ठापितः निहतः। घोरघण्टः अघोरघण्टः। साहसिकाद्धि भयं भवति अतः मे सखी मालती उत्कम्पिता।

(ख) हा तात! हा अम्ब!

चित्तस्य अनन्यपरता एकायत्तत्वम्। यस्य त्वयि, तव च यत्र तत्सुन्दराविदग्धविवादः अभवत् अधुना प्रेयान् प्रियतमः सोऽयं युवा माधवः इह अत्र विद्यते इति शेषः। हे सुवदने! सुमुखि! जडतां लज्जाम् मुञ्च त्यज, विधातुर्वैदग्ध्यं चातुर्यं विलसतु मदनः कामः सकामः सफलमनोरथोऽस्तु।

माध । तत्किमिति वाध्यायितं भगवत्या ? ।

काम ।

[चीवराञ्चलेन नेत्रे परिमृज्य ।]

विज्ञापयामि कल्याणिनम् ।

माध । ननु आज्ञापय ।

काम । परिणतिरमणीयाः प्रीतयस्त्वद्विधानाम्
अहमपि तव मान्या हेतुभिस्तैश्च तैश्च ।
तदिह सुवदनायां तात ! मत्तः परस्तात्
परिचयकरुणायां सर्वथा मा विरंसीः ॥ (१६)

इति पादयोः पतितुमिच्छति ।

माध । [निवारयन् ।] अहो ! वात्सल्यादतिक्रामति प्रसङ्गः ।

श्लाघ्यान्वयेति, नयनोत्सवकारिणीति,
निर्व्यूढयौवनभरेति गुणोज्ज्वलेति ।
एकैकमेव हि वशीकरणं गरीयो
युष्माकमेवमियमित्यथ किं ब्रवीमि ? ॥ (१७)

---

(१६) परीति । तात ! वत्स ! पुत्रे पितरि पूज्ये च तातशब्दः प्रयुज्यते इति शब्दार्णवः । त्वद्विधानां गुणिविद्यादिसम्पन्नानामित्यर्थः प्रीतयः परिणतिरमणीयाः परिणामसुखदायिका इत्यर्थः । तैस्तैः रमणीयप्रीतिप्रतिपादकैः इति यावत् हेतुभिर्निमित्तैः अहमपि तव मान्या माननीया संवृत्तास्मीति भावः । तत् तस्मात् मत्तः परस्तात् मयि मृतायां सत्यामित्यर्थः । परिचयकरुणायां परिचयमात्रेणैव दयापात्रमिव सुवदनायां मालत्यां सर्वथा मा उपरंसीर्विरतो मा भव । मदेतावता अत्र विषयवचनावरोपेण सुखेन स्थास्यामि इत्यर्थः ।

(१७) श्लाघ्येति । श्लाघ्यान्वया उच्चवंशोद्भवेति नयनोत्सवकारिणी नेत्रानन्दजननीति, निर्व्यूढयौवनभरा उपचितयौवनभरेति गुणोज्ज्वला शीलादिमती इति इयं मालती भवति इत्यर्थः । एतादृशगुणानां मध्ये एकैकमेव हि

काम । वत्स माधव !

माध । आज्ञापय ।

काम । वत्से मालति !

लव । आणवेदु भअवदी । (ख)

काम । प्रेयो मित्रं, बन्धुता वा समग्रा,
सर्वे कामाः शेवधिर्जीवितञ्च ।
स्त्रीणां भर्त्ता, धर्मदाराश्च पुंसाम्
इत्यन्योन्यं वत्सयोर्ज्ञातमस्तु ॥ (१८)

मक । अथ किं ।

लव । भअवदि ! जधा तुह्मे आणवेध । (क)

काम । वत्स मकरन्द ! त्वमनेनैव वैवाहिकेन मालती-नेपथ्येन प्रसाधितः, परिणायय आत्मानम् ।

[इति पेटिकामर्पयति ।]

(ख) आज्ञापयतु भगवती ।

(क) भगवति ! यथा त्वम् आज्ञापयसि ।

एकैकम् एव गरीयो गुरुतरं वशीकरणं मन्त्रौषधादिना वश्यतानयनोपायः यथाक्रमम् इयमेव मालती प्रियतमा इति प्रेयः इति हेतोः किं ब्रवीमि अतः परं न मे बहु वक्तव्यमस्ति ।

(१८) प्रेय इत्यादि । वत्सयोर्मालतीमाधवयोरन्योन्यमेतदिदितमस्तु यत् स्त्रीणां भर्त्ता प्रेयः प्रियतमं वस्तु मित्रं सुहृद् समग्रा बन्धुता बन्धुसमूहः सर्वे कामाः ईप्सिताः शेवधिर्निधिर्जीवितं च । पुरुषाणां धर्मदाराः पाणिगृहीताः प्रेय इत्यादि । बन्धुरेव बान्धवबन्धुजनाविभ्यस्तलिति समूहे तल् । निधिर्ना शेवधिरित्यमरः । अनेन काव्यसंहितादौ दर्शितः । स चानुरागसूचकाद्भवति । यदाह । अनुरागाख्यलिङ्गेन काव्यर्थः शेखरो बुधः । इति ।

मक। यदाज्ञापयति भगवती, यावदितश्चित्रजवनिका-भ्यन्तरीय नेपथ्यं धारयामि। [तथा करोति।]

माध। भगवति! सुलभवञ्चनर्थम् अतिसङ्कटम् इदं वयस्यस्य।

काम। वत्स: कस्त्वमस्यां चिन्तायाम्?।

माध। एवं भगवती एव जानाति।

[प्रविश्य मकरन्दः। विहसन्।] वयस्य! मालती अस्मि।

[सर्वे सकौतुकं पश्यन्ति।]

माध। [मकरन्दं परिष्वज्य, सोपहासम्।] भगवति! कृतपुण्य एव नन्दनो, यः प्रियामीदृशीं मनसा मुहूर्त्तमपि कामयिष्यते।

काम। वत्सौ मालतीमाधवौ! इतो निर्गत्य, दृष्टगह्वनेन गम्यताम् उद्वाहमङ्गलार्थम् अस्मद्विहारिकायाः पश्चादुद्यानवाटः सुविहितं च तत्रैव वैवाहिकं द्रव्यजातम् अवलोकितया। भूयश्च

गाढोत्कण्ठकठोरकेरलवधूगण्डावपाण्डुच्छदैः
ताम्बूलीपटलैः पिनद्धफलिनव्यानम्रपूगद्रुमाः।

---

(१८) गाढेत्यादि। तद्रूपा माया उद्यानवाटिकायाः प्रदेशा वा युवतीः इव: मङ्गलादिकं विधाकलिं मङ्गलात्मोपवनविहारसम्बन्धात्। यदाह। उप-वनगमनविहारैः शृङ्गाररसः समुद्भवति। भुवः प्रदेशाः कोट्टिमाः। ताम्बूली पर्णलता तस्याः पटलैः समूहैः पिनद्धा वेष्टिताः फलिनः फलयुक्ता अतएव आनम्रा: आनताः पूगद्रुमाः क्रमुकवृक्षा येषु तैः। कोट्टिमैः ताम्बूलीपटलैः। गाढा उत्कण्ठा यस्याः सा च कठोरा वनीवर्त्मीपनवधाः केरलदेशवधूजना: तद्वत् कपोलवदनपाण्डुरीभूतच्छदः पर्णं येषां तैः। रतिरहस्योक्तिः इयं प्रतिपत्तिसूचिका गुणाया च। अनियतवर्णविपर्ययिता सा विम्बिका क्रमीया तु।

कक्कोलीफलजग्धिमुग्धविकिरव्याहारिणस्तद्गिरे
भागा: प्रेङ्खितमातुलुङ्गवृतय:, प्रियो विधास्यन्ति वाम्॥१८॥

गत्वा च तत्रैव मकरन्दमदयन्तिकागमनं यावत् स्थातव्यम्।

माध। [सहर्षम्।] कल्याणान्तरावर्तमाहि कल्याणसंपदुपविष्टा भवति।

कल। दिट्ठिआ एदम्पि णो भविस्सदि। (ख)

माध। कथं सन्देह एवात्रभवत:।

लव। सुदं पिअसहीए। (ग)

काम। वत्स मकरन्द! वत्से लवङ्गिके! इत इत: प्रतिष्ठामहे।

माल। सहि! तुए वि गन्तव्वं? (घ)

(ख) दिष्ट्या एतदपि न: भविष्यति।

(ग) श्रुतं प्रियसख्या।

(घ) सखि! त्वयापि गन्तव्यम्।

इति भरत:। अत एव तत्कण्ठाविकलम्। कैरवदेवबलेन गौरत्वमुक्तम्। अत: पीतिमसम्बन्धात् ईषत्पाण्डुरत्वम्। यदाह। सितपीतसमायोगात् ईषत्पाण्डुरिति स्मृत:॥ पिनद्धेति यदि मातुरिदानीमपि कथम्। [illegible] इति [illegible]। तथा कक्कोलीफलस्य जग्ध्या भक्षणेन मुग्धा: [illegible] ये विकिरा: पक्षिविशेषा: [illegible] उच्चैर्व्याहरन्ते। कक्कोली बदरी [illegible]। भूमिं नखैर्विलिख्य ये चरन्ति ते विकिरा:। [illegible] इत्यमर:। [illegible]। व्याहार उक्तिर्लपित- मित्यमर:। तथा प्रेङ्खिता [illegible] मातुलुङ्गैर्निर्वेष्टनं येषु ते। तथा [illegible] सर्वमनोरथसिद्धिर्भविष्यतीति भाव:। मातुलुङ्गो [illegible]। [illegible] मातुलुङ्गक इत्यमर:।

लव। [विहस्य।] संपदं क्खु वअं एत्थ तुवरामो। (ङ)

इति निष्क्रान्ता कामन्दकीलवङ्गिकामकरन्दाः।

माध। अयमहमिदानीं

आमूलकण्टकितकोमलबाहुनाल-
माद्राङ्गुलीदलमनङ्गनिदाघतप्तः।
अस्याः करेण करमाकलयामि कान्त-
मारक्तपङ्कजमिव द्विरदः सरस्याः॥ (२०)

इति निष्क्रान्ताः सर्वे। मालतीमाधवे मालतीचौरिकाविवाहो नाम षष्ठोऽङ्कः।

(ङ) साम्प्रतं खलु वयमत्र त्वरामहे।

---

(२०) आमूलेति। अनङ्ग एव निदाघः ग्रीष्मः तेन तप्तः द्विरदो हस्ती इव आमूलं मूलपर्यन्तं कण्टकितः सञ्जातकण्टकः रोमाञ्चितश्च कोमलबाहुरेव नालदण्डो यस्य तं, आर्द्राः स्विन्ना अङ्गुलय एव दलानि यस्य तं अस्या मालत्याः कान्तं ललितं करं सरस्याः सञ्जातमारक्तपङ्कजं द्विरद इव अहं करेण पाणिना च आकलयामि गृह्णामीति यावत्। अत्र समस्तवस्तुविषयसाङ्गोपमालङ्कारः।

सप्तमोऽङ्कः ।

—:०:—

तत: प्रविशति बुद्धरक्षिता । (१)

बुद्ध । अम्महे सुमिलिट्ठमालदीणेवच्छलच्छीविप्पलद्ध णन्दणाकिदकरग्गहो अमच्चभूरिवसुमन्दिरे भअवदीवअणसंविहाणेहिं खेमेण गोवाइदो मअरन्दो । अज्ज अज्ज वि णन्दणावासं उवगदा । तदो भअवदी णन्दणमापुच्छिअ गदा आवसहं । अहं च णववहूप्पवेसविरइदाकालकोमुदीमहूसवप्पउत्तिपज्जाउलासेसपरिअणे पदोसे अणुऊलरच्छादि अज्ज णो अवसिदं । सम्पदं तुवरन्तकामो कामिणिं कामदु बहुसो मणादवन्दणं अब्भत्थिअ पुणो वि बलामोडिअ परिहरन्तो मअरन्देण णिट्ठुरं पडिहदो आमादा । तदो सो क्खु पवि-पवेलअक्खलन्तपअक्खरो सरोसणीअभरदु:क्खिदो मदप्पप्फुरन्त-

(१) अधुना मालतीरूपधारिणा मकरन्देन कथं नन्दनविप्रलम्भो मदयन्तिकाहरणं च कृतं भवेदिति तदभिधानाय नियुक्तैव तत्र कामन्दकिना प्रव-आहमुचितबुद्धरक्षिताप्रवेशः ।

(२) अत्र मालतीविवाहनिर्वाहणावर्णनयोर्ऽवसानम् । सुश्लिष्टं मकरन्दस्य शरीरादङ्गप्रत्यङ्गाविना मालतीवेशात् । अवतरीति अवयवैवाङ्गस्य प्रविश रणम् । वैवेन कुप्रवेन एतत्तु वैनायकमुपपत्तम् भीयाविनी सुमोज्ञत: । आपृच्छ्य संवाद कृत्वा । तत्र नन्दनगृहात् गच्छामीति तदयानमनुमन्यतामिति संवाद: । आहृत्य: संवादार्थ इति भाविका: अत एवापृच्छ्य विवक्षया सुमिति नैषद्भावी टीकाकृता तथैव विवृतमित्यवधेयम् । आवसथं गृहम् । कौमुदी चन्द्रिकापूर्णिमावसतम् । यथा । कार्त्तिकी चन्द्रनक्षत्रयुता कौमुदीवसतम् ।

अवअणो अ मे सम्पदं तुए कोमारबम्भअरिए पडीअणं त्ति समत्थं पहसं काउअ वासभवणादो णिक्कन्दो त्ति। एदिणा पसङ्गेण मदअन्तिअं आणीअ मअरन्देण सह संजोअइस्सं॥ (क) (२)

इति निष्क्रान्ता। प्रवेशकः।

ततः प्रविशति शय्यागतो मालतीवेशो मकरन्दो लवङ्गिका च। (१)

(क) अयी सुविहितमालतीवेषव्यवच्छिन्नविप्रलम्भनन्दनकलत्रवरवधोऽमात्यभूरि-वसुमन्दिरे भगवतीवचनसंविधाभिः सैषैव मीमांसिनी मकरन्दः। अथ सकलापि नन्दनावासमुपगताः। ततो भगवती नन्दनमापृच्छ्य गतावसथम्। अहं च नववधूस्नेहदर्शनविरचिताकाशकौमुदीमहोत्सवप्रतिपथ्याकुलान्तःपरिजनः प्रदोषोऽनुकूलयिष्यति अद्य नो अवश्यम्। साम्प्रतं लवङ्गिकाभ्याम: कामिनी कामयितुं बद्धः सपादनन्दनमध्यगो पुनर्वात्स्यायनीयाभिद्रव्यमकरन्देन निद्रुतं प्रतिहरती जाताता। ततः स खलु अधिकवैदग्ध्यलब्धदर्पो मदीयनिर्भरदुःखितो मदयन्तिकायामीन मे साम्प्रतं त्वया कौमारब्रह्मचर्ये प्रतीक्षणमिति समर्थं प्रतिज्ञां कृत्वा वासभवनान्निर्गत इति। एतेन प्रसङ्गेन मदयन्तिकामानीय मकरन्देन सह संयोजयिष्ये।

तद्भवं च वीक्ष्य मदयन्तिकाकौमुदीत्युक्तम्। यथा। जननयनानन्दकत्वेन कौमुदीव कौमुदीति रूपकम्। कौमुदी चन्द्रज्योत्स्ना यथाकालयुक्ता सन्ध्याकालीना वर्धितुं यथा जनानन्दाय तथैवमपीत्यर्थः। च: वैवाहिककालो यथा-काल: सन्ध्याकालश्च। प्रदोषो रजनीमुखमित्यमरः। अवसितं मदयन्तिकाविवाहकृत्यम्। चमत्कार्यव्यापृते जने तत् वधूगृहं निर्वहेदिति भाव:। अवमानेति विलम्बोत्कण्ठातापेन दुर्मनाः। तिरस्कारात् अधिकेन वैलक्ष्येण लज्जया: लब्धदर्पो यस्य सः। रोषेण सह वर्तमानः निर्भरं यथास्यात् दुःखितः। कौमारब्रह्मचारी वेषः माधवानुरक्तत्वात्। तदेव नन्दनस्य विवाहदिन एव वध्वादर्शितदर्पेण अपाकृतम्। कामवाकानभिज्ञत्वं च दर्शितम्। यदाह। सुकुमाराः कुसुमसाधर्म्याः स्त्रीणां यदा। अभिलषिता नाकविदग्धम्। अयमीति प्रपञ्चेन दुराचारत्वमपाकृतम्। यदाह। बालानां यथा स्त्री न विवाहं समाचरेत्। पूर्वं पश्चाच्च दुराचारः स ... । प्रसङ्गेन वंशिकामतिदेन।

(१) सुखमध्ये सर्वत्र बहुतरनिमित्त इति शय्यागत इत्युक्तम्।

मक। लवङ्गिके! अपि नाम बुद्धरक्षितासंक्रान्ता भगवतीनीतिः विजेष्यते ?। (४)

लव। को संदेहो एत्थ महाणुभावस्स। किं बहुणा जहा एसो मञ्जीरसद्दो सुणीअदि तहा जाणामि तेण ब्बवदेसेण आणीदा बुद्धरक्खिदाए मदअन्तिआ त्ति। ता उत्तरीआवआरिदो पसुमलक्खणो चिट्ठ (ख)। (५)

मकरन्दस्तथा करोति।

ततः प्रविशति मदयन्तिका बुद्धरक्षिता च।

मद। सहि! सच्चं ज्जेव्व परिकोविदो मे भादा मालदीए ? (ग)।

बुद्ध। अध इं ? (घ)।

(ख) कः सन्देहोऽत्र महानुभावस्य। किं बहुना यथैव मञ्जीरशब्दः श्रूयते तथा जानामि तेन व्यपदेशेन आनीता बुद्धरक्षितया मदयन्तिकेति। तत् उत्तरीयापवारितः पक्ष्मलाक्षस्तिष्ठ।

(ग) सखि! सत्यमेव परिकोपितो मे भ्राता मालत्या ?।

(घ) अथ किम् ?।

---

(४) भगवतीनीतिरव्यभिचारिणीत्यागमभेदाभदाह। अपीति प्रश्ना-वनायाम्।

(५) अव्यभिचारित्वमेवाह। लवङ्गिकावाक्यं। कः सन्देहोऽत्र महानु-भावस्य। मदयन्तिकापरिवर्तोऽयमं भावीति भावः। अत्र किं बहुना अधिके-नेत्यर्थः। मञ्जीरो नूपुरम्। व्यपदेशेन मालतीप्रवेशच्छलेन। उत्तरीयेति उत्तरीयावगुण्ठिताङ्ग इत्यर्थः। इह गर्भसन्धौ बीजोद्भेदनम्। यदाह। कार्य-कारणयो बीज मागतो बीजमिश्रणम्। गर्भवर्णः स भाषितो नाट्यवेदविचक्षणैः।

मद। अहो। अच्चाहिदं ता एहि वामसीलं मालदिं णिब्भच्छेम्ह (क)। (६)

परिक्रामतः।

बुद्ध। इदं वासभवणदुवारं (ख)। (७)

इति प्रविशतः।

मद। सहि लवङ्गिए! आवीपदि पसुत्ता दे पिअ-सही पवेसि (छ)।

लव। एहि मा णं पडिबोधेहि अदो एसा चिरं दुम्मणाअमाणा दाणिं ज्जेव्व ईस मण्णुं उज्झिअ पसुत्तेति। तदो सणिअं इध ज्जेव्व सअणोवन्ते उवविसम्ह (ज)। (८)

(क) अहो! अत्याहितं तदेहि वामशीलां मालतीं निर्भर्त्सयाव:।

(ख) इदं वासभवनद्वारम्।

(छ) सखि लवङ्गिके! आवृते प्रसुप्ता ते प्रियसखी भवति।

(ज) एहि मैनां प्रतिबोधय यत एषा चिरं दुर्मनायमाना इदानीमेव मन्यु-मुज्झित्वा प्रसुप्तेति। ततः शनैरिहैव शयनीयोपान्ते उपविशाव।

---

(६) अत्याहितमतिभय:। निर्भर्त्सयाव इति। निरादौ नावर्थे धात्वा भावा हीनं तु कथ्यते। पञ्चमी षष्ठवचनं सिद्धिं ते तत: परम्। इति भरतानुशिष्टेन कथाभिलाषपरे भवतादि वर्त्तमाने वर्त्तते निर्भर्त्सयाव इति भाव:।

(७) बुद्धरक्षितावाक्यम्। एतद्वासभवनद्वारम्। तत्प्रविशाव इति भाव:।

(८) अत्र वनवासादुःखोत्पादात् अवलोकीति चिन्ता। दीर्घनिश्वासादिः। यदाह। चिन्तादीर्घनिश्वासादि प्रकाशितनानाभावैः। ततो ज्ञानादपि निद्रा प्रभृति दिवापि सम्भवति। तथा च दुःखप्रदानाय निद्रापि सर्वं मर्दयितु-मिच्छति:।

मद । [तथा कृत्वा ।] सहि ! दुम्मणाअदि इअं वाम-सीला (झ) ।

लव । कहं णाम णववहूविस्सम्भणोवाअजाणुअं सहअं विअड्ढमहुरभासिणं ससिणेहं परीमसं च दे भादरं भत्तारं समासादिअ सही ण दुम्मणाइस्सदि (ञ) । (९)

मद । बुद्धरक्खिदे ! पेक्ख विप्पदीवं अम्हे वि उवा-लम्भीआमो (ट) ।

बुद्ध । विप्पदीवं ण विप्पदीवं वा । (ठ) (१०)

मद । कधं विअ । (ड)

बुद्ध । जं दाव चलणपडिदो वि भत्ता ण बहुमाणिदो

(झ) सखि ! दुर्मनायते इयं वामशीला ।

(ञ) कथं नाम नववधूविस्रम्भणोपायज्ञातारं मनोहरं विदग्धमधुरभाषिणं सविनोदं परीहासं च ते भ्रातरं भर्तारं समासाद्य सखी न दुर्मनायिष्यते ।

(ट) बुद्धरक्षिते ! प्रेक्षस्व विप्रतीपं वयमपि उपालभ्यामहे ।

(ठ) विप्रतीपं न विप्रतीपं वा ।

(ड) कथमिव ।

---

(९) अत्र विस्रम्भं विश्वासमुत्पाद्य वशीकरणम् । सुभगं मनोहरम् । विदग्धं कलाभिज्ञम् नववधूविस्रम्भणोपायज्ञातृत्वादिदानम् । यदाह । बाला ताम्बूलमाल्यफलरससुरसाहारसंमानदाक्षिण्यादिकः सुप्रसिद्ध एव । प्रकृते तूपा-लम्भपदत्वाद्विपरीतार्थकत्वमिति भावः ।

(१०) विप्रतीपं विपरीतम् । पादपतितमन्दनानुवर्तनाभावाद्विपरीतत्वमिति भावः । पादपतनेऽनुकूलो भर्ता । क्रीडायुक्तापि वा क्रीडारहितापि वा भवेत् । पादे पतन्तं पुरुषमनुवर्तेत सर्वदा । इति वचनाद्वा । विप्रतीपं न वा विप्रतीपम् । तच्चित्तानुवर्तनेन स्वीकृतयुक्तानिराकरणेन वैपरीत्यमिति भावः ।

अत्थ लज्जादोसेण एसो जणो उवालम्भणिज्जो । जं वि पिअसहि ! णवबहुविस्सम्भाइसोवक्कमसम्भवणेउणविमद्दिद-महाणुभावत्तणस्स भादुणो दे वामामदं किं वि अपरिहार्यं तेण तुज्झे त्ति ।

किं च । कुसुमसधर्माणो हि योषितः सुकुमारोपक्रमाः । तास्त्वनधिगतविश्वासैः प्रसभमुपक्रम्यमाणाः सद्यः संप्रयोगविद्वेषिण्यो भवन्ति ।

एवं किल कामसुत्तआरा आमणन्ति (ख) । (११)

(ख) अत्रापराध्यपरिणीतोऽपि अयं न बहुमानितोऽस्य लज्जादोषेणैव जन उपालम्भनीयः । यदपि प्रियसखि ! नववधूविश्रम्भाद्युपक्रमसम्भवनैपुण्य-विमर्दितमहानुभावत्वस्य भ्रातुस्ते वामामतं किमप्यपरिहार्यं तेन युष्मानिति । एवं किल कामसूत्रकारा आमनन्ति ।

---

(११) स्वाभिप्रायं गोपायितुं साधारणोक्त्या सखी वदति । अत्र इत्थमिति वक्तव्ये अत्र इत्यभिधानं मालतीमकरन्दसाधारण्यार्थम् । नववध्वा लज्जयानिकर्मे न दोषः । यदाह । नवपरिणीता योषिद् यथावदनीय साध्वसं सद्यः । विविधविनोदकलाभिर्विश्वासं नीयते सुरतैः ॥ इत्यसोपक्रमः सहसा प्रवृत्तिः न च विरुद्धः । यदाह । सहसा वाप्युपक्रान्ता कन्याचित्तमविन्दता । साध्वसं त्रासमुद्वेगं सद्यो द्वेषं च विन्दति ॥ सा प्रीतियोगमप्राप्य तेनोद्वेगेन दुःखिता । पुरुषद्वेषिणी वा स्याद्विद्विष्टा वा ततोऽन्यगा ॥ वत्सनमुपक्रान्तानिर्वाहः । विमर्दितं विमोचितम् । अपरिहार्यमपरिहरणीयम् । अपरिहार्यमिति यावत् । युष्मत्सुपालभ्या इति मदयन्तिकां प्रति वचनम् । बहुवचनमादरात् । अस्माकमिति पाठे कुर्वन्त्यपि मदयन्तिकया सह आत्मनं मन्यमाना वदन्त्याह । स्त्रियाः कारित्वात् मकरन्दाश्रयवचनम् । यदाह । स्त्रियाया कामिनीया स्त्रियः कामौत्सुक्येन च । विस्तार्यते: स्त्रियः आपां संक्षेपेनापि बोधयेत् ॥ यथा । कामसूत्राणुसारात् सुकुमारा । सधर्माणस्तुल्याः । उपक्रम आरम्भः । प्रसभं हठात् । संप्रयोगः सुरतम् । किल प्रसिद्धौ । कामसूत्रकारा आमनन्ति कथयन्ति ।

बुद्ध। [साखम्।] घरे घरे पुरिसा कञ्ञकाओ समुव्वहन्ति ण क्खु को वि लज्जापराहीणं अणवरद्धं सुद्धसुउमारसहावं कुलकुमारीअणं पव्वावेमि त्ति वाआमलेण पक्खालेदि। एदे क्खु दे हिअअसल्लणिक्खेवा आमरणं सुमरिअन्तदूमणा पदिघरणिवासवेरग्गकारिणो महापरिभवा जाणं किदे इत्थिआणं अम्मलाहं जुगुच्छन्ति बान्धवा (ख)। (१२)

मद। बुद्धरक्खिदे! अदिदुम्मणाअमाणा पिअसही लवङ्गिआ। महन्तो को वि मे भादुणा बाधावराधो से किदो (ग)। (१३)

बुद्ध। अध इं। सुदं अम्हेहिं जधा मम णा तुए संपदं कोमारबन्धईए पओअणं त्ति (घ)।

मद। [कर्णौ पिधाय।] अहो! अदिक्कमो! अहो! पमादो। सहि लवङ्गिए! असमत्थम्हि दे मुहं पि संपदं

(ख) गृहे गृहे पुरुषाः कुलकन्यकाः समुद्वहन्ति न खलु कोऽपि लज्जापराधीनमनपराद्धं मुग्धसुकुमारस्वभावं कुलकुमारीजनं प्रव्राजयामीति वाचामलेन प्रक्षालयति। एते खलु ते हृदयशल्यनिक्षेपा आमरणं संस्मर्यमाणदुःसहाः पतिगृहनिवासवैराग्यकारिणो महापरिभवा येषां कृते स्त्रीणां जन्मलाभं जुगुप्सन्ते बान्धवाः।

(ग) बुद्धरक्षिते! अतिदुर्मनायमाना प्रियसखी लवङ्गिका। महान् कोऽपि मे भ्रात्रा बालमपराधोऽस्याः कृतः।

(घ) अथ किम्। श्रुतमस्माभिर्यथा मम न त्वया साम्प्रतं कौमारबन्धक्या प्रयोजनमिति।

---

(१२) अत्र निर्वेद आरोपितम्। जुगुप्सन्ते निन्दन्ति। दुःशीला कन्या नः जायतामिति भावः।

(१३) कथमन्यथा गुरुर्विपर्ययमिति भावः।

दंसिदुं तथावि पच्चवामि त्ति किं पि मन्तइस्सं (ढ)। (१४)

लव। साधीणो दे पणअं जणो (ण)। (१५)

मद। चिट्ठदु दाव मह भादुणो दुस्सीलदा अविण्णाणं च। तुम्हेहिं ईदिसो वि सम्पदं जधा चित्तमणुवत्तणीओ जेव भत्ता एसो त्ति। अहं च। तुम्हे इमस्स पव्वज्जाअदुक्कराहिकवेवोवाक्खअदूसणस्स जं मूलं तं च आणध (त)। (१६)

लव। अधं बाधामत्तिदं वि णाम ण आणीमो (थ)

मद। जं दाणिं तस्सिं महाणुभावे माहवे किं पि किल मालदीए तारामेत्तअं आसी तहिं सब्बलोअस्स अदिभूमिं गदो पवादो। तं क्खु एदं विअम्भादि। ता पिअसहि! जधा इम मन्तुणो अवक्खालिणिवेसो णिरवसेसं विअपादो उवरीअदि तधा करेध। अण्णधा महादोसो त्ति आणिदं

(ढ) अयि! अतिक्रान्तः। अयि! प्रमादः। सखि लवङ्गिके! अप्रमत्ताभ्यां ते मुखमपि साम्प्रतं दर्शयितुं तथापि प्रभवामीति किमपि मन्त्रयिष्ये।

(ण) स्वाधीनस्तेऽयं जनः।

(त) तिष्ठतु तावन्मम भ्रातुर्दुःशीलतापरिज्ञानं च। युष्माभिरीदृशोऽपि साम्प्रतं यथाचित्तमनुवर्तनीयो यैव भर्तेव इति। अहञ्च। यूयमस्य अप्रतिज्ञाताधराधि-वेपीवाक्षणदूषणस्य यन्मूलं तद् जानीथ।

(थ) अथ बाधामात्रमपि नाम न जानीमः।

---

(१४) अत्र प्रभवामीति वरमतिस्वपि त्वयि प्रभवप्रसादायावधानी पर्वमिति भावः।

(१५) अत्र यदिच्छसि तथा कुर्वीमहे।

(१६) अविदग्धोऽपि दुःशीलोऽपि। यथाचित्तं चित्तानतिक्रमेण। भर्तेति। कोऽपि देवः कुलस्त्रीणां पतिरेव परमपि। इतिवचनात् स्त्रीषु भर्ता प्रभवतीति भावः। न वेति न च न जानीथ। किन्तु जानीथ एवेत्यर्थः।

भोदु। णिक्कम्पदारुणा कण्णकाओ दूसावेन्ति हिअअं मणुस्साणं ईदिसादो दुरभिसङ्गादो त्ति मा एव्वं भणिस्सध मदअन्तिआए कधिदं त्ति (क)। (१७)

लव। अइ पमादधाए! असंबद्धलोअप्पवादमोहिदे अवेहि ण तुए सह अप्पिस्सं (ख)। (१८)

मद। सहि! पसीद पसीद। अहवा ण तुम्हे अपुव्वं भणिदाओ चिट्ठध। किं च। अज्ज सव्वं ज्जेव्व माहवेक्कमणोरधस्स मालदिं आणीमो। केण वा कठोरकेदअगब्भविब्भमावअवदोअवणिब्बहिदसुंदरत्तणविसेसं माहवसहत्थणिम्माविदबउलावलीविरइदकण्ठावलम्बमेत्तसंधारिदजीविदं मालदीए माहवस्स अ पभातचन्दमण्डलापण्डुरपरिक्खामर-

(क) यदिदानीं निष्कम्पदारुणाभ्यां माधवे किमपि किल मालत्याः तारामैत्रकमासीत् तव मदन्तिकायाः अतिभूमिं गतः प्रसादः। तत् खल्विदं विजृम्भते। तत् प्रियसखि! यथैव भर्तृरूपाभिनिवेशो निरवशेषं हृदयादुद्धियते तथा कुरुत। अन्यथा महादोष इति प्राप्तं भवतु। निष्कम्पदारुणाः कन्यका दूषयन्ति हृदयं मनुष्याणामीदृशाद् दुरभिषङ्गादिति। एवं भणिष्यथ मदयन्तिकया कथितमिति।

(ख) अयि प्रमादधाने! असम्बद्धलोकप्रवादमोहिते! अपेहि न त्वया सह आलपिष्यामि।

(१७) अत्र किल प्रसिद्धौ। तारामैत्रकं प्रेम। तत्र माधवे। अतिभूमिमतिदूरम्। तत् खल्विति। माधवानुरक्ता मालती इति यत् जनश्रुत इत्याशयः। विजृम्भते प्रकाशते। यथैव मालती माधवपरा इति जनस्यैवाभिनिवेशो दोषः। निरवशेषमिति क्रियाविशेषणम्। दोष इत्यस्य दौर्भाग्यं आवयोर्वा निन्दाप्रहाभूततया ख्यातिरिति भावः। निष्कम्पेति। सततपरपुरुषावलोकनेन लज्जाहीनतया दारकजनत एवैते कुलटा न भवेति परेषां सन्देह इति भावः।

(१८) अत्र अपेहि दूरं गच्छ।

मणीअदंसणं ण विआविदं सरीरं। किं च तहिं दिअसे कुसुमाअरुज्जाणपेरन्तरच्छामुहसमागमे सविब्भमुम्मिसिदकोदूहलुप्फुल्लपसरन्तधवलुप्पलवत्तविलासमसिणसाचारचाहुतारआविराअन्तविब्भमा अणङ्गचण्डाचारिअसव्वावारोवदंसणच्छिआविअ- विअद्दसुहमहुरा तुए वि ण विरूविदा इमाए दिट्ठिभेदा। किं च। मम भादुणा दाअवुत्तन्तं सुणिअ तक्खणुच्छलिद- गम्भीरावेअव्वहप्परामिलाअन्तदेहसोहाअं उव्वत्तमाणमूलं विअ ण लक्खिदं हिअअं। किं च। एदं पि अवरं सुमरिदं मए (भ)। (१८)

(भ) सखि। प्रसीद प्रसीद। अथवा न युक्तमकाण्डनिर्वेदितम्। किञ्च। इदं ममैव माधवैकमयजीवितायां मालत्यां आसीत्। किम वा कठोरकैतवगर्भविप्रलम्भवचनैर्व्यामोहितसुन्दरत्वविभ्रमं माधवस्य दर्शनानिमित्त- वकुलावलीविरचितकण्ठावलम्बनायामुत्थापितजीवनं मालत्या माधवस्य च प्रमाद- चन्द्रमसामापाण्डुरपरिणामरमणीयदर्शनं न विभावितं शरीरम्। किञ्च। तद्दिवसे कुसुमाकरोद्यानपर्यन्तरथ्यामुखसमागमे सविभ्रमोन्मीलितकौतूहलोत्फुल्ल- प्रसरद्धवलोत्पलपत्रविलासमसृणसाचारचाटुतारकाविराजमानविभ्रमा अनङ्ग- चण्डाचार्योपदिष्टसर्वव्यापारोपदर्शनच्छायाविदग्धसुखमधुराऽपि न निरूपिता त्वया दृष्टिभेदाः। किं च। मम भ्रात्रा दायवृत्तान्तं श्रुत्वा तत्क्षणोच्छलितगम्भीरा- वेगव्यतिकरप्रम्लायमानदेहशोभाया उद्वर्तमानमूलमिव न लक्षितं हृदयम्। किं च। एतदप्यपरं स्मृतं मया।

---

(१८) अत्र न युक्तमिति अकाण्डे इत्यादि सैरन्ध्र्याद वचनम्। न खलु न आसीत्। अपि तु आसीत एव। तथा च अन्यपक्षं किं करोतीत्यर्थः। कठोरः परिणतो यः शरत्कालस्तस्येत्यर्थः। यथा। अकठोरा बाला कैतवीत्यर्थः। ताहशो बालिपाण्डुरिव भवति। न विभावितं न ज्ञातम्। अपि तु सर्वैरेव ज्ञातमित्यर्थः। तत् किमपरं करोतीति भावः। विभ्रमो विलासः। स च क्रिया यथा। यानस्थानासनादीनां नेत्रवक्त्रादिकर्मणाम्। उत्पत्ति विशेषो

लव। किं दाणिं अवरं (ल)। (२०)

मद। जं मम तस्स जीविदप्पदाइणो महाणुभावस्स चेअणापडिलम्भपिअणिवेदिआए मालदीए भअवदीविअड्ढ-वअणोवण्णासबोधिदेण हिअअं जीविदं अ माहवेण पारितोसि-अत्तणेण सअंगाहसाहसे णिउत्तं। अह अ लवङ्गिए तहिं तुए ज्जेव भणिदं पडिच्छिदो क्खु णो पिअसहीए अअं पसादो त्ति (य)। (२१)

लव। कदमो उण महाभाओ त्ति विसुमरिदं मए (र)।

मद। सहि सुमर सुमर जेण तस्सिं दिअसे विअडदुद्दमा-बद्धावट्टसकालगोअरं गदा अम्हे तक्कालमंगाहिदेण जीवि-

---

(ल) किमिदानीमपरम्।

(य) यत् खलु मम तस्य जीवितप्रदायिनो महानुभावस्य चेतनाप्रतिलम्भ-प्रियनिवेदिकाया मालत्या भगवतीविदग्धवचनोपन्यासबोधितेन हृदयं जीवितं च माधवेन पारितोषिकत्वेन स्वयंग्राहसाहसे नियुक्तम्। अथ च लवङ्गिके तत्र त्वयैव भणितं प्रतीष्टः खलु नः प्रियसख्या अयं प्रसाद इति।

(र) कतमः पुनर्महाभाग इति विस्मृतं मया।

वः स विलास इति भावः। पुनर्यथा। मन्दमन्थारिणी दृष्टिर्गतिश्च इव आविला। कृतिपूर्वकथालापो विलासः कथ्यते यथा। किं न त्वया निरूपिता सैवापहृत दत्स्वः। चाविनोऽप्यनिदुःखम्। अङ्गारितं सुतनम्। उद्वर्तमान-मुत्पतत्। चाविनोऽनभिलाषाभिलः। मदाच। चाविनश्च भवेत् पुंसामिष्टा-मायामिकथयात्।

(२०) किमिदानीमपरम्। त्वया श्रुतमिति शेषः।

(२१) अत्र चेतनाप्रातिकल्येन विवक्षत्। पारितोषिकं स्वयंग्राहमित्यादि-नोक्तं दर्शितम्। नियुक्तं दत्तम्। तदिदमनुराग विना नोपपद्यतेति भावः। अत्रान्तरीतिमवलम्ब्य ममतापद्धत्यापेक्षात। मा त्वयि इति भणिति पूर्वक र-भावः। निश्चयमिति। ममापि तत्कथनाभावं इव इति भावः।

दप्पदारुणा पीवरभुअत्थम्भेण विआरअन्तस्सेव अअअमुवरिम-
मारम्भिअदेहोवआरआहवं कदुअ परिरक्खिदम्हि । तेण अ
दिढदाढाविदारिअविअडमंसलुग्गाअपरिघाहिअक्खतेण कर-
ठअव्वविदअवापीडधारिणा अक्केक्कमण्णेण मम किदे विस-
ज्जिदा पतिदुट्ठसद्दूलणहणिहावज्जपहारा मारिदो अ सो
दुट्ठसावदमहारक्खसो त्ति (ख) । (२२)

लव । हुं मअरन्दो (ग)

मद । [सानन्दम् ।] पिअसहि ! किं किं भणासि (घ)

लव । णं भणामि मअरन्दो त्ति (ङ) ।

सहर्षं परिरम्भ्य: मकरन्दी संकलमाश्रित्य ।

(ख) सखि ! अथ खर तेन नखिन दिवसे विकटदुष्टश्वापदापदिष्टाकस्मीयं मम चरणे तत्क्षणमतिगृहीतेन जीवितप्रदायिना पीवरभुजस्तम्भेन निष्पादय- मानेन सकलभुवनैकसारनिजदेहोपकारमाहवं कृत्वा परिरक्षितास्मि । तेन च दृढदंष्ट्राविदारितविकटमांसलोन्नतपरिघाहितवक्षःस्थलेन करठकर्षितकवापीड- धारिणा कलैककमनसा मम कृते विसृष्टाः पतिदुष्टशार्दूलनखनिभावज्रप्रहारा मारितश्च स दुष्टश्वापदमहाराक्षस इति ।

(ग) हुं मकरन्दः ।

(घ) प्रियसखि ! किं किं भणसि ।

(ङ) ननु भणामि मकरन्द इति ।

(२२) अत्र क्रूर इति मकरन्दमिति भावः । श्वापद इति व्याघ्रव्याजेन वन इत्यर्थः । विकटं विशालम् । मांसलं स्थूलम् । उन्नतमत्युच्छितम् । करटं कठिनं जर्जरितं विध्वंसितं बटोत्कृष्टमुकुटं तदिव चरति । कर्णाद्युपकरण इति छिन्नि: । दृढमिव दमीकरणम् । रक्ताक्तदिवसा साध्यम् । नखशिखा नखाग्रम् ।

वयं तथा नाम यदात्थ किं वदा-
म्ययं त्वकस्माद्विकलः कथान्तरे ।
कदम्बगोलाकृतिमाश्रितः कथं
विशुद्धमुग्धः कुलकन्यकाजनः ? ॥ (२१)

मद [सलज्जम् ।] सहि कीस मं उवहससि । णं भणामि णिव्वावअन्ति मं तारिसस्स अप्पणिरवेक्खव्ववसाइणो किदन्त-कवलिअन्तजीविद-बलामोडिअपच्चाणअण गुरुकोपआरिणो जणस्स सहीसु णामग्गहणसुमरणाइं । तधा अ सो तुए वि गाढप्पहारवेअणाबद्ध-विद्धारिदसरीरसङ्कलिदसेअसलिलुप्पीलो मोहमउलाअन्तणअणकन्दोट्टजुअलो भूमिविलम्बितामिलदा-

(स) सखि ! किं मामुपहससि । ननु भणामि निर्वापयन्ति मां तादृशस्य आत्मनिरपेक्षव्यवसायिनः कृतान्तकवल्यमानजीवितबलात्कारप्रत्यानयनगुरूपकारिणो जनस्य सखीषु नामग्रहणस्मरणानि । तथा च स त्वयापि गाढप्रहार-

(२१) वयमिति । यत् त्वं चात्थ ब्रवीषि वयं तथा नाम माधवं अनुरक्ता इति सत्यम् तु किन्तु यद्यपि तथापि विशुद्धं गोपनीयं किं वदामि ? न वदामि ? । विशुद्धमुग्धः विशुद्धः निष्कपटः मुग्धः प्रेमानभिज्ञश्च अयं कुलकन्यकाजनः अकस्मात् कोऽयम् त्वमिति भावः कथान्तरे कथामध्ये अकस्मात् कथं विकलं विकलः विकलः सन् कदम्बस्येव गोलाकृतिं आश्रितः रोमाञ्चेन पुलकितोऽभूत् । सत्यम् वदामि सखी माधवप्रेमनिमग्ना किन्तु तदपि मकरन्दनामग्रहणमात्रेण रोमाञ्च-पुलका यतः तदापि मकरन्दानुरक्तिमनुमीयते इति भावः ।

(२४) यत उपहससीति नाहं मकरन्दानुरक्ततया हसामि किं तु तदी-यकर्माभिनन्दामीति न उपहसामीति भावः । णमिति । एवं बहुविध-व्यापारव्यापृतचित्ता निजात्मपरत्वं खेदादिकं मकरन्दोऽनुभवति यथा चेति । विस्फारितशरीरेति दूर्वावयवम् । सङ्कलितो निःसृतः । उत्पीडः पूरः ।

विद्धघोरधारिदसरीरभारो पच्चक्खीकिदो ज्जेव्व मदअन्ति-आणिमित्तमेत्तविअट्टिअमहामहग्घजीविदो महाभाओ त्ति (ग)। (२४)

मदयन्तिका। स्वेदादीन् विकारान् नाटयति।

बुद्ध। ववसिदं पिअसहीए सरीरेण (घ)। (२५)

मद। [सलज्जम्।] पिअसहि अवेहि। उब्भिण्णम्हि मह्माभिणीए बीसम्भेण (ङ)।

लव। सहि मदअन्तिए! अह्मे वि जाणिदव्वं जाणीमो। ता पसीद विरम ववदेसादो। एहि वीसम्भ-गब्भकधाबन्धसरिसं सुहं चिट्ठह्म (च)। (२६)

वेदनाप्रतिबिम्बितशरीरसंवलितचन्दनलिप्ताङ्गो मोहमुकुलायमाननेत्रकन्दोट-युगलो भूमिविलग्नशिथिलधैर्यधारितशरीरभारः प्रत्यक्षीकृत एव मदय-न्तिकानिमित्तमात्रविघटितमहामहार्घजीवितो महाभाग इति।

(घ) अवसितं प्रियसख्याः शरीरेण।

(ङ) प्रियसखि! अपेहि। उद्भिन्नास्मि सहवासिन्या विश्रम्भेण।

(च) सखि मदयन्तिके! वयमपि ज्ञातव्यं जानीमः। तत्प्रसीद विरम व्यपदेशात्। एहि विश्रम्भगर्भकथाबन्धसदृशं सुखं तिष्ठामः।

कन्दोटी नीलोत्पलम्। मोहेति मोहेन नेत्रमीलनं न तु मरणमिति भावः। यदाह। अपमानविघातभयपूर्वैरवस्थाभी भवति मोह इति। प्रकारमूर्च्छायां कथनं मूर्च्छा न पतितोऽन्त्याह मूर्छेति। विघट्टः संबन्धः। निष्कर्षितः परित्यक्तः। महामहार्घमतिदुर्लभम्। जीवितोपी सर्वभुवनम्। विदारितकर-करादिना स्वेदादियतम्। स्वेदादीनित्यनेन विवर्णविषमभावादिप्रकरणम्। यदाह। मदनविंशितकाले: कम्पायास्वेदंनीलुक:। सात्त्विकाविष्कृतिः सीता तदाहुः विवर्णविषमम्।

(२५) अत्र स्वेदादिमत्ता तव शरीरेण अवस्थासहचारीतोऽभिव्यक्ति रूपकं:।

(२६) अत्र वक्ष्यमाणा: कथा:। नाहं कामन्दकीवदादिनीतिका किं तु

बुद्ध। सोहणं लवङ्गिआ भणादि (ख)। २७

मद। विधेअह्मि सम्पदं पिअसहीओ ! (ग)।

लव। जइ एव्वं ता कधेहि कधं णु दे कालो गच्छदि त्ति (घ)। (२८)

मद। णिसामेहि पिअसहि ! मम बुद्धरक्खिदापक्खवादपच्चएण पढमं ज्जेव्व तस्सिं जणे अदिभूमिं गदो अणुराओ। अवि अ। तस्सिं जणे भविदुव्वारम्भकोदूहलुक्कण्ठामणोरहं हिअअं आसी। तदो विहिणिओअणिव्वुत्तदंसणा भविअ दुव्वारदारुणाणङ्गदुक्खसन्दाविदकडुअचित्तविहडन्तजीविदा सम्भाविअह्मि। विजिम्भिदापुव्वसव्वङ्गप्पज्जलिअ-

(ख) शोभनं लवङ्गिका भणति।

(ग) विधेयास्मि साम्प्रतं प्रियसख्योः।

(घ) यद्येवं तत् कथय कथं नु ते कालो गच्छतीति।

(ङ) निशामय प्रियसखि ! मम बुद्धरक्षितापक्षपातप्रत्ययेन प्रथममेव तस्मिन् जनेऽतिभूमिं गतोऽनुरागः। अपि च तस्मिन् जने भवितव्यारम्भकौतूहलोत्क-

नुहितमयकथयेति भावः। अभिवदतीति पाठेऽभिप्रायतामीत्यर्थः। अत्र जानीम एवेति कामन्दक्याऽविदिता तव मकरन्दस्य च चेष्टितं ज्ञातमेव। तत् कथमपह्नव इति भावः। अपवरीमात् कथात्। सहसमिति मकरन्दं मेहःजुबन्धनमपि कथयेत्याशयः। उपयन्ति क्रियाविशेषणम्।

(२७) अत्र शोभनं कथितमुक्तमित्यर्थः।

(२८) अत्र मकरन्दवियोगेन कथं वर्तसे इति भावः।

(२९) अत्र निशामय शृणु। एतद्वचनमिदं लवङ्गिकापेक्षया। बुद्धरक्षिताया विदितवृत्तान्तत्वात्। कथावचनं तु दासहृदये यदाह। ताता पुरकामन्दकृतवती वा सख्योऽस्य चिन्तं रतिसहृदा च। मदनपुपाता: सद्भावयवोऽपि

अणवरुदवड्ढमाणदूसहायासदुम्मणायमाणपरियणा पढमावि-
मोक्खमेत्तसुलहमिउणिव्वाणपडिऊलवुत्तन्तकिदावसरविहिदा-
णेयव्ववसायविसंठुला इमं ओयलोअपरिवत्तं अणुभवामि (क)।
(२८)।

अइप्पसिविणअअन्तरेसु अ मणोरहुम्मादमोहिदा पेक्खामि
तं जणं। सो वि पिअसहि मुहुत्तणिव्वुडविस्सासविसंठुलुव्वे-
अविअत्थरन्तलन्तिदणीसपुण्डरीअनअणअप्पीलडक्करपडिरुद्धमेरअ-
मदघूसिअ विअ चिरं णिज्झाअदि म (ख)। (३०)

कामनोरथं हृदयमासीत्। ततो विधिनिर्मांसालङ्कमदर्शना नूतना दुर्निर्दाक्षा-
नङ्कदुःखमन्मथपीतकर्दमितविघटमानजीविता मूर्च्छाविताना। विजृम्भितापुन-
रविच्छिन्नवर्धमानदुःसहायासदुर्मनायमानपरिजना प्रथमाविमो-
क्षमात्रसुलभमृदुनिर्वाणप्रतिकूलवृत्तान्तकृतावसरविहितानेकव्यवसायविसंस्थुला इमं
जीवलोकपरिवर्तमनुभवामि।

(ख) अतिस्वप्नान्तरेषु च मनोरथोन्मादमोहिता पश्यामि तं जनम्। सोऽपि
प्रियसखि मुहूर्तनिर्वृतविश्वासविसंस्थुलोद्वेल्लितमालाचलितनेत्रपुण्डरीकनतावलं-
बितापीडसव्यस्तकरप्रतिरुद्धमैरेयमदघूर्णितमिव चिरं निध्यायति माम्।

पूर्णोऽसौ हर्षमुपैति रामः। पक्षपात इति बृहस्पतिनापक्षपातो गुणवान्भव-
त्विमा न भवतीति विकाश इति भावः। मनोबुद्धमार्तविक्षोभवत्। कौतुकम-
मुत्कण्ठा च मनोरथ इति विग्रहः। ततो बहुव्रीहिः। यद्वा। चातीवक्षो-
भवत् कौतुकमुत्कण्ठा च यत्र मनोरथे तादृशो मनोरथो यत्र तथा। मनोरथ-
दाढ्यं आश्चर्यायाम्। वदाश्च। मनःसंमोहनवाक्दाकर्षणादिभिरूपा।
विरक्तो वेदनाविष व्यापारविनयो यथा। मरणमेव निर्वाणं मोक्षः। सर्वदुःखा-
पहारकत्वात्। मदनादिदत्तबृत्त इत्यादिनि बृहस्पतिनावचनम्। विसंस्थुला
व्यवसितचिन्ता। जीवलोकस्य परिवर्तोऽन्यथात्वं घूर्णनं। यद्वा। मूर्च्छान-
न्तरं पुनर्जीवलोकावर्तेऽपि परिवर्तनम्।

(३०) अङ्कन्यासादि भावनावबद्धपानमयी नागमनमयी नेत्रः। निर्व्यूढः

किं अ। कवलिदारविन्दकेसरकसायकण्ठकलहंसघोसघग्घरक्खलिदगम्भीरतारघोरणादभरिदकण्णविवरं पिए मद-अन्तिए! एहि त्ति व्याहरदि। अध अ। पप्फुरन्तपम्होक्खित्तुत्तरीअअञ्चलावलम्बणपरिभवेण ससंभमुत्तरंगिअसमधमा-अमाणहिअअं मं समस्सासेदि (क)। (११)

सहसा विसज्जिअमुअप्पसूणा तक्खणकठोरकमलदण्डा-अमाणबाहुबन्धणावसारिअपम्होक्खत्तम विहडन्तविसंडमेह-

(क) किं च। कवलितारविन्दकेसरकषायकण्ठकलहंसघोषघर्घरस्खलितगम्भीरतारघोरनादभरितकर्णविवरं प्रिये मदयन्तिके! एहि इति व्याहरति। अथ च। प्रस्फुरत्पक्ष्मोत्क्षिप्तोत्तरीयाञ्चलावलम्बनपरिभवेण ससम्भ्रमोत्तरङ्गितसमधमाय-मानहृदयां मां समुच्छ्वासयति।

(ख) सहसा विसर्जितमुक्तप्रसूना तत्क्षणकठोरकमलदण्डायमानबाहु

उपचितः। प्रतिरुद्धमिव प्रसन्नदाम। मैरेयमासवः सीधुरित्यमरः। धुनोति इति क्रियाविशेषणम्। निध्यायति चिन्तयति।

(११) कषायः सुरभितः। कलहंसो राजहंसः। घोषः शब्दः। घर्घर-मस्फुटम्। स्खलितं च्युतम्। एतदुभयं साध्वसवशात्। हर्षसम्भृतस्वर-भेदात्। यदाह। स्वरभेदो भयक्रोधमदहर्षादिभिर्भवेत्। भरितकर्णविवर-मिति क्रियाविशेषणम्। वस्त्राञ्चलग्रहणेन खोरसाटनम्। यदाह। रहसि यद्वेनापि इते नष्टे च मुहेति। कार्यं प्रसादनं नाथ्या अपराधं समीक्ष्य तु। परिभवेन प्रतीकारचतुरा। अस्य पुरोऽनुभवात्। अत्र किं व्याहितमुत्तरङ्गि-तम्भवत्। सातङ्कावनतमाथमानमस्तु पामिव चित्तं यस्यास्ताम्। यथा। उत्तराङ्ग-वहत्तमीनम्। अवधमायमानं कम्पम्। कान्तिभव कम्पसौन्दर्यावद्यकः। समुच्छ्वासयति चकितां करोति।

(१२) सहसा झटिति विसर्जितानि त्यक्तानि च या प्रसूना अवनीता

लावण्णसमंदाणिज्जन्तपीवरुत्थड़िमिरिविप्पदीवगमणं पडि-
ऊलवादिणिं पिअं घण्णा असपअत्तणिव्विसिदमुत्कुसकोलोवराअद्-
क्कअपक्कमोकिटहिमअं णिमिसपुच्चकत्तपज्जत्थलोअणविभावि-
दासेसविण्णसारं उवऊहदि (ज)। (१२)

हिउणबाहुदण्डावेढणणिपीडिदं पिअसहिं पकडसद्दूल-
कठोरकरकहोरप्फविसडपत्ता वलीपमाहग्गुप्पाणवक्कत्थलाणि-
ट्ठुराणिवसणमस्स मं कादुअ सामिणिसुसमत्थपाणिवक्कवरी-
णिरिक्खिदकर परिमाहावलिदपसामिदणिसुन मुहावअव मच्छन्द-
विभामरिसपद्वअणक्कमन्ना वामगण्डमुणीवारिणिरिक्खिदप्पफुरन्त-

[illegible] विघटमानानि [illegible]
[illegible] प्रतिकूलवादिनीमपि [illegible]
[illegible]
[illegible]

(ज) [illegible]
[illegible]

च कर्मधारयः । पुलकितत्वेन च [illegible] । [illegible] ।
[illegible] विलासः । [illegible] कृत्वा [illegible]
आयति । नायिका च तदा [illegible] न प्रभवतीति भावः । [illegible]
[illegible] विघटमानेति । विघटमाना [illegible] ।
[illegible] । तत् [illegible] । प्रतीपं प्रतीपं प्रतिकूलम् ।
[illegible] पुनः [illegible] प्रतिकूलयति । [illegible]
[illegible] । [illegible] पुनःपुनर्निर्बन्धे [illegible] निषेधं [illegible]
[illegible] । यथा । [illegible] विभातम् । [illegible] ।
[illegible] । स च [illegible] पदं [illegible] ।
[illegible] पाठे [illegible] पुनःपुनः [illegible] पदानं [illegible]
[illegible] ।

(१२) [illegible] । तेन [illegible] । [illegible] ।

पुच्छिदाहरमणुम्मुहमणहरप्फंसणिब्भरवसिदसरीर-सोहं उव्व-मिदमज्झमाणन्दविसममम्मणवलग्गमोहमन्थरभमन्तलोअणं किं पि दुव्विणीदमाहमाणुरूअव्ववसाओ मं अणब्भत्थणीअं अब्भत्थेदि (भ)। (३३)

पिअसहि ! समवत्थं च सव्वं अणुभविअ भणिस्स (३४)

सावेगविधुतमस्तकाविद्धकबरीनिश्छितकरपरिग्रहपुञ्जीकृतांशुकामितनियमसुखावयव-स्वच्छन्दविकासावदग्धवदनकमला बालमृणालनूपुरनिश्छितपक्ष्मरन्ध्रस्मितावसर-मुद्गतमनोहरस्पर्शनिर्भरोद्धर्षितशरीरशोभा समुच्छ्रितमध्यमानन्दविषमसंभ्रमवल-गमोहमन्थरभ्रमल्लोचना किमपि दुर्विनीतसाहसानुरूपव्यवसायो मामनभ्यर्थनीयम् अभ्यर्थयति ।

घोरस्य भाषणम्। प्रौढत्वादुन्नतत्वात् कठोरं यत् वक्षस्थलमिति भावः। निभृतं निश्चलम्। निर्बन्धोऽग्रहः। निःसहा स्पन्दनासमर्था। अथ कर-कड्डणमेव पञ्चावतीति रूपकम्। चुम्बनमाह। सावेगेति। धीरविनत पुञ्जीकृतं कम्पितांशुकम्। सुखावयवा ललाटादयः। विकासितं चुम्बनादि-निपुणम्। वदनस्य वैदग्ध्यं चुम्बनचातुर्यात्। इह बन्धाधारिविधं चुम्बनम्। चलितकचकुरितकघटितकभेदात्। तत्र चलितकमाह। प्रच्छुरितेति। घट्टि-तकमाह। पुच्छितं चोदितम्। ईषत्परिस्पृष्ट मीलितमेषा जिह्वयैव घटयति कश्चित्रैर्व तत्काच्छादयतीति घटितकम्। कुरितकं तु प्रागेवोक्तम्। समुद्धत उद्रेकः। एवं च सर्वाङ्गीणनाचकव्ययात् प्रमोदमाह मनोहरेति उद्धर्षितमुद्गत-रोमाञ्चम्। नातिबाधा बाधाङ्गं मन्दबोधबाधव्यवस्थावनाराममकचोक्तम्। वर्द्धमानां सुरतावस्थामाह। समुच्छ्रितेति। समुच्छ्रिताभ्यां साध्वसानन्दाभ्यां विषमौ यः संभ्रमः संवेगस्तस्य मोहेन किं कर्तव्यतामूढतया मन्थरत्वमेकतरपक्षा-व्यवस्थितिः। साध्वसेन प्रहर्षितानन्देन च निरतिरिक्ताश्रयः। अनभ्यर्थनीयं सुरतादिकम्।

(१७) ततो झटितीति आगतायम्मकथनम्।

पडिबुद्धा सुण्णारण्णसंठिदं पुणो वि मन्दभाइणी विभा-
वेमि जीअलोअं त्ति (अ)।

लव। [विहस्य।] सहि मदअन्तिए! फुडं जाअरन्ती वि। अध तस्सिं अवसरे णिव्वोढविब्भमुम्मीलन्तामलविअसन्तबहलत्त टालोअणपिण्डविदं परिअणादो गोवणिज्जं दे णिअम्बस्स मूलं मअणिज्जपच्छदवडावारिदं भोदि किं ण वेत्ति (ट)। (१५)

मद। अइ असंबद्धपरिहाससीले! अवेहि (ठ)।

बुद्ध। सहि मदअन्तिए! मालदीपिअसही क्खु ईदि-साइं ज्जेव मन्तिदुं जाणादि (ड)।

मद। सहि! मा क्खु एव्वं मालदिं उवहस (ढ)।

बुद्ध। सहि मदअन्तिए! भणिस्सं दाणिं दे किं पि जइ ण वीसामभङ्गं करेसि (ण)। (१६)

(अ) प्रियसखि! समस्तं च स्वप्नमनुभूय झटिति प्रतिबुद्धा शून्यारण्यसंस्थितं पुनरपि मन्दभाग्या विभावयामि जीवलोकमिति।

(ट) सखि मदयन्तिके! स्फुटं जाग्रत्यपि। अथ तस्मिन्नवसरे निर्व्यूढविभ्रमोन्मीलदमलविकसद्बहलत्तरालोकनपिण्डितं परिजनाद्गोपनीयं ते नितम्बस्य मूलं मदनीयप्रच्छदपटावारितं भवति किं न वेत्ति।

(ठ) अयि असंबद्धपरिहासशीले! अपेहि।

(ड) सखि मदयन्तिके! मालतीप्रियसखी खल्वीदृशान्येव मन्त्रयितुं जानाति।

(ढ) सखि! मा खल्वेवं मालतीमुपहस।

(ण) सखि मदयन्तिके! भणिष्यामि इदानीं ते किमपि यदि न विश्रामभङ्गं करोषि।

---

(१५) धात्र्यामनुश्वेदनीयमिति भावः। पुण्यवतीमङ्गुष्ठा परिजनद्वारा निवारणाय गोपनम्।

(१६) [illegible]

मद। सखि ! किं पुणो वि पणयभङ्गेण किदावराहो अयं जणो जेण एव्वं मन्तेसि। पिअसहि ! तुमं लवङ्गिआए सह सम्पदं मे हिअअं (त)। (३७)

बुद्ध। जइ दे कधं वि मअरन्दो पुणो वि दंसणपहं ओदरदि तदो किं तुए कादव्वं (थ)। (३८)

मद। एक्केक्कावअवणीसङ्गलग्गणिच्चले चिरं लोअणे णिव्वाविस्सं (द)। (३९)

बुद्ध। अध सो वि मम्महबलक्कारिदो कन्दप्पजणणिं तुमं रुक्मिणिं विअ पुरिसोत्तमो सयंगाहसहधम्मचारिणिं करेदि तदो का पडिवत्ती ? (ध)। (४०)

(त) सखि किं पुनरपि प्रणयभङ्गेन कृतापराधोऽयं जनो येनैवं मन्त्रयसि। प्रियसखि ! त्वं लवङ्गिकया सह साम्प्रतं मे हृदयम्।

(थ) यदि ते कथमपि मकरन्दः पुनरपि दर्शनपथमवतरति ततः किं त्वया कर्त्तव्यम्।

(द) एकैकावयवनिःसङ्गलग्ननिश्चले चिरं लोचने निर्वापयिष्यामि।

(ध) अथ सोऽपि मन्मथबलात्कारितः कन्दर्पजननीं त्वां रुक्मिणीमिव पुरुषोत्तमः स्वयंग्राहसहधर्मचारिणीं करोति ततः का प्रतिपत्तिः ?।

---

(३७) अत्र कृतापराध इत्यत्र शिरश्चालनमतिः।

(३८) अत्रात्मसमर्पणमेव त्वया कार्य्यमिति भावः।

(३९) अत्र तद्दर्शनामृतशीतलता भविष्यामीति भावः। निःसङ्गः सर्वाङ्गव्यापी।

(४०) अत्राथशब्दो यद्यर्थे। बलात्कारितो बलात्कारेण प्रवर्तितः। रुक्मिणी कामजननी प्रद्युम्नमातृत्वात्। पक्षे कामावस्थाकारिणीम्। पुरुषो-

मद । [निःश्वस्य ।] कीस मं एत्तिअं आसासेसि (न) (४१)

बुद्ध । सहि ! कहेहि (प) ।

लव । कधिदं ज्जेव्व हिअआवेअसूअएहिं दीहणीसासेहिं (फ) ।

मद । सहि ! का अहं इमस्स तेण ज्जेव्व अत्ताणअं पणीकदुअ दुट्ठसद्दूलकवलादो कड्ढिअस्स तस्स ज्जेव्व केरअस्स अत्तणो सरीरस्स (ब) । (४२)

लव । सरिसं महाणुभावदाए (भ) । (४३)

बुद्ध । सुमरेहि एदं वअणं (म) । (४४)

(न) किं मामेतावदाश्वासयसि ।

(प) सखि ! कथय ।

(फ) कथितमेव हृदयावेगसूचकैर्दीर्घनिःश्वासैः ।

(ब) सखि ! काहमस्य तेनैवात्मानं पणीकृत्य दुष्टशार्दूलकवलादाकृष्टस्य तस्यैव क्रयकरस्यात्मनः शरीरस्य ।

(भ) सदृशं महानुभावतायाः ।

(म) स्मरैतद्वचनम् ।

नमः श्रमः । अत्र च पुस्तकेषु उभयो मकरन्दः । अवश्यमेव माधवेन । शुद्धधर्मचारिणी भार्या । प्रतिपत्तिः ।

(४१) इह मम कथान्तेन किं करिष्यसि निःश्वास इति भावः ।

(४२) अत्र का अहमात्मशरीरस्य किं तु न कापि । मकरन्दस्यैव मच्छरीरमिति भावः । केरअस्य: क्रयकरणार्थी । पणीकृत्य मूल्यतया वा व्यवस्थाप्यते स क्रयकरः ।

(४३) अत्र महानुभावता प्रशंसा ।

(४४) वाक्यमिदमेतद्वचनस्योपदेशं स्थिरीकरणार्थं । स्मर्तव्यमिदं वचनम् ।

मद। कधं दुदीअपहरणाडिआविच्छेदपडहो ताडीअदि (४५)। ता जाव चन्दणं णिब्भच्छिअ से पादपडणं अब्भत्थिअ मालदीए उवरि अणुऊलइस्सं (य)।

इति उत्थाय गन्तुमिच्छति।

मकरन्दो मुखमुद्घाट्य हस्तेन गृह्णाति। (४६)

मद। सहि मालदि! विप्पलद्धासि। [विलोक्य सभयं समाश्वस्य।] अम्मो (४७) अअं कोवि एदं वहदि (र)।

मक। रम्भोरु! संहर भयं क्षमते विसोढु-
मुत्कम्पितं स्तनभरस्य न मध्यभागः।
इत्थं त्वयैव कथितप्रणयप्रमादः
सङ्कल्पनिर्वृतिषु संस्तुत एष दासः॥ ४८॥

बुद्धरक्षिता मदयन्तिकामुखमुन्नमय्य संस्कृतमाश्रित्य।

(य) अथ द्वितीयप्रहरनाडिकाविच्छेदपटहस्ताड्यते। तद्यावच्चन्दनं निर्भर्त्स्य तस्य पादपतनमभ्यर्थ्य मालत्या उपरि अनुकूलयिष्यामि।

(र) सखि मालति! विप्रलब्धासि। अम्मो अयमेव किमप्येतद्वहते।

(४५) अत्र नाडी काऽपि षट्क्षण इत्यमरः। षट्क्षणावच्छिन्नः कालो नाडी। द्वितीया नाडी द्वादशक्षणात्मकः कालः। मदयन्तिकामकरन्दसंघटनविषयस्य समाप्तिपटहोऽयमित्यर्थः। यद्वा। द्वितीयनाडी द्वितीयभगिनी मालती तया सह विच्छेदो वियोगो यत्रोपकारस्तत्सम्बन्धिविघटनमित्यर्थः।

(४६) गृह्णाति मदयन्तिकामित्यर्थः।

(४७) अम्मो इति आश्चर्यद्योतकाभिप्रायानुलापे।

(४८) रम्भोर्विति! हे रम्भोरु! सुनितम्बे! भयं संहर त्यज, मध्यभागः कायस्य मध्यभाग इत्यर्थः। स्तनभरस्य उत्कम्पनं विसोढुं न क्षमते। कम्पेन पतनमनुमीयते इत्यर्थः। तेनानुमानालङ्कारः। इत्थमनेन प्रकारेण त्वयैव

प्रेयान्मनोरथसहस्रवृतः स एष
सुप्तप्रमत्तजनमेतदमात्यवेश्म ।
प्रौढं तमः कुरु कृतज्ञतयैव भद्र-
मुत्क्षिप्तमूकमणिनूपुरमेहि यामः ॥४८॥

मद । सहि बुद्धरक्खिदे ! कहिं उण अम्हेहिं गन्तव्वं (क) (१०)

बुद्ध । जहिं ज्जेव्व मालदी (ख) ।

मद । किं णिव्वुत्तसाहसा मालदी ? (ग) । (११)

(क) सखि बुद्धरक्षिते ! क्व पुनरस्माभिर्गन्तव्यम् ।

(ख) यत्रैव मालती ।

(ग) किं निर्वृत्तसाहसा मालती ?

कथितः प्रथमस्य प्रवादः यस्य सोऽयमित्यर्थः । अदृश्यनिर्गतिषु अवस्थितपूर्वेषु वस्तुतः परिचितो दासोऽस्मीति भावः ।

(४८) प्रेयानित्यादि । प्रेयान् प्रियतमो मनोरथसहस्रैर्वृतः प्रार्थितो बहुधा तदन्यादिषु अनुभूतः स एव सोऽयमित्यर्थः इति मामनुरागार्द्रः । अतः कृतज्ञतया पूर्वोपकारस्य स्मरणेनैव मदनमोदं विधायकं कुरु । तत्र कारणमाह । एतदमात्यवेश्म केचित् सुप्ताः केचित्प्रमत्ता जना यत्र तादृशम् । प्रौढं तमः । अन्धमिति पाठेऽर्थं करोतीत्यर्थम् । तत्र इत्यर्थः । उत्क्षिप्तमुत्तोलितमत एव मूकमशब्दं मणिमयं नूपुरं यथा तथैहि यामः । विवाहसम्पादनार्थमिति भावः । अत्र सुप्तादिना अन्यलोकानामदर्शनं प्रौढान्धकारतया अन्यलोकानाम् अदर्शनम् । नूपुरस्याशब्दतया पदविन्यासाभाव इति गमनसम्भवं आदित्य दर्शितम् ।

(१०) यत्रैव मकरन्दस्याभिप्रायः । यत्रैव मालती वर्तते इति शेषः । इतीमामभिमतोऽभ्यागमनाभिप्रायः सूचितः ।

(११) अत्र निर्वृत्तसाहसेत्यनेन च मालत्या आत्मनिवेदनं यदि तदा प्रमादि वच् आदिमाशयः ।

बुद्ध। अध इं। अण्णं च। तुमं भणासि का अहं इमस्स (ष)।

इत्यादि पठति। मदयन्तिका अश्रूणि पातयति।

बुद्ध। महाभाअ! दिण्णं क्खु अत्ताणं पिअसहीए पडिवज्जस्स (स)। (५२)

मक। अद्योर्जितं विजितमेव मया किमन्यत्
अद्योत्सवः फलवतो मम यौवनस्य।
यस्य प्रसादसुमुखेन समुद्धृतेव
देवेन बान्धवधुरा मकरध्वजेन ॥५३॥

तत् अनेन पक्षद्वारेण निर्गत्य साधयामः।

[निभृतं परिक्रामन्ति।]

मक। अहो! निशीथनिःसञ्चाररमणीयता राजमार्गस्य (५४)।

(ष) अथ किम्। अन्यच्च। त्वं भणसि काऽहमस्य।

(स) महाभाग! दत्तं खलु आत्मानं प्रियसख्या प्रतिपद्यस्व।

---

(५२) अत्र च तथा प्रागेव मत्समक्षं त्वया मकरन्दाय आत्मा दत्तः। इदानीं कुतस्तेऽपास्यमित्याशयः। स्वगृहत्यागदुःखादश्रुपातेन सूचितात्मदानां मदयन्तिकामाह। अत्र गृह्यमिति शेषः।

(५३) अद्येत्यादि। अद्योर्जितं स्वातिशयं कृत्वा मया विजितम्। सर्वकार्य्यसम्पादनात्। फलवतः सफलस्य मम यौवनस्य अद्योत्सवः। अतः एवान्यत् किम्। अपि तु न किमपि। साध्यमस्तीति शेषः। यस्य मम बान्धवधुरा मित्रकार्य्यं प्रसादसुमुखेन प्रसन्नतया सुमुखेन कामदेवेन। समुद्धृता सम्भूता। एवकारोऽप्यर्थ एव। यदि माधवकार्य्यमेवं मदा मया सर्वाकारं जितं न स्यादिति भावः। कन्यावरणे बान्धवा एव प्रभवन्ति। यदाह। कन्याया वरणे माता पितरौ बान्धवा अपि। पञ्चधारं चक्रिका।

(५४) अर्द्धरात्रनिशीथौ द्वावित्यमरः।

तथा हि सम्प्रति।

प्रासादानामुपरि वलभीतुङ्गवातायनेषु
भ्रान्त्वावृत्तः परिचितसुरागन्धसंस्कारगर्भः।
माल्यामोदी मुहुरुपचितस्फारकर्पूरवासो
वायुर्यूनामभिनववधूसन्निधानं व्यनक्ति॥ ५५॥

इति निष्क्रान्ताः सर्वे।

नन्दनविप्रलम्भो नाम सप्तमोऽङ्कः।

---

(५५) प्रासादानामिति। प्रासादानां हर्म्याणां उपरि वलभीस्थानि यानि उच्चवातायनानि तेषु भ्रान्त्वा परिभ्रम्य आवृत्तः प्रत्यावृत्त इत्यर्थः। परिचितः सुरागन्धो यत्र तादृशो यः संस्कारः स गर्भे यस्य तथा माल्यामोदी मालापरिमलवाही मुहुर्नितराम् उपचितः वर्द्धमानः स्फारः विपुलः कर्पूरवासः यस्य स वायुः यूनाम् अभिनववधूसन्निधानम् अभिनवानां वधूनां सन्निधानं सामीप्यं व्यनक्ति सूचयति॥

अष्टमोऽङ्कः ।

—••—

ततः प्रविशति अवलोकिता । (१)

अव। वन्दिदा मए णन्दणावासपडिणिउत्ता भअवदी, ता जाव मालदीमाहवसआसं गच्छामि। [परिक्रम्य।] एदे दे णिव्वत्तिदगीह्मदिअहावसाणमज्जणा (२) दीहिआतडसिलातलं अलङ्करन्ति मालदीमाहवा ता जाव उवसप्पिस्सं (क)।

इति निष्क्रान्ता प्रवेशकः।

ततः प्रविशतः उपविष्टौ मालतीमाधवौ अवलोकिता च ।

माध। [स्वगतं सानन्दम्।] वर्त्तते हि मन्मथप्रौढ़सुहृदो निशीथस्य यौवनश्रीः। तथाहि

(क) वन्दिता मया नन्दनावासप्रतिनिवृत्ता भगवती। तद्यावन्मालतीमाधवसकाशं गच्छामि। एतौ तौ निर्वर्त्तितग्रीष्मदिवसावसानमज्जनौ दीर्घिकातटशिलातलमलङ्कुरुतो मालतीमाधवौ। तद्यावदुपसर्प्स्यामि।

---

(१) तदेवं मदयन्तिकामादाय मकरन्दे माधवान्तिकं चलिते मालतीमादाय निर्गतस्य माधवस्य कामन्दकीगृहस्थितस्य वार्त्ताप्रस्तावनाय अवलोकिताप्रवेशः। सूचनं च पूर्वाङ्के। अहिं ज्जेव्व मालतीति वचनेन मालतीमाधवयोरेकत्र वासः सूचितः। तत्र च यद्यपि तयोरेव प्रवेशोऽर्हति तथापि कन्याप्रलोभने सख्यानुकूल्ये तत् प्रवेश इति पूर्वाङ्के कृतमेव।

(२) अथ सरो वापी तु दीर्घिकेत्यमरः।

दलयति परिशुष्यत्प्रौढतालीव पाण्डु-
स्तिमिरनिकरमुद्यन्नैन्दवः प्राक्प्रकाशः।
वियति पवनवेगादुन्मुखः कैतकीनाम्
प्रचलित इव सान्द्रो मन्दमन्दं परागः॥ ३॥

तत्कथं वामशीलां मालतीमुपावर्त्तये, भवतु एवं तावत् [प्रकाशम्।] प्रिये मालति! प्रत्यग्रसायन्तनस्नानविशेषशीतलामत्रभवतीं निदाघतापशान्तये विज्ञापयामि तत्किमिति नित्यमन्यथैव मां सम्भावयसि?।

निश्च्योतन्ते सुतनु! कवरीविन्दवो यावदेते,
यावन्मध्यः स्तनयुगलयोर्नार्द्रभावं जहाति।
यावत्सान्द्रप्रतनुपुलकोद्भेदवत्यङ्गयष्टि-
स्तावत् गाढं वितर, सकृदप्यङ्गपालीं प्रसीद॥ ४॥

अयि निरनुरोधे!

---

(३) दलयतीति। परिशुष्यत्प्रौढतालीव पाण्डुसदृशमवर्णं इवेत्युत्प्रेक्षा। उद्यन् उदयमानः ऐन्दवः प्राक्प्रकाशः प्रथमस्फुरणं तिमिरनिकरं दलयति विनाशयति। पुनस्तत्रोत्प्रेक्ष्यते। कैतकीनां पुष्पाणां परागः पवनवेगात् वियति आकाशे उन्मुखः सान्द्रश्च सन् मन्दमन्दं प्रचलित इव। नेदमिन्दुस्फुरणं किन्तु वातचलितकैतकीनिविड़परागएवेति भावः।

(४) निश्च्योतन्त इति। हे सुतनु! शुभाङ्गि! एते कवरीविन्दवः कवरीसम्बद्धकुसुमरसलेशा इत्यर्थः। यावन्निश्च्योतन्ते भ्रंशन्ते। मध्यो मध्यदेशः स्तनयुगलयोरार्द्रभावं घर्मोदयेन शैत्यमित्यर्थः। यावन्न जहाति, तथा अङ्गयष्टिः सान्द्रैर्घनैः प्रतनुभिः सूक्ष्मैरवयवैरित्यर्थः। पुलकोद्भेदैर्लोमहर्षस्फुरणैर्युक्ता तद्वती-त्यर्थः यावत् सकृदेकवारमपीत्यर्थः गाढं यथा भवति तथेत्यर्थः। अङ्गपाली-मालिङ्गनम् इति यावत् वितर देहि प्रसीद प्रसन्ना भव।

जीवयन्निव ससूढसाध्वसस्वेदविन्दुरधिकण्ठमर्प्यताम् ।
बाहुरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः ॥५॥

अथवा, दूरे तावदेतत्, कथमालापसंविभागस्य अपि अभाजनम् अयं जनो भवत्याः ।

दग्धं चिराय मलयानिलचन्द्रपादै-
र्निर्वापितन्तु परिरभ्य वपुर्न नाम ।
आमत्तकोकिलरुतव्यथिता तु ह्रद्या-
मद्य श्रुतिः पिबतु किन्नरकण्ठि ! वाचम् ॥ ६ ॥

अव । [उपसृत्य ।] अई अणिव्वहणसीले ! जं दाणिं मुहुत्तं अदिट्ठमाहवा दुम्मणाअन्ती मम पुरदो भणासि चिराअदि अज्जउत्तो, अवि णाम केच्चिरेण पेक्खिस्सं जेण विच्छड्डि-आसेससज्झसा विसुमरिदणिमेसविग्घमवलोअअन्ती, एव्वं भणिस्सं, द्दिउणावेट्टनपरिरम्भेण सम्भावअसित्ति सम्पदं तस्सिं दे अअं परिणामो (ख) ।

(ख) अयि अनिर्वहणशीले ! यदिदानीं मुहूर्त्तमात्रान्तरितमाधवापि दुर्म-नायमाना मम पुरतो भणसि, चिरयति आर्य्यपुत्रः अपि नाम कियच्चिरेण प्रेक्षिष्ये येन विच्छर्दिताशेषसाध्वसा विस्मृतनिमेषविघ्नमालोकयन्ती एवं भणिष्यामि द्विगुणा-वेष्टनपरिरम्भेण सम्भावये: इति, साम्प्रतं तस्मिंस्तेऽयं परिणामः ।

---

(५) जीवयन्निति । समूढ़ उद्गिन्नः साध्वसजनितस्वेदविन्दुर्यत्र स, तथा ऐन्दवैः चन्द्रसम्बन्धिभिर्मयूखैः किरणैः चुम्बितस्य स्पृष्टस्य अतएव स्यन्दिनः द्रवीभूतस्य चन्द्रमणिहारस्य चन्द्रकान्तमणिविशेषनिर्मितहारस्य, चन्द्रोदयेहि चन्द्रकान्त-मणिगलनप्रसिद्धेरिति भावः । तस्य विभ्रम इव विभ्रमो यस्य स बाहुरधिकण्ठं कण्ठे सप्तम्यर्थेऽव्ययीभावः । जीवयन्निव मां जीवयितुमिच्छन्निवेत्युत्प्रेक्षा । अर्प्यतां दीयताम् । तव बाहुवलम्बनेन जीवितुमिच्छामीति भावः ।

(६) दग्धमिति । चिराय बहुदिनपर्य्यन्तमित्यर्थः । मलयानिलेन चन्द्र-पादैश्चन्द्रकरैश्च दग्धं वपुर्ममेत्यर्थः परिरभ्य आलिङ्ग्य न निर्वापितं नोपशमितं

मालती। सासूयमिव तां पश्यति (७)।

माध। [स्वगतम्।] अहो! भगवतीप्रधानान्तेवासिन्याः सर्वतोमुखं वैदग्ध्यं, अक्षयश्च सुभाषितरत्नकोषः। [प्रकाशम्।] प्रिये! सत्य मवलोकिता वदति?।

मालती तिर्य्यङ्मूर्द्धानं चालयति। (८)।

माध। ग्रापितासि (९) मया लवङ्गिकावलोकितयोर्जीवितेन यदि वाचा न कथयसि।

माल। नाहं किञ्चि जाणामि। (ग)

इत्यर्द्धोक्ते लज्जां नाटयति।

माध। अहो! अनवसितार्थमन्यरस्य वचसश्चारुता। [सहसा निरूप्य।] अवलोकिते! किमेतत्?। (१०)

(ग) नाहं किमपि जानामि।

नामेति सत्ये। तेन हे किन्नरकण्ठि! आमत्तस्य कोकिलस्य रुतेन रवेण व्यथिता उपतप्ता श्रुतिः श्रवणेन्द्रियम् अद्य इयां हृदयसन्तोषिणीं वाचं तवेत्यर्थः पिबतु शृणोतु इत्यर्थः। पूर्वं पिकरवेणाप्यसन्तुष्टं श्रवणं त्वदीयवचसा सन्तोषयेति भावः।

(७) अत्र यदिदानीमिति वाक्यभूषायाम्। भणनस्वरूपमेवाह चिरयतीति सम्भावयेरितीत्यन्तम्। साम्प्रतमिति भिरश्वालनकाकौ। चिरयति विलम्बते। विच्छर्दितं त्यक्तम्। विघ्नमिति क्रियाविशेषणम्। परिणाम इति। या त्वं चिरविरहमसहमाना माधवार्थिनी सा कथमधुना तव वाग्यमनमालम्बसे इति भावः। असूया गुणेषु दोषारोपः। सा चेह रहस्यानिवेदनादिति भावः।

(८) सर्वतोमुखं सर्वतोगामि। सुभाषितान्येव रत्नानि तेषां कोषः पात्रम्। कोषोऽस्त्री कुड्मले पात्रम् इति मेदिनीकारः। प्रियेत्यादि प्रश्नवाक्यम्।

(९) ग्रापितासि शपथीकृतासि।

बाष्पाम्भसा मृगदृशो विमलः कपोलः
प्रक्षाल्यते सपदि राजत एष यस्मिन् ।
गण्डूषपेयमिव कान्त्यमृतं पिपासु-
रिन्दुर्निवेशितमयूखमृणालदण्डः ॥ ११ ॥

अव । सहि ! किं दाणिं उच्छलिदबाह्पप्पीलमन्थरं रोदिसि (घ) । (१२)

माल । [जनान्तिकम् ।] केच्चिरं पिअसहीए लवङ्गिआए असस्सिधानदुःक्खमणुभविस्सं पउत्तिलम्भोवि से सुदुल्लहोत्ति (ङ) । (१३) ।

माध । अवलोकिते ! किं नाम ? ।

अव । तुह ज्जेव्व सवधोवन्यासेण एसा लवङ्गिअं सुमरिअ, ताए पउत्तिणिमित्तं उत्तम्मदि (च) ।

(घ) सखि ! किमिदानीमुच्छलितबाष्पोत्पीड़मन्थरं रोदिषि ।

(ङ) कियच्चिरं प्रियसख्या लवङ्गिकाया असन्निधानदुःखमनुभविष्यामि प्रवृत्ति लम्भोऽपि तस्या सुदुर्लभ इति ।

(च) तवैव शपथोपन्यासेन एषा लवङ्गिकां स्मृत्वा तस्याः प्रवृत्तिनिमित्तमुत्ताम्यति ।

---

(११) वाष्पेत्यादि । हरिणाक्ष्या एष कपोलो वाष्पजलेन सपदि प्रक्षाल्यते अत एव विमलः । किमेतत् । यत्र चन्द्रो राजते । कीदृक् । गण्डूषेण मुखपूरणेन पातव्यं दीप्त्यमृतं पातुमिच्छुरिव निहितः किरण एव मृणालदण्डो येन सः । किरणरूपमृणालनलिकया पातुमिच्छतीत्यर्थः । अनेन कपोलस्य चन्द्राधिककान्तिमत्त्वमुक्तम् । गण्डूषो मुखपूर्त्तौ स्यादिति आश्वतः ।

(१२) उत्तोच्छलितौ बहुलीभवन् । मन्थरमिति क्रियाविशेषणम् ।

(१३) असान्निध्यानदुःखमसहनेन जनितक्लमम् । प्रवृत्तिलम्भो वार्त्ताप्राप्तिः । वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वय इत्यमरः ।

माध। ननु इदानीमेव मया कलहंसकः प्रहितः, प्रच्छन्नः सन्निपत्य नन्दनावासप्रवृत्तिमुपलभस्वेति। [साशंसं।] अवलोकिते! अपि नाम बुद्धरक्षिताप्रयत्नः सफलोदर्क एव मदयन्तिकां प्रति स्यात्?।

अव। कुदो सन्देहो महाणुभावस्स? महाभाअ! पढमं ज्जेव्व सद्दूलणहरालङ्किदस्स मकरन्दस्स मोहविराममहूसवं णिवेदअन्तीए मालदीए भअवदीए, णिउत्तेण भवदा समं जीविदेण, हिअअं पसादीकिदं। जइ कोवि तुमं मदअन्तिआलम्भेण सम्पदं वड्ढावेदि, किं तस्स पारितोसिअं भविस्सदि? (छ)। (१४)

माध। अनयानुयोगाव्यमनुयुक्तोऽस्मि। [हृदयमवलोक्य] इयमस्ति मालतीप्रथमदर्शनाभिषङ्गमाक्षिणः कामकामनालङ्कारस्य लक्ष्मीवतः केसरतरोः प्रसवमाला (१५)।

प्रेम्णा मद्ग्रथितेति या प्रियसखीहस्तोपनीतानया,
विस्तारिस्तनकुम्भकुड्मलभरोत्सङ्गेन सम्भाविता।

(छ) कुतः सन्देहो महानुभावस्य? महाभाग! प्रथममेव शार्दूलनखराङ्कितस्य मकरन्दस्य मोहविराममहोत्सवं निवेदयन्त्यै मालत्यै भगवत्या नियुक्तेन भवता जीवितेन समं हृदयं प्रसादीकृतं यदि कोऽपि त्वां मदयन्तिकालम्भेन सम्प्रति वर्द्धापयति तदा किं तस्य पारितोषिकं भविष्यति।

---

(१४) अत्र निवेदयन्त्या मालत्या इत्यन्वयः। मालत्याः कृत इत्यर्थः।

(१५) अनुयुक्तः पृष्टः। स्वकीयहृदयाभोगमागामिश्रीकस्वरवयोतनाय। प्रसवः पुष्पम्।

(१६) प्रेम्णेत्यादि। या माला प्रियसख्या लवङ्गिकया हस्तेनोपनीता मद्ग्रथितेति [illegible]

सम्प्राप्ते त्वथ पाणिपीडनविधौ मां प्रत्यपेताशया
या मय्येव लवङ्गिकेत्यवगते सर्वस्वदायीकृता ॥ १६ ॥

अव । सहि मालदि ! वल्लहा क्खु दे इअं बउलमाला, तदो अवहिदा भव, मा दाणिं एसा सहसा ज्जेव्व परहत्थगदा भविस्सदित्ति (ज)। (१७)

माल । पिअं पिअसही मे उवदिसति (झ)। (१८)

अव । कधं पदसद्दो विअ (ञ)। (१६)

माध । [नेपथ्याभिमुखमवलोक्य ।] अये ! कलहंसकः प्राप्तः ।

माल । दिट्ठिआ वड्ढसि मदअन्तिआलम्भेण (ट)। (२०)

(ज) सखि ! मालति ! वल्लभा खलु इयं ते वकुलमाला ततोऽवहिता भव, मा इदानीमप्येषा सहसैव परहस्तगता भविष्यतीति ।

(झ) प्रियं प्रियसखी मे उपदिशति ।

(ञ) कथं पदशब्द इव ।

(ट) दिष्ट्या वर्द्धसे मदयन्तिकालाभेन ।

क्रीडेन सह सम्भाविता सम्भावनां नीता ततो नन्दनेन सह विवाहे संप्राप्ते मां प्रति अपेताशया निरस्तप्रत्याशया लवङ्गिकेयमित्यधिगते मय्येव यया सर्वस्वदानं कृतम् । अनेन पूर्वानुरागकथनेन नायिकाविस्रम्भ उक्तः । विस्तारः परिवाहः । कुम्भपदेन उन्नतता । कुड्मलपदेन मृदुता । भरशब्देन प्रौढिरुक्ता । पाणिपीडनं विवाहः । दीयत इति दायः ।

(१७) अत्र येनैव मकरन्दस्य मदयन्तिकालाभः कथनीयस्तेनैवेयं प्राप्या । अतस्त्वमेव तं कथयेति गुप्त्या माधवेन स्वात्मानं सम्भावयेत्याशयः ।

(१८) तथा चाहमेव कथयामीति भावः ।

(१६) अत्र शृणुत इति भावः ।

(२०) अत्र मकरन्दस्य मदयन्तिकाविवाहेनेत्यर्थः । इदं वचनं मालत्या माधवं प्रति ।

मांध। [सहर्षं परिष्वज्य।] प्रियं नः (२१)।

आत्मनः कण्ठादवतार्य्य वकुलमालां ददाति।

अध। णिव्वूढो क्खु भअवदीए सम्भावणाभारो बुद्धरक्खिदाए (ठ)। (२२)

माल। [सहर्षं] अम्महे (२३) पिअसही लवङ्गिआवि दीसइ। (ड)

सर्वे उत्तिष्ठन्ति।

ततः प्रविशन्ति संभ्रान्ताः कलहंसमदयन्तिकाबुद्धरक्षितालवङ्गिकाः।

लवङ्गिका। परित्ताअदु परित्ताअदु महाभाओ, अद्धमग्गे क्खु णअररक्खिपुरुसाभिजोओ मअरन्दस्स जादो, तदो तक्कालमिलिदेण कलहंसएण सहिदा अह्मे अणुप्पेसिदाओत्ति (ढ)। (२४)

कल। जधा इदो सुहागदेहिं अह्मेहिं महन्तो जोधकल-

(ठ) निर्व्यूढ़ः खलु भगवत्याः सम्भावनाभारो बुद्धरक्षितायाः।

(ड) अम्महे प्रियसखी लवङ्गिकापि दृश्यते।

(ढ) परित्रायतां परित्रायतां महाभागः अर्द्धमार्गे खलु नगररक्षिपुरुषाभियोगो मकरन्दस्य जातस्ततस्तत्कालमिलितेन कलहंसकेन समं वयमत्रानुप्रेषिता इति।

---

(२१) प्रियं न इति। आलापनाभिनातिप्रियमित्यर्थः।

(२२) अत्र निर्व्यूढ़ो निर्वाहं नीतः। खलु निश्चये। सम्भावना प्रतिष्ठा।

(२३) अम्महे विस्मये।

(२४) अत्राभियोगो अवस्कन्दः।

जधो सुदो तधा तक्केमि अत्तम्मि पारक्कं बलं उवगदं त्ति (थ)। (२५)

माल। अवलोइदे! हद्धी हद्धी! समकालं ज्जेव्व हरिसुव्वेअसम्भेदो उवगदो (त)।

माध। सखि भद्रयन्तिके! स्वागतमेह्येहि, अनुगृहीतमस्मदृग्दृष्टं भवत्याः ननु स एवासौ, माभूत्परिभवोद्वेगः, किमित्यस्वस्था भवती, एकाकिनो बहुभिरभियोग इति न किञ्चिदेतद्वयस्यस्य (२६)। पश्य।

हरेरतुलविक्रमप्रणयलालसस्याहवे,
स एव भवति क्वणत्कररुहप्रचण्डः सखा।
स्फुरत्करटकोटरस्खलितदानसिक्तानन-
द्विपेश्वरशिरःस्थितास्थिदलनैकवीरः करः॥ २७॥

(थ) यथा इतो मुखागतैर्जनात् पुरुषजनात् श्रुतोऽस्माभिस्तथा तर्कयामि अस्मदपि पारक्यं बलमुपगतमिति।

(त) अवलोकिते! हा धिक्! हा धिक्! समकालमेव हर्षोद्वेगसम्भेद उपगतः।

---

(२५) अत्र पारक्यं परकीयम्।

(२६) स्वागतं कुशलम्। स एव प्रसिद्धपौरुषः। असौ मकरन्दः। न किञ्चिदिति न गणनीयमित्यर्थः।

(२७) आहवे युद्धे अतुलविक्रमप्रणयलालसस्य विपुलपराक्रमप्रकाशसतृष्णस्य हरेः सिंहस्य स्फुरतः करटस्य गण्डस्य कोटरात् स्खलितेन दानेन मदजलेन सिक्ताननस्य द्विपेश्वरस्य गजश्रेष्ठस्य शिरःस्थितानां मस्तकस्थितानां अस्थ्नां दलने विदारणे एकवीरः श्रेष्ठवीरः तथा क्वणद्भिः शब्दायमानैः कररुहैः नखैः प्रचण्डः भीषणः स एव करः हस्तः सखा सहायी भवति। विक्रम-प्रकाशने वीरपुरुषो मकरन्दः नान्यसाहाय्यमपेक्षते इति भावः।

तदहमपि विक्रमानुरूपं विलसतः प्रियसुहृदः प्रत्यनन्तरो भवामि (२८) ।

इति विकटं परिक्रामन् कलहंसकेन सह निष्क्रान्तः ।

अवलोकितालवङ्गिकाबुद्धरक्षिता: ।

अवि णाम अणाहदा पडिणिअत्तिस्सन्ति एदे महाणुभावा ? (थ) ।

माल । सहिओ अवलोइदाबुद्धरक्खिदाओ ! तुरिअं गदुअ भअवदीए इमं वुत्तन्तं णिवेदह, तुमम्पि पिअसहि लवङ्गिए ! तुरिदं विण्णवेहि अज्जउत्तं जइ ताव तुम्हाणं अम्हे अणुकम्पणीआ तदो अप्पमत्ता परिक्कमेत्ति (द) ।

निष्क्रान्ता अवलोकितालवङ्गिकाबुद्धरक्षिता: ।

माल । हद्धी ! हद्धी ! ण आणीअदि लवङ्गिआ किं चिराअदि कथं एत्तिआ वेला गमिअदुत्ति, भोदु, पिअसहि मदअन्तिए ! पिअसहीए लवङ्गिआए पडिणिउत्तिमग्गमणुगमिस्सं (ध) ।

(थ) अपि नाम अनाहतौ प्रतिनिवर्त्स्येते एतौ महानुभावौ ।

(द) सख्यौ अवलोकिताबुद्धरक्षिते ! त्वरितं गत्वा भगवत्या इमं वृत्तान्तं निवेदयत, त्वमपि प्रियसखि लवङ्गिके ! त्वरितं विज्ञापय आर्य्यपुत्रं, यदि तावद्युष्माकं वयमनुकम्पनीयास्ततोऽप्रमत्ता: परिक्रामतेति ।

(ध) हा धिक् ! हा धिक् न ज्ञायते लवङ्गिका किं चिरायति, कथमेतावती वेला गम्यते इति, भवतु प्रियसखि मदयन्तिके ! प्रियसख्या लवङ्गिकाया: प्रतिनिवृत्तिमार्गं अनुगमिष्यामि ।

---

(२८) विक्रमस्य पराक्रमस्य अनुरूपं यथा तथा विलसतः कुर्वतः । प्रत्यनन्तरो द्वितीयः ।

परिक्रामति।

[सातङ्कम्] स्फुरितं वामेतरेण लोचनेन (ग)। (२८)

उपविशति।

[प्रविश्य। कपालकुण्डला।] आः पापे! तिष्ठ।

मालती। [सत्रासम्।] हा अज्जउत्त!

[इत्यर्द्धोक्ते सकम्पं नाटयति।]

कपा। [सक्रोधम्।] मन्दाक्रन्द, मन्दाक्रन्द।

त्वद्वत्सलः क्व स तपस्विजनस्य हन्ता,
कन्याविटः पतिरसौ परिरक्षतु त्वाम्।
श्येनावपातचकिता वनवर्त्तिकेव,
किं चेष्टसे ननु चिरात्कवलीकृतासि॥ ३०॥

यावत् श्रीपर्वतमुपनीय लवशो लवशः एनां निकृत्य दुःखमरणां करोमि।

(ग) स्फुरितं खलु वामेतरेण नयनेन।

---

(२८) वामो दक्षिणः। दक्षिणाक्षिस्पन्दनं स्त्रीणामनिष्टसूचकमिति भावः। अनेन कपालकुण्डलाप्रवेशोऽपि सूचितः।

(३०) त्वदिति। तपस्विजनस्य अस्मद्गुरोः अघोरघण्टस्य हन्ता तव वत्सलः त्वां प्रति कृपालुरित्यर्थः स माधवः क्व विद्यते इति शेषः। कन्याविट स्त्रीकामुकः असौ पतिर्माधवः त्वां परिरक्षतु। श्येनस्य पक्षिविशेषस्य अवपातेन चकिता भीता वनवर्त्तिका वनपक्षिणीव किं किमर्थं कम्पसे इति भावः। चेष्टसे। ननु भो मालति! चिराद् बहुदिनात् परं कवलीकृतासि मम हस्ते पतितासि। अधुना श्येनपातभीतवनक्षुद्रपक्षिण्या इव ते सर्वं चेष्टितं विफलमिति भावः। अतः परस्पर-वाक्याक्षेपात् निदर्शना।

इति मालतीमालिङ्ग्य निष्क्रान्ता (११)।

मद। अहम्पि मालदीं ज्जेव्व अणुगमिस्सम्।
[परिक्रम्य।] पिअसहि मालदि! (प)।

[प्रविश्य लवङ्गिका।] सहि मदअन्तिए! लवङ्गिआ क्खु अहम्। (फ)

मद। अवि सम्भाविदो तुए महाणुभाओ (ब)। (१२)

लव। अहि, अहि, सो क्खु उम्मादणाडोअविब्भमादो ज्जेव्व कलअलं सुणिअ, साअक्खेवाअविहविकटोवदक्ख-णिब्भरं पधाविअ, पराणीअं पविट्ठो, तदो पडिणिउत्तम्मि मन्दभाइणी, सुणामि अ घरे घरे गुणाणुराअकादरस्स पौरलोअस्स, हा महाणुभाअ! हा माहव! हा मअरन्द! हा साहसिअ! त्ति परिदेवणाओ, महाराओपि किल एदाणं मन्तिधीआणं विप्पलम्भवुत्तन्तं सुणिअ, सञ्जाअमच्छराधि-

---

(प) अहमपि मालतीमनुगमिष्यामि प्रियसखि मालति!

(फ) सखि मदयन्तिके! लवङ्गिका खलु अहम्।

(ब) अपि सम्भावितस्त्वया महानुभावः।

---

(११) आलिङ्ग्य गृहीता।

(१२) अत्रापि प्रश्नः। सम्भावितो लब्धः।

(१३) अत्र उपनिर्गमः समीपगमनम्। एतेन मार्गस्य सूचनम्। अव-क्षेपोऽवहेला। अपविद्धमाक्रान्तम्। विक्षोभोद्गमघटनाभ्यां निर्भरं गाढं यथा तथा धावितैरग्रैः। अनीकं सैन्यम्। णिआ दुहिता। विप्रलम्भो वञ्चना।

कलअलो, तक्खणविसज्जिदपोढ़पाइक्कचिक्कडो चन्दादवेण सोह-सिहरट्ठिदो पेक्खदित्ति मन्तीअदि (भ)। (१३)

मद। हा हदम्हि! मन्दभाइणी। (म)

लव। सहि! मालदी उण कहिं?। (य)

मद। सा क्खु पढमं ज्जेव्व दे मग्गमवलोइदुं पसरिदा, पच्छादो अहं ण तां पेक्खामि। अवि णाम उज्जाणगहणे पविट्ठा भवे? (र)। (१४)

लव। सहि! तुरिदं अस्ससम्ह। अदिक्कापरा क्खु पिअ-सही इमस्सिं अवसरे ण धारेदि अप्पाणम्। [त्वरितं परि-

---

(भ) नहि नहि स खलु उद्यानवाटीपरिनिर्गमादेव कलकलं श्रुत्वा, सावक्षेपाव-लिप्तविकटीवदनकनिर्भरं प्रधाव्य परानीकं प्रविष्टः ततः प्रतिनिवृत्तास्मि मन्द-भागिनी, शृणोमि च गृहे गृहे गुणानुरागकातरस्य पौरलोकस्य हा महानुभाव माधव! हा मकरन्द! हा साहसिक! इति परिदेवनाः, महाराजोऽपि किलैतयोर्मानिदुर्ललितयोर्विप्रलम्भवृत्तान्तं श्रुत्वा, सञ्जातमत्सराधिक्षेपसन्तृष्णविसर्जित-प्रौढपदातिनिवहश्चन्द्रातपेन सौधशिखरस्थितः प्रेक्षत इति मन्त्र्यते।

(म) हा हतास्मि मन्दभागिनी।

(य) सखि! मालती पुनः क्व?

(र) सा खलु प्रथममेव ते मार्गमवलोकयितुं प्रसृता, पश्चादहं न च तां पश्यामि। अपि नाम उद्यानगहने प्रविष्टा भवेत्?

चन्द्रातपश्चन्द्रप्रकाशः। मालत्या वियोगदशायां तापकत्वेनानुभवादातप इत्युक्तम्। मन्त्र्यते पौरलोकैरेव।

(१४) अथ अवस्था निर्णीता। अयं प्रवृत्तिस्मरणः। अधीश्वादि मध्यावाम्।

क्रम्य ।] सहि मालदि ! णं भणामि सहि मालदित्ति (ल) । (२५)

इतस्ततः परिक्रामतः ।

[प्रविश्य प्रहृष्टः कलहंसकः ।] दिट्ठिआ कुसलेण अम्हे णिग्गदा समरसङ्कडदुग्गमादो । हीमाणहे ! पेक्खामि विअ णिम्मलणिरन्तरहूत-धोद-तरवारिधारा-पडिफलिद-चन्दकिरणुज्जलविडुरिअदंसणं, मदलीलाकलिदकामपालविअडभुज-दण्डाविद्ध-हलहेला--विब्भलिदुव्वेल्लदुत्तरङ्ग--कलिन्द--तणआ-सोतसरिच्छं, विअडविसङ्कलुप्पडिदणिद्दअअमन्दमअरन्दव्वइअ-रक्खोभविअडपडिजोध-पडिवत्तणुम्मदसमत्थगअणङ्गणावआस-विअसत्कलकलं पारक्कबलसमूहम् (व) (२६) ।

(ल) सखि । त्वरितमन्विष्याव: । अतिकातरा न: प्रियसखी अभिन्नवसरे न धारयत्यात्मानम् । सखि मालति ! ननु भणामि मालतीति ।

(व) दिष्ट्या कुशलेन वयं निर्गता: समरसङ्कटदुर्गमात् । हीमानहे ! प्रेक्षे इव निर्मलनिरन्तरीभूतधौततरवारिधाराप्रतिफलितचन्द्रकिरणोज्ज्वलितविकटदर्शनं मद-लीलाकलितकामपालविकट-भुजदण्डाविद्धहलहेलाविह्वलितोद्वेल्लित-तरङ्गकलिन्द-तनयास्रोत:सन्निभं विकटविशृङ्खलोत्पतितनिर्दयामन्दमकरन्दव्यतिकरक्षोभविकट-प्रतियोधपरिवर्तनोद्धतसमस्तगगनाङ्गनावकाशविकसत्कलकलं पारक्यबलसमूहम् ।

---

(२५) अत्र मन्थरम् । अव्ययत्वादनेकार्थत्वम् । तथा च । मदयनमपि नु प्रत्येपीत्यर्थ: ।

(२६) अत्र हीमाणहे इति हे मातरितिवत्खेदस्य द्योतकं । पश्यामीव पर-बलमित्यन्वय: । धौतो निशित: । तरवारि: खड्ग: । विडुरितं भीषणम् । कलित: क्रोडित: । कामपालो हलायुध इत्यमर: । आविद्धा वक्रं प्रेरिता । हेला क्रीडा । कलिन्दतनया यमुना । सन्निभमिति यथा बलेन हलाकृष्टा यमुना प्रतीपमागता तथा परबलमपीति भाव: । विदारित वा यथास्य दाहम्यमुनासाम्यम् । विकटं

अविच। सुमरामि भीसणभुअवज्जजज्जरिदपञ्जराव-सरिदसुभडहत्थावलुत्तविविहाउहणिवहघातिदासेस–रिउसेसं हदविअडापसारपाइक्कसुण्णमग्गसञ्चारणिवत्तिद-विसम--समर-साहसं णाहमाहवम् (अ) (१७)।

अहो गुणाणुराओ णरिन्दस्स। जं दाणिं सोहसिह-रोत्तिण्णपडिहारविणओपणासपडिसमिद-विरोहसङ्कडोवणीदे माहवमअरन्दमुहचन्दे वारंवारं सञ्चारिदसिणिद्धलोअणो, कलहंसघादो अभिजणं जाणिअ, णिवत्तिदमहग्घवहुमाणो, पप्फुरिदमच्छर वेलक्ख-मसी-मलिणिअ-मुहे भूरिवसुणन्दणे मह्-रवअणोवण्णासेण, किंदाणिं तुम्हाणं भुअणाभोअभूसणेहिं महाणुभावेहिं अभिजणदंसणगुणाहिरामेहिं णवचन्द-दंसण-रमणीएहिं जामादुएहिं परितोसोत्ति पडिवोहिअ, गदो

(अ) अपिच स्मरामि भीषणभुजवज्रजर्जरितपञ्जरापसृतसुभटहस्तावलुप्त विविधायुधनिवहघातिताशेषरिपुसैन्यं हतविकटापसारपदातिशून्यमार्गसञ्चार-निवर्त्तितविषमसमरसाहसं नाथमाधवम्।

विस्तीर्णं यथा तथा। विसङ्कटः स्वच्छन्दः। आपतितः सम्मुखागतः। निर्दयो निष्करुणः। अमन्दः सत्वरः। व्यतिकरेण मिलनेन क्षोभः। परिवर्त्तनेन पलायनेन। उद्धत उत्थितः। विसङ्कटितो व्याप्तः। दोर्दोषा भुजा भुज इति शब्दप्रकाशः।

(१७) जर्जरितपञ्जरा अत एवापसृताः पलायिताः सुभटाः तेषां हस्तेभ्योऽव-लुप्त आच्छिन्नः विविधायुधनिवहः तैः घातितम् अशेषरिपुसैन्यं येन तम्। विकटो विषमः। अपसारः पलायनम्। शून्यः। रिक्तः।

(१८) सौधेति। प्रतीहारेण सौधाग्रादवतीर्य्य तयोः स्वरूपं ज्ञात्वा

अब्भन्तरं राआ। इमेवि माहवमअरन्दा आअच्छन्ति। अहम्मि भअवदीए एदं वुत्तन्तं णिवेदेमित्ति (घ)। (३८)

निष्क्रान्त:।

तत: प्रविशतो माधवमकरन्दौ।

मक। अहो प्रेयस: सर्वपुरुषातिशायि निर्व्याजमूर्जितं तेज:। (३९)

तथाहि।

दोर्निष्पेषविशीर्णसञ्चयदलत्कङ्कालमुन्मथ्नत:
प्राग्वीराननुपत्य तत्प्रहरणानाच्छिद्य विक्रामत:।
उद्वेलन्नरमुण्डखण्डनिकराकीर्णस्य, संख्योदधे-
र्द्वैधास्तम्भितपत्तिपङ्क्तिविकट: पन्था: पुरस्तादभूत् ॥४०॥

(घ) अहो ! गुणानुरागो नरेन्द्रस्य यदिदानीं सौधशिखरीतीर्णप्रतीहार-विनयोपन्यासप्रतिशमितविरोधसङ्कटोपनीते माधवमकरन्दमुखचन्द्रे वारंवारं सञ्चारितस्निग्धलोचन: कलहंसकादभिजनं ज्ञात्वा निवर्त्तितमहार्घबहुमान: प्रस्फुरन्मत्सरवैलक्ष्यमसीमलिनितमुखे भूरिवसुनन्दने मधुरवचनोपन्यासेन किमिदानीं युवयोर्भुवनाभोगभूषणाभ्यां महानुभावाभ्यामभिजनदर्शनगुणाभिरामाभ्यां नवचन्द्र-दर्शनरमणीयाभ्यां जामातृभ्यां परितोष इति प्रतिबोध्य, गतोऽभ्यन्तरं राजा एतावपि माधवमकरन्दावागच्छत:। अहमपि इमं वृत्तान्तं भगवत्यै निवेदयामीति।

तदुपन्यास: कृत इत्यर्थ:। अभिजनो वंश:। बहुमान: सम्मान:। तावानीय इष्टा तयो: सापराधयोरपि गुणानुरागादतिगौरवमेव राज्ञा कृतमिति भाव:।

(३९) प्रेयस: प्रीतस्य मकरन्दस्येत्यर्थ:। निर्व्याजं वास्तवम्। ऊर्जितं बलवत्।

(४०) दोरित्यादि। प्रेयसो युद्धार्णवस्य पन्था अग्र एवमभूत्। द्वेधा पार्श्वद्वये स्तम्भितया पत्तिपङ्क्त्या भयङ्कर:। प्रेयस: कीदृशस्य। बाहुसंघर्ष-मर्दितसन्धिस्फुटत्कङ्कालं यथा तथा प्रथमं वीरान् उन्मथ्नतोऽभिभवत:। इतरच

माध । ननु अनुपपन्नमाख्यानमेतत् । पश्य

अन्यैरेवेन्दुमयूखखण्डखचितं पीतं निशीथोत्सवे
यैर्लीलापरिरम्भदायिदयितागण्डूषशेषं मधु ।
सम्प्रत्येव भवद्भुजार्गलगुरुव्यापारभग्नास्थिभि-
र्गात्रैस्ते कथयन्त्यसारविधुरान् प्रायेण संसारिण: ॥४१॥

असंख्यन्तु सौजन्यमस्य नरपते: यत् अपराधिनोरपि अनपराधयोरिव नौ कृतप्रसादमधिष्ठितवान् । तदेहि मालतीसमागममधुना मदयन्तिकाया: स्वरणवृत्तान्तं विस्तरत: कथ्यमानं श्रोतुमिच्छामि । अन्यच्च ।

कथयति त्वयि सस्मितमालतीचलितलोलकटाक्षपराहतम् ।
वदनपङ्कजमुल्लसितत्रपास्तिमितदृष्टि सखी नमयिष्यति ॥४२॥

[इति परिक्रामत: ।] अयमसौ उद्यानवाट: ।

प्रविशत: ।

माध । कथं शून्या एव प्रदेशा: ।

तदीयायुधानि गृहीत्वा पराक्रमं कुर्वत: । इदं विशेषणद्वयं योग्यतया प्रेयस इत्यस्य । संस्योदभै: कीदृशस्य । स्फुरत्प्रसृमरमुक्ताखण्डसमूहश्यामस्य ।

(४१) अन्यैरित्यादि । अन्यैरेव यै: निशीथोत्सवे रात्र्युत्सवे इन्दुमयूखखण्डखचितं चन्द्रकिरणखण्डखचितं लीलापरिरम्भदायिदयितागण्डूषशेषं क्रीडालिङ्गनदायकवनितागण्डूषावशिष्टं मधु मद्यं पीतम् ते पुरुषा: सम्प्रति एव भवद्भुजार्गलगुरुव्यापारभग्नास्थिभि: त्वदीयभुजार्गलप्रबलताड़नात्रुटितास्थिभि: गात्रै: शरीरै: संसारिण: लोकान् प्रायेण बाहुल्येन असारविकलान् सुखविधुरान् कथयन्ति । तथा च । अदृष्टनष्टसुखचेष्टिता: प्राकृतकर्मायत्ता जना इति भाव: ।

(४२) कथयतीत्यादि । त्वयि कथयति सति वदनपद्मं मालत्या एव सखी मदयन्तिका नमयिष्यति । कीदृशम् । सहासमालतीचञ्चलपञ्चकटाक्षै: पराहतम् । उद्गतलज्जानिश्चलदृष्टि च । मदयन्तिकानिमित्तयुद्धश्रवणेन लज्जया हास: ।

मक । वयस्य ! नूनमत्यद्भुतातिरेकोद्वेगपर्य्याकुलत्वात् इतस्ततः परिभ्रमन्तौ आत्मानमत्रैवोद्यानगहने विनोदयन्तौ, भविष्यति तदेहि पश्याव: ।

उभौ परिक्रामतः ।

लव । सहि मदअन्तिए ! मालदि । [सहसावलोक्य ।] दिट्ठिआ पुणोवि एदे महाणुभावा दीसन्ति (स) । (४३)

मकरन्दमाधवौ । भवत्यौ ! क्व सा मालती ? ।

उभे । कुदो मालदी, पदसद्देण, अम्हे विप्पलद्धाओ मन्दभाइणीओ (ह) ।

माध । कथं कथमपि, विध्वंसते मे हृदयं, अतः स्पष्टमभिधीयताम् । (४४)

मम हि कुवलयाक्षीं प्रत्यनिष्टैकबुद्धे-
र्द्रवति हृदयमन्तस्ताम्यतीवान्तरात्मा ।
स्फुरति हि खलु चक्षुः स्पष्टमेतच्च वामम्,
वचनमिह भवत्योः सर्वथा हा हतोऽस्मि ॥ ४५ ॥

(स) सखि मदयन्तिके ! मालती । दिष्ट्या पुनरपि एतौ महानुभावौ दृश्येते ।
(ह) कुतो मालती, पदशब्देन वयं विप्रलब्धा मन्दभागिन्यः ।

---

(४३) अत्रानेनाभ्यां समर्पिता मालती आगता । अधुना तु युवयोरवलोकनेनं आवां वञ्चिते इत्यर्थः ।

(४४) कथमिति वाचि । कथमप्यनिर्वचनीयेन रूपेण ध्वंसते । स्थितिं न भजति ।

(४५) ममेति । कुवलयाक्षीं पद्माक्षीं प्रति अनिष्टैकबुद्धेः अनिष्टमात्रमावहिनो मे मम अन्तर्हृदयमन्तःकरणं द्रवति । अन्तरात्मा परमात्मा अत्यतीवेत्युत्प्रेक्षा । एतद्वामं चक्षुर्नेत्रञ्च स्फुरति हि खलु स्पन्दते च इहात्र विषये

मद। तदो क्खु इदो णिग्गदे महाणुभावे, अवलोइदं बुद्धरक्खिदं भअवदीए सआसं पेसिअ, अप्पमत्तणिमित्तं अज्ज-उत्तं विण्णवेहित्ति लवङ्गिआ अणुप्पेसिदा, तदो उत्तम्ममाणाए ताए मग्गं अवलोइदुं अग्गदो परिट्ठिदा, पच्छादे अहं णअ तं पेक्खामि, तदो अम्मेहिं एत्थ विहरन्तीए हिं विडवन्तराणि जाव विचिदाणि ताव तुम्हे दिट्ठे त्ति (च)। (४६)

माध। हा प्रिये मालति!।

किमपि किमपि मञ्जु मञ्जुलेभ्यो यदन्यद्
विरमतु परिहासश्चण्डि! पर्य्युत्सुकोऽस्मि।
कलयसि कलितोऽहं वल्लभे! देहि वाचम्,
भ्रमति हृदयमन्तर्विह्वलं, निर्दयासि ॥४७॥

(च) तदा खलु इतो निर्गते महानुभावे बुद्धरक्षितामवलोकिताञ्च उभे भगवतीसकाशं विसृज्य, अप्रमत्तनिमित्तं विज्ञापय आर्यपुत्रमिति लवङ्गिका-मनुप्रेष्य उत्ताम्यमानायास्तस्या मार्गमवलोकयितुमग्रतः प्रस्थिता, पश्चादहं न च तां पश्यामि, तत आवाभ्यामिह विहरन्तीभ्यां यावद्विटपान्तराणि विचितानि तावद्युवां दृष्टाविति।

मवत्री: वामं प्रतिकूलं वचनञ्च अदृष्टं यथा तथा अनिष्टं सूचयति इति शेषः। एवेन सर्वथा हतोऽस्मि हा धिक् एतत् सर्वमनिष्टकरमित्यर्थः।

(४६) अत्र पश्चाद्भावो प्रकृते इत्यन्वयः। विचितानि अन्विष्टानि।

(४७) किमपीत्यादि। मञ्जुलेभ्योऽन्यदनिष्टं किमपि अनिर्वचनीयं वचनात्परि-हासादहं मन्ये च परिहासो विरमतु। परिहासेन तव निष्ठुरेऽनिष्टं शङ्केऽसत्त्वं सुखेति भावः। हे चण्डि! कोपने! समुत्सुकोऽस्मि अतः। तथा च कोपे-नापि निष्ठुरं मा कुर्वित्याशयः। अथ मामनेन प्रकारेण कलयसि जिज्ञाससि तर्हि कलितो ज्ञातोऽहम्। हे वल्लभे! वाचं देहि। त्वमेव मे वल्लभा। अतो

उभे। हा पिअसहि! कहिं गदासि। (क)

मक। किमित्यविज्ञाय वयस्य! वैक्लव्यमवलम्ब्यते। (४८)

माध। सखे! किं त्वमपि न जानासि माधवस्नेहदुःखितायास्तस्याः कातर्यचेष्टितानि। (४९)

मक। सत्यमेतत्, किन्तु भगवतीपादमूलगमनमप्याशङ्क्यते, तदेहि तत्र, तावत्पश्यावः।

उभे। एवम्पि सम्भावीअदि। (ख)

माध। एवं नाम भवतु। [सर्वे परिक्रामन्ति।]

मक। विचिन्त्य आत्मगतम्।

याता भवेद्भगवतीभवनं सखी नो
जीवन्त्यथैष्यति, न वेत्यभिशङ्कितोऽस्मि।
प्रायेण बान्धवसुहृत्प्रियसङ्गमादि,
सौदामिनीस्फुरणचञ्चलमेव सौख्यम् ॥५०॥

इति निष्क्रान्ताः सर्वे।

इति मालतीमाधवे अष्टमोऽङ्कः।

(क) हा प्रियसखि! क्वासि।

(ख) एवमपि सम्भाव्यते।

वदेत्यर्थः। विह्वलमधीरं मम चित्तमन्तर्मनसि स्थितिं न लभते। अत एव सोपालम्भमाह निर्दयासि निष्करुणासि।

(४८) वैक्लव्यं दुःखितत्वम्।

(४९) कातर्यं कातरत्वं तेन चेष्टितानि प्राणत्यागादीनि।

(५०) यातेत्यादि। सखी मालती भगवतीमन्दिरं नो याता गता भवेत् यदि याता भवेत् तदा जीवन्ती समागमिष्यति। न वा जीवन्ती यदि तदा नागमिष्यति इति अभिशङ्कितोऽस्मि आशङ्कितोऽस्मि। तत्र हेतुः बन्धुजनमित्रप्रियाणां सङ्गमादौ यत् सौख्यं प्रायेण बाहुल्येन सौदामिनीस्फुरणचञ्चलं विद्युत्स्फुरणवत् चञ्चलमेव भवति।

नवमोऽङ्कः ।

—:•:—

ततः प्रविशति सौदामिनी ।

सौदा । एषास्मि सौदामिनी, भगवतः श्रीपर्वतादुत्पत्य पद्मावतीमुपाश्रिता मालतीविरहिणः संस्तुतप्रदेशदर्शनासहिष्णोः स्थानं परित्यज्य, सह सुहृद्वर्गेण ह्रदद्रोणीशैलकान्तारप्रदेशं परिभ्रमतो माधवस्याधुनान्तिकमुपयामीति । भोस्तथाहमुत्पतिता यथा सकल एव गिरिनगरग्रामसरिदरण्यव्यतिकरश्चक्षुषा परिक्षिप्यते (१) । [पश्चाद्विलोक्य ।] साधु, साधु ।

पद्मावती विमलवारिविशालसिन्धु-
पारासरित्परिकरच्छलतो बिभर्त्ति ।
उत्तुङ्गसौधसुरमन्दिरगोपुराट्ट-
संघट्टपाटितविमुक्तमिवान्तरीक्षम् ॥२॥

---

(१) अधुना पूर्वसूचितसौदामिन्या मालतीजीवननिवेदनेन माधवप्रत्युज्जीवनाय प्रवेशमाह । तत इति । नानासिद्धिस्थानत्वेन देवतात्मकतया भगवत्पदं श्रीपर्वते । संस्तुतः परिचितः । द्रोणी नद्या मध्यम् । तथेत्यनेनोत्पतनस्य दूरत्वमुक्तम् । व्यतिकरः समूहः । परिक्षिप्यत इव नेत्रमण्डले प्रविष्टीक्रियत इव ।

(२) पद्मावतीति पद्मावती नगरीभेदः, विमलानि वारीणि यस्याः सा, तथा विशाला महती च या सिन्धुर्नदी । सिन्धुर्ना सरिति स्त्रियामित्यमरः । तथा पारासरित् नदीविशेषः तयोः परिकरच्छलत उपकरणव्याजेनेत्यपह्नवभेदः । उत्तुङ्गानामत्युच्चानां सौधानां प्रासादानां सुरमन्दिराणां देवमन्दिराणां गोपुराणां पुरद्वाराणाम् अट्टानाम् अट्टालिकानां सङ्घट्टेन परस्परविमर्द्देन पाटितविमुक्तमादौ पाटितं पश्चाद्विमुक्तं स्नातानुलिप्तवत्पूर्वकालैकेत्यादिना कर्मधारयः । नगरीपक्षाकाशं

अपिच। सैषा विभाति लवणा ललितोर्मिपङ्क्ति-
रभ्रागमे जनपदप्रमदाय यस्याः।
गोगर्भिणीप्रियनवोलपमालभारि-
सेव्योपकण्ठविपिनावलयो विभान्ति ॥३॥

[अन्यतोऽवलोक्य।] अयमसौ भगवत्याः सिन्धोर्दारित-
रसातलतटप्रपातः। (४)

यत्रत्य एष तुमुलो ध्वनिरम्बुगर्भ-
गम्भीरनूतनघनस्तनितप्रचण्डः।
पर्य्यन्तभूधरनिकुञ्जविजृम्भमाण-
हेरम्बकण्ठरसितप्रतिमानमेति ॥५॥

एताश्चन्दनाम्रकर्णसरलपाटलप्रायतरुगहनाः परिणत-

शर्म्यं विभर्त्ति धारयति। अत्र सुरमन्दिराणामुत्पाटनाद्यभावेऽपि तत् सम्बन्धकल्प-
नयातिशयोक्तिः। इति अलङ्कारद्वयस्य सजातीयसङ्करः।

(३) सैषेति। ललिताः सुन्दरा ऊर्मिपङ्क्तयो यत्र सैषा दृश्यमानेत्यर्थः।
लवणा नाम नदी विभाति परिशोभते। अभ्रागमे मेघोदये सति जनपदप्रमदाय
देशसन्तोषाय यस्या लवणाया गर्भिणी गौरिति गौ गर्भिणी तस्याः प्रिया नवा
या उलपमाला तृणविशेषराजिः तां बिभ्रति अतएव सेव्याः भ्रमणकारिणां
सुखदाः उपकण्ठविपिनावलयः समीपस्थवनपंक्तयः विभान्ति शोभन्ते।

(४) रसातलतटः पृथ्वीतटः। तलशब्दः स्वरूपे। प्रपातोऽतटम्। यद्वा।
तटे प्रपातोऽतिशयितं पतनम्।

(५) यत्रत्य इति। अम्बूनि गर्भे यस्य स अतएव गम्भीरो यो नूतनघनो
जलभरितजलद इत्यर्थः। तस्य स्तनितं गर्जितं तदिव प्रचण्डः सङ्कटः एव
यत्रत्यः तटनिष्ठ इत्यर्थः। तुमुलः श्रीयमाणो ध्वनिः निनादः, पर्य्यन्ते सीमनि
यानि भूधरनिकुञ्जानि शैलस्थलतादाच्छादितवनभागास्तेषु विजृम्भमाणस्य उल्ल-
सतः हेरम्बकण्ठरसितस्य गणेशगलध्वनेः प्रतिमानं सादृश्यमेति इतीत्युत्प्रेक्षा।

मालूरसुरभयोऽरण्यगिरिभूमयः स्मारयन्ति खलु तरुणकदम्ब-जम्बूवनावनद्धान्धकारगुरुनिकुञ्जगभीरगह्वरोद्गारगोदावरीरव-मुखरितविशालमेखलाभुवो दक्षिणारण्यभूधरान्, अयञ्च मधु-मतीसिन्धुसम्भेदपावनो भगवान् भवानीपतिः अपौरुषेयप्रतिष्ठः सुवर्णविन्दुः इत्याख्यायते (६)। प्रणम्य।

जय देव भुवनभावन! जय भगवन्नखिलनिगमनिधे!।
जय रुचिरचन्द्रशेखर! जय मदनान्तक! जय जगदादिगुरो!
॥ ७ ॥

गमनमभिनीय।

अयमभिनवमेघश्यामलोत्तुङ्गसानु-
र्मदमुखरमयूरीमुक्तसंसक्तकेकः।

---

(६) चन्दनं रक्तचन्दनं देवदारुर्वा उपचारात्। अन्यथास्य मलयजत्व-विरोधात्। अश्मकर्णो वृक्षभेदः। प्रायःशब्दः प्रभृत्यर्थो बाहुल्यार्थो वा। परिणतं पक्वम्। मालूरं विल्वफलम्। तरुणो वृक्षभेदः। अवनद्धो धृतः। उद्गारः प्रतिशब्दः। गोदावरी नदीभेदः। मेखला नितम्बः। भूधरान् मलयादीन्। सौदामिन्या दक्षिणदेशवासित्वेन स्मरणम्। मधुमतीसिन्धोर्नद्योः सम्भेदः सङ्गम-स्तस्य पावनः पावित्र्यहेतुः। स्वयम्भूसन्निधानस्य महातीर्थहेतुत्वात्। अपरि-मिता अज्ञाता पुरुषकृता प्रतिष्ठा स्थितिर्यस्य। एतेन स्वयम्भूत्वमुक्तम्। आख्यानं प्रसिद्धिः।

(७) अदृष्टार्थं स्तुतिमाह। जयेति। भुवनानां कार्यजातानां भावन उत्पादक। दीव्यतीति देव द्युतियुक्त। भगवन् भगं तत्त्वज्ञानं तद्युक्त। तथा च रागद्वेषादिरहित इत्यर्थः। स्तुतिफलमाह। अखिलवरान् भुक्तिमुक्त्या-दीन् ददाति तादृशो निगमो वेदस्तन्निधे तत्कर्त्तः। यद्वा। निगम आविर्भाव-स्तदाश्रय। तथा च। वेदद्वाराविर्भावेन जगदुपकारक इत्यर्थः। मनोज्ञ-चन्द्रभूषण। तथा च वेदकारणाय कृतशरीरपरिग्रह इत्यर्थः। तर्हि पौरुषेय-त्वाद्वेदाप्रामाण्यं स्यादित्यत आह। मदनेति। सर्वदोषनिधेः कामस्य नाशन निर्दोष। अत एव भगवान्। तथा च नोक्तदोषः। आदौ सर्गादौ गुरो। ब्रह्मादीनामित्यर्थात्। तथा च वेदस्य भगवत्कर्तृत्वमायाति।

शकुनिशबलनीडानोकहस्निग्धवर्ष्मा,
वितरति बृहदश्मा पर्वतः प्रीतिमक्ष्णोः ॥८॥

अपि च । दधति कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणि स्त्यानमम्बूकृतानि ।
शिशिरकटुकषायः स्त्यायते शल्लकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥९॥

[ऊर्ध्वमवलोक्य ।] कथं मध्याह्नः, तथाहि अत्र सम्प्रति
काश्मर्याः कृतमालमुद्गतदलं कोयष्टिकष्टीकते,
तीराश्मन्तकशिम्बिचुम्बितमुखा धावन्त्यपः पूर्षिकाः ।

---

(८) अयमित्यादि । अयं पर्वतः गिरिः अक्ष्णोर्नेत्रयोर्हर्षं वितरति ददाति । कीदृशः । नवीनमेघश्यामतुङ्गसानुः । हर्षप्रीतमयूरस्वीकृता संसक्ता मिलिता केका मयूरवाणी यत्र सः । शकुनिभिः पक्षिभिः शबला कर्वुरा ये नीडानोकहाः पक्षिवासवृक्षास्तैः स्निग्धं वर्ष्म शरीरं यस्य सः । तरूणां पक्षिव्याप्तत्वेनाशेषपक्षिणो नीड एव वसन्तीति भावः । बृहदश्मा विपुलशिलः । केका वाणी मयूरस्येत्यमरः । शबलैताश्च कर्वुर इति च । कुलायो नीडमस्त्रियामिति च । अनोकहः कुटः शाल इति च । शरीरं वर्ष्म विग्रह इति च ।

(९) दधतीत्यादि । अत्र गिरौ कुहरभाजां गुहावासिनां तरुणभल्लूकाना-मम्बूकृतानि सनिष्ठीवकथूत्कारध्वनयोऽनुरसितेन प्रतिरवेण गुरूणि स्थूलानि स्त्यानं घनतां दधति । शल्लकीनां वृक्षभेदानां गजखण्डितविस्तीर्णसन्धिपर्वनिर्गतगन्धः स्त्यायते निविडीभवति । निष्यन्दः स्रावः शिशिरः शीतो रसतः कटुः कषायः । स्त्यानमिति भावप्रधानो निर्देशः । अम्बूकृतं सनिष्ठीवमित्यमरः ।

(१०) काश्मर्या इत्यादि । काश्मर्याः गम्भार्याः सकाशात् कृतमालमारग्वधवृक्षम् उद्गतदलं उद्गतपत्रम् । घनच्छायमिति यावत् । कोयष्टिकः कोका इति ख्यातः पक्षी टीकते गच्छति । गम्भार्या अल्पपत्रत्वात् । यद्वा । कृता सम्पन्ना माला वृक्षपङ्क्तिर्यत्र तं प्रदेशं गच्छतीत्यर्थः । तीरस्थोऽश्मन्तकस्तीराश्मन्तकः । शाकपार्थिवादिः । अश्मन्तकोऽम्लकोला इति ख्यात आम्रातको वा वीरवं वा । तस्य शिम्बिः शिखा लताभेदो वा तस्याः चुम्बितं चुम्बनकरणं मुखं यासां तादृशाः

दात्यूहैस्तिनिशस्य कोटरवति स्कन्धे निलीय स्थितम्,
वीरुन्नीडकपोतकूजितमनुक्रन्दन्त्यधः कुकुभाः ॥१०॥

तद्भवतु माधवमकरन्दावन्विष्य, यथाप्रस्तुतं साधयामि।

इति निष्क्रान्ता विष्कम्भकः।

ततः प्रविशति माधवो मकरन्दश्च।

माध। सकरुणं निश्वस्य।

न यत्र प्रत्याशामनुपतति नो वा रहयति,
प्रविष्टिमं चेतः प्रविशति च मोहान्धतमसम्।

पूर्षिका पयजातयोऽपः पानीयानि धावन्ति गच्छन्ति। ग्रीष्मतप्तास्ता नीडं विहाय जलमनुगच्छन्तीत्यर्थः। यद्वा। नीराश्मन्तकं नीरवर्त्तिवीरणमपःपूर्षिका कुम्भीरमक्षिका धावन्ति व्रजन्ति। ग्रीष्मतप्तजलं त्यक्त्वा नीरवीरणादिच्छाया-मनुसरन्तीत्यर्थः। यद्वा। अश्मन्तकं शिंशिपाद्रुमस्य शिञ्जिरमित्यर्थः। तिनिशस्यातिमुक्ताख्यद्रुमस्य छिद्रवति स्कन्धे प्रकाण्डे छायासेवनार्थं दात्यूहैः पक्षिभेदैः कोड्डाङ्काक इति ख्यातैर्निलीय स्थितम्। वीरुल्लता नीडं वासो यस्य कपोतस्य पाण्डुनामपक्षिणः कूजितं लक्षीकृत्य कुकुभा अधस्तरूणां रुदन्ति। ग्रीष्मतापात् कपोता निजनीड़वासिनः कुकुभाश्च तृषार्त्ता रुदन्तीत्यर्थः। जाति-स्वभाव एवासौ। यद्वा। कुकुभाः क्रन्दन्त्याह्लादयन्ति। अयो कपोतरुत-मित्यभिलपन्तीत्यर्थः। गम्भारी सर्वतो भद्रा काश्मरी मधुपर्णिकेत्यमरः। आर-ग्वधे राजवृक्षशम्याकचतुरङ्गुलाः। आरेवतव्याधिघातकृतमालसुवर्णका इति च। कोयष्टिकष्टिट्टिभक इत्यपि। आम्रातकेऽश्मिकायामश्मन्तको वीर-णेऽपि च। शिंशिपाश्मन्तकं प्राहुरिति धरणिः। शिञ्जिः शिञ्जा लताभेद इति विश्वः। नासाच्छिद्र्यां तु पूर्षिकेति च। पूर्षिका पक्षीति ख्याता पत-ङ्गेति ख्याता वा। अपःपूर्षिका कुम्भीरमक्षिकेत्यपि धरणिः। दात्यूहः काल-कण्टक इत्यमरः। तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तक इति च। अस्त्री प्रकाण्डः स्कन्धः स्यादिति च। तित्तिरिः कुकुभो लाव इति च। मयूरप्रमा-णोऽयं पक्षी।

(११) नेति। यत्र विपदि आशां नानुपतति नानुगच्छति, नोवा रहयति त्याजयति आशामित्यर्थः। आशायाश्चिरावस्थायित्वात्। प्रविविक्तं परिमलितं

अकिञ्चित्कुर्वाणाः पशव इव तस्मा वयमहो
विधातुर्वामत्वाद्विपदि परिवर्त्तामह इमे ॥११॥

माध । हा प्रिये मालति ! शान्ति, कथमविज्ञाततत्त्वम् अद्भुते झटिति पर्य्यवसितासि, ननु भवत्ये ! प्रसीद सम्भावय माम् ।

प्रियमाधवे ! किमसि मय्यवत्सला
ननु सोऽहमेव यमनन्दयत् पुरा ।
अयमुद्गृहीतकमनीयकङ्कण-
स्तव मूर्त्तिमानिव महोत्सवः करः ॥१२॥

वयस्य मकरन्द ! दुर्लभः पुनर्जगति तावतः स्नेहस्य सम्भवः ।

सरसकुसुमश्यामैरङ्गैरनङ्गमहाज्वर-
श्चिरमविरतोन्माथी सोढः प्रतिक्षणदारुणः ।
तृणमिव ततः प्राणान्मोक्तुं मनो विधृतं तथा,
किमपरमतो निर्व्यूढं यत्करार्पणसाहसम् ॥१३॥

चेतः चित्तं मोहान्धकारं मोहरूपं गाढ़ान्धकारं प्रविशति च । तस्मा अकिञ्चित् कुर्वाणा न किमप्युपकारकारका अतएव पशवसद्धर्माण इमे वयं विधातुः वामत्वात् प्रातिकूल्यात् परिवर्त्तामहे परिवर्त्तनशीला भवामः, अहो इत्याश्चर्य्यम् ।

(१२) प्रियेति । प्रियो माधवो यस्या स्तत्‌ सम्बुद्धिः हे माधवानुरक्ते ! किं कथं मयि अवत्सला निर्दयासि भवसि एतदनौचित्यं ते इति भावः । ननु मालति ! सोऽहमेव, न मम किमपि परिवर्त्तनं जातमित्यर्थः । उद्गृहीते न्यस्ते कमनीये कङ्कणे यत्र तादृशोऽयं तव मूर्त्तिमान् शरीरी महोत्सवः आनन्द-पराकाष्ठेव अयं करः पुरा प्रथमं यमनन्दयत् सन्तोषयामास ।

(१३) सरसेति । सरसैः कुसुमैरिव श्यामैः क्षामैः कोमलैरित्यर्थः अङ्गैः अविरतोन्माथी नियतदाहकः अतएव प्रतिक्षणदारुणः अत्याश्चरूप इत्यर्थः । अनङ्ग-महाज्वरः कामरोगश्चिरं सोढ़ः । ततः तादृशकष्टानन्तरं प्राणान् तृणमिव मोक्तुं

अपि च । मयि विगलितप्रत्याशत्वाद्विवाहविधेः पुरा,
विकलकरणैर्मर्मच्छेदव्यथाविधुरैरिव ।
स्मरसि रुदितैः खेदाकूतं तथा व्यतनोदसा-
वहमपि यथाभूवं पीडातरङ्गितमानसः ॥१४॥

[सावेगम् ।] अहो नु खलु भोः !

दलति हृदयं गाढोद्वेगं द्विधा तु न भिद्यते,
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।

त्यक्तुं तथा मनो विधृतम् अवधारितम् अतोऽपरमन्यत् किं विद्यते यत् करार्पण-साहसं निर्व्यूढं प्रकटीकृतं भवतीत्यर्थः ।

(१४) मयीत्यादि । सखे असौ प्रिया स्वं इङ्गितं रुदितैस्तथा विस्तारयामास यथा पीडाचपलचित्तोऽहमप्यभूवं भूतोऽस्मीति स्मरसि । इतिरध्याहार्यः । अन्यथा कर्माप्राप्तिः । रुदितस्य करुणजन्यत्वात् करुणहेतुमाह । विवाहविधिः पूर्वं मयि नैराश्याद्विकलानि स्वविषयव्यापृतानि करणानि इन्द्रियाणि तैः लक्षिता । अनेन मोह उक्तः । लक्षणे तृतीया । कीदृशैः । मर्मच्छेदव्यथादीनैरिव । अनेन निःश्वासवत्त्वमुक्तम् । निःश्वासेन मर्मच्छेदोन्नयनात् । तथा च निःश्वासरुदितमोहैः करुणरस उक्तः । यद्वा । विकलकरणैर्व्यतनोद्रुदितैरिव । इतरत्समम् ।

(१५) दलतीत्यादि । मम हृदयं दलति विदीर्यते । सवेदनत्वात् । गाढोद्वेगं दृढोद्वेगम् नैव द्विधा भिद्यते द्विधा भिन्नं न भवति । स्फुटिते पीडोपशान्तिरिति भावः । तुशब्द एवार्थे पुनरर्थे वा । पुनर्न भिद्यते इत्यर्थात् । भिद्यत इति कर्मकर्तरि लक् । यच्च दलति तन्न भिद्यत इति विरोधाभासः । एवमुत्तरत्रापि । विकलः कायो मोहं दधाति न तु चेतनां त्यजति । पुनश्चैतन्ययोगात् । स्थिरे मोहे दुःखाज्ञानात् कृतार्थः स्यामिति भावः । तदिह आध्यात्मिकविपद्द्वयमुक्तम् । अन्तर्दाहः शरीरं दीपयति न भस्मसात् करोति । कार्त्स्न्येन भस्मरूपं न करोतीत्यर्थः सातिः कार्त्स्न्ये । तथात्वे दुःखाज्ञानमेव स्यादित्याशयः । अनेनाधिभौतिकी विपदुक्ता । तदिह व्याधिदशायां मोहा-

ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्,
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥१५॥

मक। वयस्य माधव! निरवग्रहं दहति दैवमिव दारुणो विवस्वान्, इयञ्च ते शरीरावस्था, तत् अस्य पद्मसरसः, परिसरे मुहूर्त्तमास्यताम्। अत्र हि

उन्नालबालकमलाकरमाकरन्द-
निष्यन्दसम्वलनमांसलगन्धबन्धुः।
त्वां प्रीणयिष्यति पुरःपरिवर्त्तमान-
कल्लोलशीकरतुषारजडः समीरः ॥१६॥

इति परिक्रम्योपविशतः।

मक। [स्वगतम्।] भवतु एवं तावत् अन्यतः प्रक्षिपामि। [प्रकाशम्।] वयस्य माधव!।

एतस्मिन्मदकलमल्लिकाख्यपक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः।

दय उक्ताः। यदाह। मनःक्षोभस्सर्वाङ्गदाहवक्ष्वादिभिस्तथा। शिरसो वेदनाभिश्च व्याधेरभिनयो भवेत्। इति। इह कायावच्छिन्न आत्मा कायपदेनोक्तः। अन्यथा मोहस्य आत्मधर्मतया कायेऽसम्भव इत्यवधेयम्। स्त्रिया मूर्त्तिस्तनुस्तनूरित्यमरः।

(१६) उपवेशनफलमाह। उन्नालेत्यादि। समीरो वायुरिह त्वां प्रीणयिष्यति प्रीतिं करिष्यति। तद्योग्यतामाह। ग्रीष्मान्तेऽल्पोदकतया उद्गतनाला बाला ये पद्माकरास्तेषां माकरन्दनिष्यन्देन पुष्परसोपचयेन यत् संवलनं मिश्रणं तेन मांसलः पुष्टो यो गन्धः तस्य बन्धुः मित्रम्। अथ दोलायमानकल्लोलशीकरैः शीतलो जडो मन्दः। यद्वा। शीकर एव तुषारस्तैर्जडः शीत इत्यर्थात्। आकरो निवहोत्पत्तिस्थानश्रेष्ठेषु कथ्यत इति मेदिनीकारः। माकरन्दः। तस्येदमित्यण्।

(१७) एतस्मिन्नित्यादि। अत्र सरसि शोभायुक्ता भुवः प्रदेशा दृश्यन्ताम्।

वाष्पाम्भःपरिपतनोद्गमान्तराले
दृश्यन्तामविरहितश्रियो विभागाः ॥१७॥

माधवः सोद्वेगमुत्तिष्ठति ।

मक । कथं प्रतिपत्तिशून्यमुत्थाय अन्यतः प्रवृत्तः (१८) । [निःश्वस्योत्थाय च ।] सखे ! प्रसीद । पश्य

वानीरप्रसवैर्निकुञ्जसरितामासक्तवासं पयः,
पर्य्यन्तेषु च यूथिकासुमनसामुज्जृम्भितं जालकैः ।
उन्मीलत्कुटजप्रहासिषु गिरेरालम्ब्य सानूनिह,
प्राग्भारेषु शिखण्डिताण्डवविधौ मेघैर्वितानाय्यते ॥१९॥

अश्रुपूर्णनेत्रतया दर्शनमाशङ्क्याह । एकस्य नेत्रजलस्य परिपतनमन्यस्योत्थानं तयोर्मध्ये । प्रदेशाः कीदृशाः । हर्षाव्यक्तमधुररवहंसविशेषपक्षकम्पितचलद्दीर्घनालपद्माः ।

(१८) प्रतिवाक्यप्रदानादिशून्यालोकनवर्जनम् । तूष्णीम्भावो विचेतस्त्वं जड़तायां भवन्ति हि । इति जड़ताचिह्नं माधवे दृष्ट्वा सचमत्कारमाह । कथमिति निरूप्य नेयं जड़ता किं त्वनुस्मृतिरित्याह शून्यमिति । शून्यं निर्लक्ष्यमन्यतो गमनेनानुस्मृतिः । यद्वा । अन्यतः शून्यं मालतीव्यतिरिक्तवस्तुज्ञानात् । अत एव प्रदेशादन्यकार्य्याणां कथितानुस्मृतिरिति । अप्रतिपत्तिशून्यमिति पाठेऽनवधानेन चैतन्यविरही यथा तथा उत्थायेत्यर्थः ।

(१९) वानीरेत्यादि । सखे ! कुञ्जसम्बन्धि नदीनां पयः पश्य । वेतसपुष्पैर्लब्धसौरभम् । तासामेवोपान्तेषु च यूथिकाकुसुमानां जालकैः कोरकैः विकासितम् । यद्वा । यूथिकाश्च सुमनसश्च तासां जालकैः । यूथिका जूहीति प्रसिद्धा । सुमनसो जात्यः । सुमना मालती जातिरित्यमरः । तथा गिरेः सानूनेकदेशानालम्ब्येह प्राग्भारेषु शिखरेषु वर्त्तमानैर्मेघैर्वितानाय्यते । वितानाचारः क्रियते । मयूरनृत्यविधाननिमित्तम् । निमित्तसप्तमीयम् । कीदृशेषु । विकसत्कुटजपुष्परूपहासवत्सु । तदिह मयूरनृत्यार्थं मेघैर्वितानं कृतमेवास्ति इति यत्तत्पश्येत्यर्थः । एवं च कुटजहासा द्रष्टारो मयूरा नर्तका मेघो वितानमिति नृत्यसामग्री । ध्वनिस्तु शिखण्डिपदेन पक्षचूडोपेतशिरस्क-

अपि च।

जृम्भाजर्जरडिम्बडम्बरघनश्रीमत्कदम्बद्रुमाः
शैलाभोगभुवो भवन्ति, ककुभः कादम्बिनीश्यामलाः।
उद्यत्कन्दलकान्तकेतकभृतः कच्छाः सरित्स्रोतसा-
माविर्भूतशिलीन्ध्रलोध्रकुसुमस्मेरा वनानां ततिः॥२०॥

माध। सखे! पश्यामि, किन्तु दुरालोकरमणीयाः सम्प्रति अरण्यभूमयः तत्किमेतत्। [सास्रम्।] अथवा किमन्यत्।

त्वेन विदूषक उक्तः। प्राग्भारपदेन च प्राग्भरतीति प्राक्प्रकृष्टज्ञानवान भारो दुःसहो यस्य स मूर्खो दर्शितः। तस्य च हास उचित एव। यद्वा। शिखण्डिपदेन शिशिखण्डयोगितया बाल उक्तः। तस्य च नृत्ये मूर्खो हसत्येव। बालानामपि कर्तव्यं शिशिखण्डविभूषणम्। इति बालानां शिखण्डित्वे मानम्। वानीरवञ्जुला इत्यमरः। क्षारको जालकं क्लीबे कलिका कोरकः पुमानिति च। वितानमाचरतीत्यर्थे क्यङन्ताद्यक्ति वितानायत इति रूपम्।

(२०) जृम्भेत्यादि। सखे! शैलपर्यन्तभूमयो जृम्भया विकासेन जर्जरः पृथग्भूतौ यौ डिम्बौ गोलकस्तस्य डम्बरेणारम्भेण व्याप्ता अत एव श्रीमन्तो नीपवृक्षा यत्र तादृश्यो भवन्तीति यत्तत्पश्येत्यर्थः। एवं सर्वत्र दिशो मेघमालाश्यामा भवन्ति। यद्वा। कादम्बानां कलहंसानां स्त्रियः कादम्बिन्यस्ताभिः श्यामाः। नदीप्रवाहाणां कच्छाः कूलानि उद्यद्भिर्विकसितैः कन्दलैर्नवाङ्कुरैः कान्ता मनोज्ञा ये केतकवृक्षास्तद्धारका भवन्ति। यद्वा। उद्यन् कन्दलः कन्दो यस्य कान्तकेतकस्येत्यर्थः। यद्वा। उद्यन् यः कन्दली मल्लीदलं कान्तकेतकं च बिभ्रतीत्यर्थः। वनानां ततिः माला आविर्भूतगन्धानि व्यक्तीभवत्सौरभाणि यानि शिलीन्ध्रलोध्रकुसुमानि तैः स्मेरा सहासेव। मनोज्ञा वा शिलीन्ध्रं कन्दलीपुष्पमिति विश्वः शिलीन्ध्रं सूत ख्यातम्। वनमिह पद्मं जलं विपिनं वा। जृम्भा विकासजृम्भयोरिति विश्वः। डिम्बोऽस्त्रेऽपि च गोलक इति धरणिः। डम्बरोऽस्त्री समारम्भ इति विश्वः। कादम्बिनी मेघमाला कादम्बकी च कथ्यत इति शाश्वतः। कन्दलः कलहे कन्दे मल्लामङ्कुरसङ्घयोरिति मेदिनीकारः। पुंसि कच्छस्तथाविध इत्यमरः। वनं नीरेऽम्बुजे क्लीबं काननेऽप्यालये वनमिति मेदिनीकारः।

उत्फुल्लार्जुनसर्जवासितवहत्पौरस्त्यझञ्झानिल-
प्रेङ्खोलत्स्खलितेन्द्रनीलशकलस्निग्धाम्बुदश्रेणयः।
धारासिक्तवसुन्धरासुरभयः प्राप्तास्त एवाधुना
घर्माम्भोविगमागमव्यतिकरश्रीवाहिणो वासराः ॥२१॥

हा प्रिये मालति ! ।

तरुणतमालनीलबहुलोन्नमदम्बुधराः,
शिशिरसमीरणावधूतनूतनवारिकणाः।

---

(२१) उत्फुल्लेत्यादि। अधुना त एते दिवसाः प्राप्ता ये मनोराज्येन मया धृता इत्यर्थः। इह त एत इति सर्वनामभ्यां दिनानामत्युत्कण्ठाहेतुत्वं ध्वनितम्। कीदृशाः। उत्फुल्लाभ्यामर्जुनशालाभ्यां वासितः सुरभीकृतो वहन् पौरस्त्यः प्राच्यो यो झञ्झानिलः प्रबलवायुः प्रावृषेण्यवातो वा तस्य प्रेङ्खोलेन आन्दोलनेन स्खलिताः स्थानच्युता इन्द्रनीलमणिखण्डा इव श्यामा मेघपङ्क्तयो येषु ते। अत्रार्जुनपदस्थेऽपि द्वितीयतरोः सर्जस्य ग्रहणं कदम्बाद्युपलक्षणार्थम्। तथा शोभोपततमहीशिकसौरभवन्तः। ईषद्वृष्टौ तदुद्गमात्। घर्मस्य ग्रीष्मस्य विगमोऽपगमोऽम्भस आगम आगमनं तयोर्व्यतिकरः सम्बन्धस्तेन श्रियं शोभां वोढुं शीलं येषां ते। यद्वा। घर्माम्भसः स्वेदजलस्य यौ विगमागमौ तयोर्व्यतिकरः सम्भेदः। वर्षारम्भ इत्यर्थः। तस्य श्रीः सम्पत्तिस्तद्वाहिन इत्यर्थः। पौरस्त्य इति पुरस्त्यक्। झञ्झा ध्वनिविशेषे स्यादिति मेदिनीकारः। तदन्वितोऽनिलो झञ्झानिलः। यद्वा। झञ्झानिलः प्रावृषेण्य इति रत्नकोषः। अत्र वास्यमानेति कर्तव्ये संपूर्णक्रियत्वपरनिष्ठाप्रत्ययान्तवासितपदोपादानात् समस्तपुष्पसौरभसंक्रान्तिर्वायोर्ध्वनिता। अत एव मलयानिलात् झञ्झानिलोत्कर्षः कटाक्षितः। उन्मादावस्थो माधवः। उन्मादश्चेष्टवियोगात्। यदाह। इष्टजनस्य वियोगादुन्मादो विभवनाशाच्च।

(२२) तरुणेत्यादि। कथमधुना दिशोऽहमवलोकयेयम्। तरुणतमालानीलास्तद्वन्नीलाः प्रचुरा उन्नमन्तो मेघा यासु ताः। शीतवातचलितनवजलकणाः। हरेरिन्द्रस्य हेतिरस्त्रं धनुस्तद्वतीः। मदकलमयूरकोलाहलैः शब्दवतीः॥ ककुप् ककुभावपि चेति विश्वः। सरित इति पाठे प्रतिबिम्बेन मेघ-

कथमवलोकयेयमधुना हरिहेतिमती-
र्मदकलनीलकण्ठकलहैर्मुखराः ककुभः ॥२२॥

मोहमाप्तिं नाटयति।

मक। कोऽप्यतिदारुणो दशाविपाकः सम्प्रति वयस्यस्य। [सास्रम्।] मया पुनर्वञ्चमयेन कोऽपि विनोद आरब्धः। [निश्वस्य।] एवं पर्यवसितप्रायैव नो माधवं प्रति प्रत्याशा। [सभयं विलोक्य।] कथं प्रमुग्ध एव ?। [आकाशे।] सखि मालति ! किमपरं निरनुक्रोशासि। (२३)

अपहस्तितबान्धवे त्वया विहितं साहसमस्य तृष्णया।
तदिहानपराधिनि प्रिये सखि ! कोऽयं करुणोज्झितक्रमः ॥२४॥

कथमद्यापि नोच्छ्वसिति, हन्त मुषितोऽस्मि दैवेन।

मातर्मातर्दलति हृदयं, ध्वंसते देहबन्धः,
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि।

यत्वम्। हरिः कृष्णस्य हेतिश्चक्रं तन्नामकपक्षियुक्ताः। दुःखितैर्नरैर्ग्रामं दुःखमयत्वेनैव। यदाह। अतून् पश्यति दुःखार्तः सर्वान् दुःखसमाश्रितान् ॥ इति। तदनेन प्रबन्धेन वर्षाकाल उक्तः। यदाह। कदम्बनीपकुटजैः शाद्वलैः सेन्द्रगोपकैः। मेघवातैः सुखस्पर्शैः प्रावृट्कालं प्रदर्शयेत् ॥ मोहेति। मूर्च्छितः पततीति भावः।

(२३) विनोदचित्तस्वास्थ्यम्। प्रमुग्धः संज्ञाशून्यः। अनुक्रोशोऽनुकम्पा तद्विपरीतासि।

(२४) अपेत्यादि। अमर्षितमातापित्रादिके हे सखि ! अस्य लोभेन त्वया साहसं कृतम्। तदिह प्रिये प्रीते निरपराधेऽपि निर्दयः क्रमः कोऽयम्। कीदृशं परिपाटिरेवेत्यर्थः। कथमीदृशं पतिं त्यक्त्वा निर्दयासीति भावः।

(२५) मातरिति। मातर्मातरिति सम्भ्रमे द्विर्भावः। हृदयं दलति विदीर्यते, देहबन्धोऽवयवसंस्थानविशेषः ध्वंसते नश्यति। जगत् शून्यं मन्ये अविरतं

सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा,
विष्वङ्मोहः स्थगयति, कथं मन्दभाग्यः करोमि ॥२५॥

कष्टं भोः कष्टम्।

बन्धुताहृदयकौमुदीमहो, मालतीनयनपूर्णचन्द्रमाः।
सोऽयमद्य मकरन्दनन्दनो, जीवलोकतिलकः प्रलीयते ॥२६॥

हा वयस्य माधव!

गात्रेषु चन्दनरसो दृशि शारदेन्दु-
रानन्द एव हृदये, मम यस्त्वमासीः।
तस्त्वां निकामकमनीयमकाण्ड एव
कालेन जीवितमिवोद्धरता हतोऽस्मि ॥२७॥

ज्वाला यस्मिन् कर्मणि तद्यथा तथा अन्तरन्तःकरणे ज्वलामि दग्धोऽस्मीत्यर्थः। सीदन्नवसादमापन्नोऽत एव विधुरो व्याकुलोऽन्तरात्मा अन्धे तमसि गाढान्धकारे मज्जतीवेत्युत्प्रेक्षा। विष्वक् समन्तात् मोहः स्थगयति निर्व्यापारं करोतीत्यर्थः मन्दभाग्यो हतभाग्योऽहं कथं किं करोमि तत्सङ्गमं विना न किमपि मे सुखम् ऐहिकं दृश्यते इत्यर्थः।

(२६) बन्धुतेति। बन्धुतामयं यद्धृदयं तस्य कौमुदीमहः चन्द्रिकोत्सवः, मालतीनयनयोः पूर्णचन्द्रमाः पूर्णेन्दुः स इवाह्लादजनक इत्यर्थः। मकरन्दस्य नन्दनो मोदयिता जीवलोकस्य संसारस्य तिलकः भूषणस्वरूपोऽयं स माधवः अद्य प्रलीयते अदर्शनतां यातीत्यर्थः।

(२७) गात्रेष्विति। हे माधव! यस्त्वं मम गात्रेषु चन्दनरसः मलयजलेपः दृशि नयने शारदेन्दुः शारदशशधर इव आनन्दकः। हृदये आनन्द एव आसीरभूः। तत् तस्मात् निकामकमनीयमतिसुन्दरं त्वां जीवितं मदीयचित्तमिव अकाण्डेऽकस्मात् उद्धरता हरता कालेन मृत्युना हतोऽस्मि, त्वां हरता कालेनाहमपि हत इत्यर्थः। अत्रैकस्य माधवस्य मकरन्ददेहे बहुविधचन्दनादिरूपसम्भावनया पर्य्यायालङ्कारभेदः समवगन्तव्यम्।

वचनम् ।

अकरुण ! वितर स्मितोज्ज्वलां दृशमतिदारुण ! देहि मे गिरम् ।
सहचरमनुरक्तमेतकं प्रियमकरन्द, कथं न मन्यसे ॥ २८ ॥

माधवः संज्ञां लभते ।

मक । [सोच्छ्वासम् ।] अयमचिरधौतराजपट्टरुचिरमांस-लच्छविर्नवजलधरः तोयशीकरासारेण मे वयस्यं जीवयति, दिष्ट्या जगदुच्छ्वसितं तावत् । (२९)

माध । तत्कथमत्र विपिने प्रियावार्त्ताहरं करोमि (३०) । [विलोक्य ।] साधु, साधु ।

फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलिततनुतरङ्गामुत्तरेण स्रवन्तीम् ।
उपचितघनमाल-प्रौढतापिञ्छनीलः,
श्रयति शिखरमद्रेर्नूतनस्तोयवाहः ॥ ३१ ॥

---

(२८) सोन्मादो विलपति । अकरुणेत्यादि । हे अकरुण ! निर्दय ! स्मितोज्ज्वलां हासमनोज्ञां दृशं देहि । हासपूर्वं पश्येत्यर्थः । यद्वा । स्मितेन हास्यविकाशेन उज्ज्वलां विकसितामित्यर्थः । वचनादानात् हे अतिदारुण ! मे मह्यं गिरं वाचं देहि । प्रियमकरन्दं सहचरं मित्रम् अनुरक्तमेतकम् अनुरक्तचित्तं कथं न मन्यसे । कथं नाङ्गीकरोषि । इष्टविनाशादीनां सत्त्वात् करुणो रसः । यदाह । इष्टनाशधनापायबन्धुव्यसनताडनैः । शापक्लेशोपघातैश्च जायते करुणो रसः । अश्रुनिश्वासवैवर्ण्यस्रस्ताङ्गैश्च कृतिचयैः । परिदेवितशोकाद्यैरभिनेयः स सूरिभिः ।

(२९) अचिरधौतत्वेन राजपट्टस्य नीलत्वस्निग्धत्वे उक्ते । राजपट्टं मणिभेदः तद्वत् रुचिरा दीप्तिमती मांसला घना छविः कान्तिर्यस्य सः ।

(३०) वार्त्ताहारी दूतः । अतिमदनवशतया दूतप्रेषणम् ।

(३१) फलेति । फलभराणां फलसमूहानां यः परिणामः परिपक्वावस्था तेन श्यामं श्यामवर्णं यत् जम्बूनिकुञ्जं तस्मात् स्खलिता अतएव तनुतरङ्गा अल्पो-र्मयो यस्याः तां स्रवन्तीं नदीं उत्तरेण तस्या नद्या उत्तरस्मिन्भागे इत्यर्थः ।

सादरमुत्थाय सम्मुखः कृताञ्जलिः ।

कच्चित्सौम्य ! प्रियसहचरी विद्युदालिङ्गति त्वाम् ?
आविर्भूतप्रणयसुमुखाश्चातका वा भजन्ते ? ।
पौरस्त्यो वा सुखयति मरुत् साधु संवाहनाभिः ?
विष्वग्बिभ्रत्सुरपतिधनुर्लक्ष्म लक्ष्मीं तनोति ॥३२॥

[आकर्ण्य ।] अये ! प्रतिरवभरितकन्दरानन्दितोत्कण्ठनीलकण्ठकलकेकानुबन्धिना मन्द्रहुङ्कृतेन, मामनुमन्यते, यावदर्थये । भगवन् जीमूत ! (३३)

एनशब्दयोगे द्वितीया । उपचिता वर्द्धमाना घना निविडा माला श्रेणी यस्य, अतएव प्रौढतापिञ्छनीलः परिपक्वतापिञ्छवत् नीलवर्ण इत्यर्थः । नूतनस्तोयवाहः नवमेघः अद्रेः पर्वतस्य शिखरं शृङ्गं श्रयति अवलम्बते ।

(३२) कच्चिदित्यादि । प्रार्थनोचितं सुभगप्रश्नमाह । हे सौम्य सुन्दर ! प्रिया वल्लभा सहचरी सततानुगता विद्युत् त्वामालिङ्गति कच्चित् । कथयेत्यर्थः । कच्चित् कामप्रवेदन इत्यमरः । विरहित्वेन कान्ताभिलाषात् प्रथमं कान्तासङ्गमप्रश्नः । प्रियालिङ्गने सुखं तद्विरहे दुःखमिति त्वमपि जानासीति ध्वनितम् । यद्वा । कच्चिदेवमभिमतं ममेत्यर्थः । आविर्भूतप्रणयेन उत्पन्नस्नेहेन सुभगाः सुमुखाश्चातकास्त्वां सेवन्ते वा ? । वा समुच्चये । अनेनार्थिसम्पत्तिरुक्ता । पौरस्त्यः मरुत् पूर्ववातश्च साधु संवाहनाभिः मृदुप्रेरणाभिस्त्वां सुखयति वा ? । अन्योऽपि सहायश्चरणमुष्टिघट्टनादिरूपसंवाहनां कुरुत इति ध्वनिः । अनेन सहायसम्पत्तिरुक्ता । विष्वक् सर्वतो लक्ष्मीं शोभां बिभ्रत् सुरपतिधनुः इन्द्रधनुः कर्तृ लक्ष्म चिह्नं तव तनोति । अनेन प्रसाधनमुक्तम् । विश्वं बिभ्रदिति पाठे हे विश्वं बिभ्रद् भुवनं दधान । सर्वेषां शस्यादिसम्पत्त्या जगदुपकारकत्वमुक्तम् । प्रसाधनमाह । इन्द्रधनूरूपं चिह्नं तव शोभां तनोति । बिम्बं बिभ्रदिति पाठे तु बिम्बं मण्डलं शोभां तनोति । कीदृशम् । इन्द्रधनुश्चिह्नं बिभ्रद्धारणम् । तदिह जगदुपकारकतया ममाप्युपकारं करिष्यसीति भावः ।

(३३) वर्षितेनानुमतिमाह । अये इति । प्रतिशब्दभरितकन्दरत्वेनानन्दिता

दैवात्पश्येर्जगति विचरन्निच्छया मत्प्रियां चेत्
आश्वास्यादौ तदनु कथयेर्माधवीयामवस्थाम्।
आशातन्तुर्न च कथयतात्यन्तमुच्छेदनीयः,
प्राणत्राणं कथमपि करोत्यायताक्ष्याः स एकः॥२४॥

[सहर्षम्।] अहो! प्रचलितः तदन्यत्र सञ्चरामि (२५)।

परिक्रामति।

मक। [सोद्वेगम्।] कथमिदानीमुन्मादोपरागो माधवेन्दुमास्कन्दति, हा तात! हा अम्ब! भगवति! परित्रायस्व, परित्रायस्व पश्य माधवावस्थाम्। (२६)

सम्बद्धोत्कण्ठा यस्य सः। यद्वा। आनन्दिता हृष्टा उत्कण्ठा उद्ग्रीवा इत्यर्थः। मन्द्रं गभीरम्। अनुमन्यते स्वीकरोति। आर्त्तिवशाद्देवत्वारोपणेन भगवन्निति। अवधारणे यावत्। जीमूत! मेघ!।

(२४) दैवादित्यादि। इच्छया जगति विचरंस्त्वं मत्प्रियां यदि दैववशात्पश्येर्द्रक्ष्यसि तदा प्रथमं तां प्रबोध्य अथ माधवदशां कथयिष्यसि। अवस्थानिवेदनेन तन्मरणमाशङ्क्याह। कथयता त्वया आशा पुनःसङ्गमप्रत्याशा सैव तन्तुः जीवनबन्धहेतुत्वात् नैव अत्यन्तम् अत्यर्थम् उच्छेदनीय उच्छेद्यः। चैवार्थे। अत्र हेतुमाह। स आशातन्तुः एकस्तस्याः प्राणत्राणं कष्टाकष्ट्या करोति इत्यर्थः। इह तावत्कालं सा जीवति न वेति सम्भावना दर्शनस्य दैवादित्यनेनोक्तम्। प्रवृत्तौ मत्कार्य्यमिति जगति विचरन्नित्यनेनोक्तम्। मत्प्रियामित्यनेन सुकुमारत्वादिना विरहदुःखासहिष्णुता उक्ता। आदावाश्वासनं वार्त्ताश्रवणपटुत्वार्थम्। अत्यन्तमित्यनेन मध्यमविधया दशाकथनम्। तेन च नैराश्यनिषेध इत्युक्तम्। कथमपीत्यनेन आशातन्तुमात्रं तद्रक्षणाय कल्पत इत्युक्तम्। आयताक्ष्या इत्यनेन कटाक्षादिस्मरणेन गुणकीर्त्तनम्। माधवस्येयं माधवीया। [illegible]। उन्मादावस्थेयम् अत्यन्तप्रलापात्।

(२५) सहर्षत्वं मद्वचनमङ्गीकृत्य प्रचलित इति।

(२६) उपरागो राहुग्रासः। शैशवे सङ्कटप्रदेशे पित्रादीनां स्मरण-स्वभावतया विरहसङ्कटेऽपि तदाह हा तातेति।

माध। [दिग्दिकया सर्वतोऽवलोक्य।] धिक् प्रमादः। (३७)

नवेषु लोध्रप्रसवेषु कान्तिर्दृशः कुरङ्गीषु गतं गजेषु।
लतासु नम्रत्वमिति प्रमथ्य, व्यक्तं विभक्ता विपिने प्रिया मे ॥३८॥

हा प्रिये मालति! [इति मूर्च्छति।]

मक। सुहृदि गुणनिवासे प्रेयसि प्राणनाथे
कथमिव सहपांसुक्रीडनप्रौढसख्ये।
प्रियजनविरहाधिव्याधिवेगं दधाने,
हतहृदय! विदीर्य्य त्वं द्विधा न प्रयासि? ॥३९॥

माध। [आश्वस्योत्थाय।] सुलभानुकारः खलु जगति वेधसो निर्म्माणसन्निवेशः, भवतु एवं तावत्। [उच्चैः।] अयमहं भोः प्रणिपत्य भूधरारण्यचारिणः सत्वान् विज्ञापयामि, मां सुहृत्संमवधानदानेन अनुगृह्णन्तु भवन्तः। (४०)

---

(३७) प्रमादोऽनिष्टम्।

(३८) नवेष्वित्यादि। नूतनलोध्रपुष्पेषु कान्तिः पाण्डिमा गौरत्वं वा पक्षे नवपदेन स्निग्धता उक्ता। दृशो विलोकितानि हरिणीषु। गतं गमनं हस्तिषु। नम्रत्वं लतासु। इति शब्द आद्यर्थे। एवा कोकिलयो वाचा इतिवत्। प्रमथ्य मारयित्वा मे प्रिया विपिने विभक्ता खण्डखण्डीकृत्य धृता। व्यक्तं। इतिः प्रकारार्थः। तेन लोध्रप्रसवादिभिर्मे प्रिया विभागीकृता। कान्त्यादिविभागद्वारा प्रियाविभाग एव उत्प्रेक्षित इत्यवधेयम्। विपिन इति प्राणिवधस्थानाभिप्रायम्।

(३९) सुहृदीत्यादि। हे हतहृदय! कथमपि विदीर्य्य द्विधा त्वं न प्रयासि?। हतेति निन्दायाम्। सुहृदि मित्रे गुणनिधाने अतिप्रेयसि जीवेश्वरि सहधूलिक्रीडाकारकमैत्रे कान्ताविच्छेदजनितव्याधिमन्तर्दधाने सति। सुहृदित्यादौ हेतुहेतुमद्भावः। धूलिः स्त्रियां पांशुर्नेत्यमरः।

(४०) प्रियाविभागावसरं निरस्यति सुलभेति। सन्निवेशः प्रकारः। अनु-

भवद्भिः सर्वाङ्गप्रकृतिरमणीया कुलवधू-
रिहस्थैर्दृष्टा, वा विदितमथवास्याः किमभवत् ।
वयोऽवस्थां तस्याः शृणुत, सुहृदो ! यत्र मदनः,
प्रगल्भव्यापारश्चरति हृदि मुग्धश्च वपुषि ॥ ४१ ॥

कष्टं भो ! कष्टम् ।

केकाभिर्नीलकण्ठस्तिरयति वचनं ताण्डवादुच्छिखण्डः,
कान्तामन्तःप्रमोदादभिसरति मदभ्रान्ततारश्चकोरः ।
गोलाङ्गूलः कपोलं कुरयति रजसा कौसुमेन प्रियायाः,
किं याचे यत्र तत्र ध्रुवमनवसरग्रस्त एवार्थिभावः ॥ ४२ ॥

कारः सादृश्यम् । तथा च लोध्रप्रसवादीनि प्रियाकान्त्याद्यनुकारीणि न तु सा विभक्तेति भावः । तस्मात् प्राणिनो विज्ञापयामीति सानुनयं वचनम् ।

(४१) भवद्भिरित्यादि । भवद्भिः इहस्थैः सर्वाङ्गेषु स्वभावरम्या सा कुलवधूर्दृष्टा वा । अथवास्या भवद्भिः किं विदितमभवत् । शुभमशुभं वा किं विज्ञातमित्यर्थः । ननु तस्याः किं वच इत्याह । हे सुहृदः ! तस्या वयोऽवस्थां शृणुत । यत्र वयोऽवस्थायां हृदि मदनः प्रगल्भव्यापारो वपुषि मुग्धो वाचरति । एतेन वयःसन्धिः उक्ता । सर्वाङ्गेत्यनेनाभिज्ञानप्रकाशनम् । कुलवधूत्वेन चाञ्चल्याभावः । इहस्थैरित्यनेन परिचयचातुरी । वाकारद्वयेन दर्शनज्ञानयोः सफलत्वं दर्शयति । सुरते निःसाध्वसता प्रागल्भ्यं समुदाहृतम् । इति भरतः ।

(४२) केकाभिरिति । किं यत्र तत्र याचे । अपि तु न किमपि प्रार्थये । यतोऽप्रस्तावग्रस्तोऽर्थिभावोऽर्थित्वम् । अनवसरमाह । नृत्यादुद्धतपिच्छभारो मयूरः केकाभिर्वचनं छादयति । चकोरः पक्षिभेदो मत्ततया भ्रमत्तारकः सन् चित्तहर्षात् प्रियामभिसरति । गोलाङ्गूलः कृष्णमुखो वानरः कौसुमेन रजसा पुष्पजधूल्या कान्तायाः कपोलौ चित्रयति । अतः सर्वासामन्यव्यासक्ततयार्थित्वानवसर इति भावः । भवत्कौमुदवनगोचराकूलकौतुका द्रुमसमाजा । कं याचे इति पाठे कं प्राणिनं प्रार्थये इत्यर्थः ।

अयञ्च । दन्तच्छदाधिमरञ्जितकान्तदन्त-
मुन्नम्य चुम्बति वलीवदनः प्रियायाः ।
काम्पिल्लक-प्रसवपाटलगण्डपालि-
पाकावधस्फुटितदाडिमकान्ति वक्त्रम् ॥ ४३ ॥

एषः प्रियतमास्कन्धविश्रान्तकरो रोहिणानोकहस्कन्ध-विश्रान्तकन्धरः करी । कथमत्राप्यनवसरः ।

कण्डूकुड्मलितेक्षणां सहचरीं दन्तस्य कोट्या लिखन्,
पर्य्यायव्यतिकीर्णकर्णपवनैराक्षादिभिर्वीजयन् ।
जग्धार्द्धैर्नवशल्लकीकिसलयैरस्याः स्थितिं कल्पयन्,
धन्यो वन्यमतङ्गजः परिचयप्रागल्भ्यमभ्यस्यति ॥४४॥

अयन्तु । नान्तर्वर्त्तयति ध्वनत्सु जलदेष्वामन्द्रमुद्गर्जितम्,
नासक्ताञ्छरसः करोति कवलान् आवर्जितैः शैवलैः ।

---

(४३) दन्तेत्यादि । वलीवदनो वानरोऽयं कान्ताया मुखमुन्नमय्य चुम्बति । कीदृशम् । अधररागेण रक्ता मनोज्ञा दशना यत्र तत् । काम्पिल्लो रोचनीद्रुमः । स्वार्थे कन् । तस्य प्रसवेन पुष्पेण फलेन वा रक्तगण्डप्रदेशः । पाकावधः पाकान्तरमन्तिमपाकस्ततः स्फुटितं विदीर्णं यद्दाडिमफलं तत्कान्ति । तत्सममित्यर्थः । तदिहाप्यनवसर एव । शाखामृगवलीमुखा इत्यमरः । काम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनीत्यपीत्यमरः । रोहिणानोकहो रोहद्रुमः ।

(४४) कण्ड्वित्यादि । अयं धन्यः सुकृती वन्यमतङ्गजः वन्यहस्ती अस्याः प्रियायाः परिचयप्रागल्भ्यं सुरतनिःसाध्वसताम् अनुतिष्ठति । कीदृशः । कण्डू-कुड्मलितेक्षणां कण्डूतिमुद्रितनयनां प्रियां दन्ताग्रेण आलिखन् ईषदुल्लिखन् । कण्डूयन्नित्यर्थः । अत एव कण्डूयाति कुड्मलितेक्षणत्वं भवति । पर्य्यायेण क्रमेण व्यतिकीर्णौ मिलितौ कर्णौ तदीयास्तैः सुखदैर्वीजयन् । जग्धैः खादितैरर्द्धैर्नवशल्लकी-पल्लवैरस्याः स्थितिं प्राणधारणं कल्पयन् ।

(४५) नान्तरित्यादि । अयं अन्योऽपि हस्ती तामपि ध्यायी वर्त्तते । नूनं मिलितं प्रेयसीविरहेणैव विह्वलः । जलदेषु ध्वनत्सु सत्सु ईषद्गम्भीरमुद्गर्जित-

दानज्यानिविषादमूकमधुपव्यासङ्गदीनाननो,

नूनं प्राणसमावियोगविधुरस्तम्बेरमस्ताम्यति ॥४५॥

अलमनेनायासितेन अन्यतः सञ्चरामि। [विलोक्य।] एष सानन्द सञ्चरीसमाकर्ण्यमानमधुरगम्भीरकण्ठगर्जितध्वनिः अपरो मत्तमातङ्गयूथपालः, प्रत्यग्रविकसितकदम्बसम्पातसुरभि-शीतलामोदबहुलसंवलितमांसलकपोलनिष्यन्द-कर्दमितकषायकरटः, समुद्दलितकमलिनीखण्डविप्रकीर्णपर्णकमलकेसर-मृणालकन्दकोमलाङ्कुरमाहरन्, अनवरतप्रवृत्तकमनीयकर्णतालताण्डव-प्रचल-जर्जरितजलतरङ्गविततनीहारं समुत्त्रस्त-कुररसारसं सरोऽवगाह्य, विहरति भवतु एवमाभाषे। महाभाग! नागपते! श्लाघ्ययौवनः खलु असि, कान्तानुवृत्तिचातुर्य्यम् अपि अस्ति भवतः। [सापवादम्।] (४६)

लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पादिताः,

पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः।

कण्ठमर्जनं नात्मवर्त्संयति न करोति समीपस्थात् सरस आवर्जितैर्मिलितैः शैवलैः कवलान् न करोति। मदहान्या यो विषादस्तेन मूकानां भ्रमराणां व्यासङ्गेन अन्यचित्ततया दीनाननः अधोमुखः। यद्वा। व्यासङ्गो विश्लेषासङ्ग इत्यर्थः। तदिह मदहानिचिन्तया सन्तापात्। दीनत्वमधोमुखचिन्तनात्। एतेन अनुभूतिसञ्जाता विषयव्यावृत्तिरुक्ता।

(४६) अहमिवायमपि कान्तातिरिक्तमन्यत् न वेत्तीत्यत आह। अलमिति। रतीस्पृहात् मधुरकण्ठगर्जितप्रवाहात् सानन्देति। मातङ्गो हस्ती। सम्पातः सम्पर्कः। संवलितो मिलितः। मांसलः पीनः। निष्यन्दो मदः। कषायः सुगन्धिः। करटो गण्डदेशः। सुरभौ च कषायः स्यादिति शाश्वतः। समुद्दलितमुन्मूलितम्। पर्णं पत्रम्। ताली शीतक्रियामात्रे मध्यमाङ्गुलिसन्धिव इत्यमरमाला। नीहारस्तु कुहेलिकेति हारावली। कुररः पक्षिभेदः। अनुवृत्तिः सेवा। सापवादं सदोषम्।

सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्न स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम् ॥४७॥

कथमवधीरणानीरसं व्रजति । हन्त मूढ एवास्मिन् वने-चरे वयस्यमकरन्दोचितं व्यवहरामि, हा वयस्य ! (४८) ।

धिगुच्छ्वसितवैशसं मम यदित्थमेकाकिनो,
धिगेव रमणीयतां त्वदनुभावभावादृते ।
त्वया सह न यस्तयाच दिवसः स विध्वंसताम्
प्रमोदमृगतृष्णिकां, धिगपरत्र या जायते ॥४९॥

---

(४७) शीकरेत्यादि । शीकरिणा उज्झितविसदस्थकवलसमाप्तिषु विकसत्पद्मसुरभि-तस्य जलस्य गण्डूषसंक्रान्तयः सम्बन्धाः सम्पादिता दत्ताः । पुष्यदिति पाठे पुष्टीभवदित्यर्थः । अथ:श्चयता स्थूलहस्तेन सेकः कृतः । तदिदं द्वयं कामं युक्तमेव । दोषमाह । विरामे सरोऽवगाहविरतौ गमनकाले पुनरकुटिलनाल-पद्मपत्रच्छत्रं न स्नेहाद्धृतम् । एतदयुक्तमित्यर्थः । अतः कान्तानुवृत्तिं न जाना-सीति भावः । पुष्कराम्भोरुहाणि वेत्यमरः । गण्डूषपदेन स्वयं पीत्वा जलदानं ध्वनितम् । नलिनी पद्मिनी पद्ममित्यमरशेषता । अरालः कुटिलो मत इति मेदिनीकारः । आतपात्त्रायत इत्यातपत्रमित्युचितं पदम् ।

(४८) चलचित्तत्वेन पार्श्वस्थं मित्रमपश्यन् सखेदमाह कथमिति ।

(४९) धिगित्यादि । इत्थमेकाकिनो मम यदुच्छ्वसितवैशसं प्राणधारण-दुःखं तद्धिग् वृथा । एकाकित्वमत्र हेतुः । धिगेव रमणीयवस्त्वनुभवान् वृथा-भाविन इति मुख्यपाठः । रम्यपदार्थविषयानुभवान्निष्फलोत्पादकत्वान् धिक् । रमणीयवस्त्वनुभवादिति पाठे वृथाभाविनोऽनुभवाद्रम्यवस्तु धिक् । निष्फलं तज्-ज्ञानमित्यर्थः । धिगेव रमणीयतां त्वदनुभावभावादृते इति पाठे मम सौन्दर्या-दिकं धिक् । कुतः । तवानुभावः सद्भावस्तस्य भावोऽभिप्रायस्तं विना । यथा । अनुभावे वागङ्गसत्त्वाभिनये भावः स्मृतं तं विना । वागङ्गसत्त्वाभिनयेऽनुभावस्तु स्मृतो बुधैः । इति भरतः । भावादित्यृते योगे पञ्चमी । त्वया मकरन्देन तथा मालत्या च सह यो दिवसो नास्ति सोऽपि दिवसो ध्वंसतां विनाशताम् । अपरत्र

मक। अये! उन्मादमोहान्तरितोऽपि सम्प्रति अयं मां प्रति अप्रतिकूलः, यतः कुतश्चिदनुषङ्गात्प्रबुद्ध एवास्य सहजस्नेहसंस्कारः तत् असन्निहितमेव मां मन्यते (५०)। [पुरः स्थित्वा] एष पार्श्वचर एव ते मकरन्दो मन्दभाग्यः।

माध। प्रियवयस्य! सम्भावय, परिष्वजस्व मां, प्रियान्तु मालतीं प्रति निराशः परिश्रान्तोऽस्मि (५१)। [इति मूर्च्छति]।

मक। एवं सम्भावयामि जीवितेश्वरम्। [विलोक्य सकरुणम्।] हा कष्टं! आविर्भूतमत्परिष्वङ्गोत्कण्ठ एव निश्चेतनः संवृत्तः तत्किमिदानीमाशाव्यसनेन। सर्वथैव मे नास्ति वयस्य इति परिच्छेदो युक्तः (५२)। हा वयस्य!।

> यत्स्नेहसंज्वरवता हृदयेन नित्य-
> मावद्धवेपथु विनापि निमित्तयोगात्।
> त्वद्व्यापदो गणयतो भयमन्वभावि
> तत्सर्वमेकपदएव मम प्रशान्तम्॥ ५३॥

मालतीमकरन्दाभ्यां या प्रमोदसङ्गत्या मम जायते तामपि धिक्। युवाभ्यां विना देवान्ये हर्षोऽपि आभासीभूत इति भावः। अत एव प्रमोदस्य सङ्गत्याया रूपकेण अलीकत्वमुक्तम्।

(५०) उन्मादेत्यादावामनिषयात् यतः कुतश्चिदनुषङ्गात् व्यञ्जकात् संस्काराभिव्यञ्जकात्। प्रबुद्धः उद्बुद्धः।

(५१) सम्भावय पालय। अमारे राम्याश मूर्च्छ्येतदर्थं निराश इत्युक्तम्।

(५२) जीवितेश्वरमित्यनेन तुल्या जीवनसामग्री उक्ता। निश्चेतः प्रलयवृक्तजनाकृतिः। परिच्छेदो निश्चयः।

(५३) यदित्यादि। स्नेहसंज्वरवता स्नेहरूपसन्तापवता हृदयेन हृदा निमित्तयोगात् विनापि भयकारणं विनापि आवद्धवेपथु सकम्पं यत् भयं नित्यम् अन्वभावि अनुभूतं तत्सर्वं त्वद्व्यापदः त्वदीयविपत्तीर्गणयतः सम्भावयतो मम

सखे! वरं तावत्त एवातिक्रान्ता मुहूर्त्ताः, तथाविधमपि भवन्तं येषु चेतयमानमनुभूतवानस्मि, (५४) इदानीं तु,

भारः कायो, जीवितं वज्रकीलं
काष्ठाः शून्या निष्फलानीन्द्रियाणि ।
कष्टः कालो मां प्रति त्वत्प्रयाणे,
ध्वान्तालोकः सर्वतो जीवलोकः ॥ ५५ ॥

[विचिन्त्य] तत्किं नु खलु माधवास्तमयसाक्षिणा मया भवितव्यमिति जीवामि? भवतु अमुष्मादेव गिरिशिखरात्

एकपदे एकस्मिन् क्षणे प्रशान्तं परिसमाप्तम् । कदा ते किं स्यादित्यादिमयं प्रकृतदशया प्रशान्तमिति भावः । एतत्पक्षे गण्यतेति पाठे विधिनेत्यर्थात् । यद्वा । त्वदुत्थापदो गण्यता इदा यद्वयमनुभूतं तदधुना गतमित्यर्थः । तथा च त्वन्निमित्तमधुना तु सहेतुकैव विपदिति भावः ।

(५४) वरं मनागिष्टे । मनागिष्टे वरं यत्तु कश्चिदाह तदव्ययमिति शाश्वतः । अव्ययानामनेकार्थत्वादुक्तोऽर्थः सुलभ एव । चेतयमानं चेतनावन्तम् ।

(५५) भार इत्यादि । कायो भारी धर्तुमशक्यः । धारणाशक्यतया व्याधिः । जीवितं जीवनं वज्रकीलकमनुच्छेदात् । घनेन मर्मच्छेदः । मर्मच्छेदेन खिन्ना । दिशः शून्या इति जड़ता । इन्द्रियाणि नेत्रादीनि अफलानि कार्याक्षमाणि । बाह्यविषयाग्रहाद्दैन्यम् । कालः कष्टो दुःखदः । दैन्येन जीवनाक्षमता । संसारः सर्वत्र प्रशान्तदर्शनः । यथा च त्वां विना न मज्जीवनमिति भावः । त्वत्प्रयाणे तव गमने विनाशे इति यावत् । सतिसप्तमी इयम् । मां प्रतीति सर्वत्र योज्यम् । यद्वा । पृथिव्यादिद्रव्यनवके प्रधानद्रव्यदूषणेन दोषमाह । तत्र काय इति पृथिव्या जीवनमित्यात्मनः काष्ठा इति दिश इन्द्रियाणि इति इन्द्रियाणां काल इति कालस्य लोक इति विषयाणां दोष उक्तः । ध्वान्तालोकोऽनुपलम्भ इत्यर्थः ।

(५६) अस्तमयो विनाशः । व्याधिदशायामयम् । यदाह । निर्वेदेन खिन्ना च दैन्यं व्याधिः समनन्तरा । जड़ता मरणं चैव व्याधौ तु दशकेऽपि

पाटलावत्यां निपत्य, माधवस्य मरणाग्रेसरो भवामि (५६)।
[सकरुणं निवृत्य आलोक्य।] कष्टं! भोः कष्टम्!

तदेतदसितोत्पलद्युतिशरीरमश्लिष्टभू-
रमातिदृढ़पीड़नैरपि न तृप्तिरालिङ्गनैः।
यदुल्लसितविस्मया बत निपीतवत्यः पुरा,
नवप्रणयविभ्रमाकुलितमालतीदृष्टयः ॥५७॥

आश्चर्य्यम् एतस्यां तनौ अचरमे वयसि तावतो गुणसमा-
हारस्य (५८) सन्निवेशः, कथमिवाभूत्। सखे माधव!।

आपूर्णश्च कलाभिरिन्दुरमलो यातश्च राहोर्मुखम्,
सञ्जातश्च घनाघनो जलधरः शीर्णश्च वायोर्जवात्।
निर्वृत्तश्च फलैश्च्छिद्रुमवरो दग्धश्च दावाग्निना,
त्वं चूडामणितां गतश्च जगतः प्राप्तश्च मृत्योर्वशम् ॥५९॥

च। पाटलावती नदीभेदः। प्रियदर्शनार्थं निवर्त्तनम्। मूर्च्छां दृष्ट्वा सकरुणम्।

(५७) तादृशं दृष्ट्वा सखेदमाह। तदित्यादि। सखे! यत्तावत् नील-नलिनश्यामं तदेतत्। अभिमताङ्गे गाढ़ालिङ्गनैः अपि आलिङ्गनैर्मम तृप्तिर्नाभूत्। यदङ्गं नवप्रणयविभ्रमाकुलितमालतीदृष्टयः नवप्रणयविलासव्याकुलमालतीदृष्टय उल्लसितविस्मया उपचितकौतुकाः पुरा पूर्वं निपीतवत्यो निर्व्याजमेव अवलोकितवत्य इत्यर्थः। बत खेदे।

(५८) अचरमे नूतने। समाहारो मेलकः।

(५९) आपूर्णं इति। कलाभिः षोडशांशैः आपूर्णश्च अमल इन्दुश्चन्द्रो राहो-र्मुखं यातः सञ्जात उत्पद्यमानो घनाघनो बहुल इत्यर्थः जलधरः वायोर्जवात् वेगात् शीर्णश्च। निर्वृत्त उत्पन्नोऽपि फलैश्छिद्रि: द्रुमवरः फलभरितः तरुराजः दावाग्निना दग्धश्च। त्वं जगतः चूड़ामणितां श्रेष्ठतां गतोऽपि मृत्योर्वशं प्राप्तोऽसि।

[विचिन्त्य ।] तत्परिष्वजे अहं तावदेवं गतमपि वयस्यं, अर्थितश्च अनेन सम्प्रत्येव अयमर्थः । [परिष्वज्य ।] हा वयस्य ! विमलविद्यानिधे गुणगुरो ! मालतीदायग्राहजीवितेश्वर ! हा सौन्दर्य्यविनिर्जितरतिरमणाच्छाय ! हा कामिनीहृदयमन्मथ ! हा बान्धवपयोनिधिशरच्चन्द्र ! हा कामन्दकीमकरन्दानन्दन-मुखचन्द्र ! माधव ! अयमत्र ते जन्मनि अपश्चिमः पश्चिमावस्थां प्रापितो मकरन्दबाहुपरिष्वङ्गः । (६०) सएष मकरन्दो मुहूर्त्त-मपि जीवतीति मैवं मंस्थाः ।

आजन्मनः सहनिवासतया मयैव
मातुः पयोधरपयोऽपि समं निपीय ।
त्वं पुण्डरीकमुख ! बन्धुतया निरस्त-
मेको निवापसलिलं पिबसीत्ययुक्तम् ॥६१॥

[सकरुणं विमुच्य परिक्रम्य च ।] इयमधस्तात्पाटलावती, भगवति आपगे ! प्रियसुहृदो यत्र मम तत्रैव सम्भवो भूयात् अमुत्र भूयोऽपि भूयासमनुसञ्चरः (६२) ।

इति पतितुमिच्छति ।

---

(६०) एवं गतं मूर्च्छितम् । अयमर्थ आलिङ्गनरूपः । मया सहेति शेषः । अपश्चिमो दुर्लभः । पश्चिमावस्था शेषावस्था ।

(६१) आजन्मेत्यादि । हे पद्मास्य ! जन्मन आरभ्य मयैव समं तुल्यस्नेहतया मातुः स्तन्यं पीत्वा अधुना त्वमेको निवापसलिलं प्रेतोदकाञ्जलिं बन्धुसमूहेन दत्तं पिबसि इत्येतदयोग्यम् । सहपानार्थमहमप्यागच्छामीत्यर्थः । निवापः पितृदैवे स्यादित्यमरः ।

(६२) आपगा नदी । प्रियसुहृदित्यादि । मित्रस्य यत्र उत्पत्तिर्यत्र ममापि तत्रैव भूयात् । अमुत्र अपरस्मिन् लोके पुनरपि अस्य अनुचरो भूयासमित्यर्थः । भूयादित्यादौ प्रार्थनायां लिङ् ।

[प्रविश्य सहसा सौदामिनी। वारयित्वा।] वत्स! अलं साहसेन।

मक। [विलोक्य।] अम्ब! कासि? किमर्थं त्वया प्रतिषिद्धः?

सौदा। आयुष्मन्! किं त्वं मकरन्दः?

मक। सुष्ठु, सएवास्मि मन्दभाग्यः।

सौदा। वत्स! योगिनी अस्मि, मालत्या अभिज्ञानञ्च धारयामीति।

बकुलमालां दर्शयति।

मक। [सोच्छ्वासं सकरुणम्।] आर्य्ये! अपि जीवति मालती?

सौदा। अथ किम्। वत्स! किमत्याहितं (६३) माधवस्य यदनिष्टे व्यवसितोऽसि इति आकम्पितास्मि। अथ माधवः क्व?।

मक। आर्य्ये! तमहं प्रमुग्धमेव वैराग्यात्परित्यज्य आगतः, तदेहि, तूर्णं सम्भावयावः। [त्वरितं परिक्रामतः।]

माध। [आश्वस्य।] अये! प्रतिबोधितः एवास्मि केनापि, नूनमस्य अभिनवजीमूतजलवाहिनः प्रभञ्जनस्य अनपेक्षितास्मदवस्थोऽयं व्यापारः (६४)।

मक। दिष्ट्या पुनः प्रत्यापन्नचेतनो वयस्यः।

सौदा। [विलोक्य।] संवदति उभयोर्मालतीनिवेदितः शरीराकारः (६५)।

---

(६३) अत्याहितं प्रमीतोऽभूत्।

(६४) प्रभञ्जनो वायुः।

(६५) उभयोर्माधवमकरन्दयोः।

माध। भगवन् पौरस्त्यपवन !

भ्रमय जलदानम्भोगर्भान् प्रमोदय चातकान्,
कलय शिखिन: केकोत्कण्ठान् कठोरय केतकान्।
विरहिणि जने मूर्च्छां लब्ध्वा विनोदयति व्यथाम्
अकरुण ! पुन: संज्ञाव्याधिं विधाय किमीहसे ? ॥६६॥

मक। सुवृत्तमखिलजन्तुजीवनेन मातरिश्वना। (६७)

माध। देव वायो ! तथापि भवन्तमेवं प्रार्थये। (६८)

विकसत्कदम्बनिकुरम्बपांशुना
सह जीवितं वह मम प्रिया यत:।
अथवा तदङ्गपरिवासशीतलं
मयि किञ्चिदर्पय भवान् हि मे गति: ॥ ६९ ॥

---

(६६) भ्रमयेति। हे वात ! अम्भोगर्भान् जलपूर्णान् जलदान् मेघान् भ्रमय चातकान् तदाख्यपक्षिण: प्रमोदय मेघजलदानेन सन्तोषय। केकोत्कण्ठान् केकारवोत्सुकान् शिखिनो मयूरान् कलय नर्तय केतकान् तदाख्यपुष्पाणि कठोरय त्वज्जलपातेन केतका: कठोरीभवन्तीत्यर्थ:। विरहिणि वियोगयुक्ते जने मयीतिशेष:। मूर्च्छां विरहदशाविशेषं लब्ध्वा व्यथां विरहजन्यक्लेशं विनोदयति अपनुदति सति हे अकरुण ! निर्दय ! पुन: संज्ञाव्याधिं चैतन्यरूपरोगं विधाय जनयित्वा किमीहसे ? चेष्टसे ? एतावतापि किं त्वं न सन्तुष्टोऽसीति भाव:।

(६७) मातरिश्वा वायु:। वातीति वायुरित्युचितपदन्यासेन जीवनयोग्यता उक्ता।

(६८) तथापि अनिष्टकरणादपि।

(६९) विकसदित्यादि। मम प्रिया यतो यत्र तं देशं मम जीवितं विकसत्कदम्बनिकुरम्बपांसुना प्रफुल्लकदम्बसमूहधूल्या सह प्रापय। अटस मे इति वा पाठ:। सा विरहदीना म्रियेत अतस्तज्जीवनाय मज्जीवितं नयेति भाव:। पांसुना सहेत्यनेन परमाणुरूपं मे जन्मोऽपि तत्समूहे वसिष्यतीति न ते प्रयासोऽपि जायेतेत्युक्तम्। नो वा तदङ्गपरिवासशीतलं प्रियाङ्गसंसर्गशीतलं वायुं किञ्चि-

कृताञ्जलिः प्रणमति।

सौदा। सुसमाहितः खलु अभिज्ञानदर्शनस्य अवसरः (७०)।

अधस्तो मालां मुञ्चति।

माध। [साकूतविस्मयहर्षम्।] कथमियमस्मद्विरचिता प्रियायाः स्तनोद्भेददुर्ललितमूर्त्तिः अनङ्गमन्दिराङ्गणबकुलप्रसवमाला (७१)।

[निरूप्य, सहर्षम्।] कः सन्देहः। तथाहि। स एवायमस्याः।

मुग्धेन्दुसुन्दरतदीयमुखावलोक-
हेलाविशृङ्खलकुतूहलनिह्नवाय।

हस्तु मयि तदर्पय देहि। ईरयेति पाठे प्रेरयेत्यर्थः। तदेव मे तापशान्त्यै स्यादिति भावः। अत्र हेतुमाह। यतो मम भवान् गतिः आश्रयः। आश्रयस्याश्रितजीवनं युक्तमेवेति भावः। अपि वेति पाठेऽपिः सम्भावनायाम्।

(७०) समाहितो युक्तः। वायुप्रार्थनाप्रकरणात्।

(७१) प्रियाङ्गसङ्गिमालालोकात्सहर्षत्वम्। दुर्ललिता अतिप्रिया। अनङ्ग एव मन्दिरमनङ्गस्य वा मन्दिरम्।

(७२) मुग्धेत्यादि। अस्या मालायाः स एवायं भागो यो लवङ्गिकाया अपि सन्तोषमकरोत्। अपिपदान्मालत्या अपीत्यर्थः। विषमं ग्रथितं ग्रन्थना यत्र सः। विषमेण ग्रथित इति वा। अत्र हेतुमाह। मुग्धं मनोज्ञम् इन्दुसुन्दरम् इन्दुकान्तं यन्मालतीमुखम्। यद्वा। विरहात् श्यामत्वादिना बालेन्दुवत् कान्तं यत् तदास्यं तदालोके सति हेलया शृङ्गारचेष्टया विशृङ्खलं सर्वत्र वर्त्तमानं यत् कौतुकं तद्गोपनाय दुर्ग्रहैः पूर्वग्रथनादन्यथा दत्तैः गुणैः रचितः। एतत्तु प्रथमाङ्क एव व्यक्तम्। ननु हेला स्त्रीविषया। यदाह भरतः। यौवने चिदश स्त्रीणां विकारा नेत्रगात्रजाः। आदौ त्रयोऽङ्गजास्तेषां दश स्वाभाविकास्तथा। तदङ्गेषु हावहेलाख्यत्रयम्। अविकृतेर्विकाराद्याः शृङ्गारस्य च सूचकाः। ग्रीवारेचका भावा हावास्तेभ्यः समुत्थिताः। य एव हावः हेलासौ शृङ्गाररस-

दुर्ग्रन्थसपुष्परचितोऽपि लवङ्गिकाया-
स्तोषं ततान विषमग्रथितोऽपि भागः ॥ ७२ ॥

[सहर्षोन्मादमुत्थाय ।] प्रिये मालति ! ननु इयं वीक्ष्यसे । [सकोपमिव ।] अयि (७३) मदवस्थानभिज्ञे !

प्रयान्तीव प्राणाः सुतनु ! हृदयं ध्वंसत इव,
ज्वलन्तीवाङ्गानि प्रसरति समन्तादिव तमः ।
त्वराप्रस्तावोऽयं न खलु परिहासस्य विषय-
स्तदक्ष्णोरानन्दं वितर मयि माभूरकरुणा ॥७४॥

[सर्वतो दृष्ट्वा सनिर्वेदम् ।] कुतोऽत्र मालती ? [वकुलमालामुद्दिश्य ।] अयि प्रियाप्रणयिनि वकुलमाले ! उपकारिणी असि अतः स्वागतं भवत्याः ।

सम्भवा । समाख्याता बुधैर्हेला ललिताभिनयात्मिका । अतो माधवे हेलेत्ययुक्तम् । नैवम् । स्त्रीणामित्यस्योपलक्षणत्वात्पुरुषेऽपि कामावस्थासाम्याद्धेला यदाह । हेला हावश्च भावश्च व्यक्तो विभ्रमभाषणम् । आहुः प्रेमाभिसन्धानं चकितं च विलासितम् । तत्र रागतः सहसा प्रवृत्तौ हेतुर्विभोभावो हेलेति । यद्वा । अवलोकनम् इत्यवलोकः । कर्मणि घञ् । इन्दुसुन्दरमालतीमुखेऽवलोकना दृष्टा या हेला तया विभ्रमं यन्माधवस्य कुतूहलं तद्दीपनायेत्यर्थः ।

(७३) सङ्कल्पलिखितप्रियादर्शनाद्धर्षः । दर्शनाप्राप्त्या पुनराह । नन्विति । अत्रापि लाभादुपालभ्यते अपि इति ।

(७४) परिहासाद्दर्शनलाभस्य तदनवसरमाह । प्रयान्तीत्यादि । प्राणाः प्रयान्तीव सर्वतः शून्यत्वात् । हे सुतनु ! हृदयं मनो ध्वंसत इव मोहात् । अङ्गज्वलनमतिदाहात् । एतेन व्याधिरुक्तः । सर्वतस्तमः प्रसरतीव । अनेन जडता । सकलेन्द्रियाणामग्रहात् । जडतानन्तरं मरणमहावस्थाभावात्स एव युक्त इत्याह त्वरेति । खलु निश्चये । अत एवं ततो नेत्रप्रीतिं देहि । स्वं दर्शयेत्यर्थः । मद्विषये अकरुणो निर्दयो मा भूः न भविष्यसि । यद्वा । अकरुणो मा भूर्न भवसि । माङि लुङिति काव्यशास्त्रे लुङ् । इत्यमन्द लतुप्रियाणाम् ।

निष्प्रत्यूहाः प्रियसखि! यदा दुःसहाः सम्बभूवु-
र्देहोद्दाहव्यसनगुरवो मन्मथोन्माथवेगाः।
तस्मिन् काले कुवलयदृशस्त्वत्समाश्लेष एव
प्राणत्राणं प्रगुणनमभून्मत्परिष्वङ्गकल्पः ॥७५॥

सकरुणं निर्वर्ण्य *

आनन्दमिश्रमदनज्वरदीपनानि
गाढानुरागरसवन्ति तदा तदा च।
स्नेहाकराणि मम मुग्धदृशश्च कण्ठे,
कष्टं स्मरामि तव तानि गतागतानि ॥७६॥

---

(७५) निरित्यादि। प्रियसखि! वकुलमाले! मालत्याः पश्चात्याः मन्मथो-न्माथवेगाः कामोन्मादोद्वेगा निष्प्रत्यूहाः निर्विघ्ना अत्यर्थं दुःसहा देहोद्दाहव्यसन-गुरवः अङ्गदाहदुःखमहान्तः यदा यस्मिन् काले सम्बभूवुः समुदीरिताः तत्र काले तस्यास्त्वदालिङ्गनमेव शीघ्रं प्राणरक्षकमभूत्। अत एव मदालिङ्गनतुल्यः। उन्माथ उन्मथनमुद्वेग इति यावत्। प्रगुणमिति पाठे प्रकृष्टगुणमित्यर्थः। क्रिया-विशेषणं वा। कामदुःखोद्वेगस्य प्रियसङ्गस्य अभावादविघ्नत्वम्। मालतीप्रणयित्वात् प्रियसखि इति। दुःसहत्वमधृतिकरणात्। उद्दाह उदगतदाहः। व्यसनस्थाने व्यथन इति पाठे व्यथनं पीड़ा। अधुना मालां विना अस्याः कथं जीवनं भविष्यतीति भावः।

* निर्वर्ण्य निरूप्य।

(७६) आनन्देत्यादि। मम मालत्याश्च कण्ठे तव तानि गतागतानि स्मरामि। स्मरणस्य अतिदुःखदत्वात् कष्टम्। तदा तदा तस्मिंस्तस्मिन् काले। तत्र चौरिकाविवाहात् पूर्वं मालतीकण्ठगतेति गतं लवङ्गिकाकृत्या माधवकण्ठ-मागतेत्यागतमित्येकम्। चौरिकाविवाहे मालत्या माधवकण्ठनीता अतो गतमथ तन्मुखदर्शनात्स्वकण्ठेऽर्पितेत्यागतमिति द्वितीयम्। पुनस्तत्र प्रणयकलाप्रस्ता-वेन माधवे दत्तेति गतमिदानीं तु सौदामिन्या मालतीसकाशादानीय दत्तेति तीर्थि गतागतानि। अतएव बहुवचनम्। कीदृशानि। तद्दशायामन्तरा-न्तरा दर्शनाभावादानन्दमिश्रितकामतापप्रकाशनानि। दृढानुरागरसयोगीनि।

हृदये निधाय मूर्च्छति ।

मक । [उपसृत्य वीजयन् ।] समाश्वसिहि सखे ! समाश्वसिहि ।

माध । [आश्वस्य ।] मकरन्द ! किं न पश्यसि कुतोऽपि सहसैव मालतीखेदं वहतो वकुलदाम्नो लाभः तत्कथं नु मन्यसे किमेतदिति ।

मक । वयस्य ! इयमार्य्या योगेश्वरी अस्य मालत्यभिज्ञानस्य नेत्री ।

माध । [विलोक्य सकरुणं कृताञ्जलिः ।] आर्य्ये ! प्रसीद, कथय, जीवति मे प्रिया ? (७७)

सौदा । वत्स ! समाश्वसिहि समाश्वसिहि ! जीवति सा कल्याणिनी ।

[माधवमकरन्दौ हृष्टा उच्छ्वस्य ।] आर्य्ये ! यद्येवं तत् कथय कथमेष वृत्तान्त इति ।

सौदा । पुरा किल करालायतने मालतीमुपहरन्नघोरघण्टः करवालपाणिना माधवेन व्यापादितः ।

माध । [सोद्वेगम् ।] आर्य्ये ! विरम, परिज्ञातो वृत्तान्तः ।

मक । क इव ?

माध । सखे किमन्यत् ? सकामा कपालकुण्डलेति (७८) ।

मक । आर्य्ये ! अप्येवम् ?

र्ण्ड्स आकरो येषु तानि । कर्णे प्रीतिमाकुर्वन्ति व्याकुर्वन्तीति कर्णाकराणि । ग्रन्थी इत्यादिना टप्रत्ययः । तदा तदा चेति पक्षपात् आकाशचरपरिवृतः ।

(७७) आर्य्या माता ।

(७८) सकामा मदपकारेण सिद्धमतिप्रेमार्थः ।

सौदा। एवं यथानिवेदितं वत्सेन।

मक। कष्टं भोः कष्टम्!

कुमुदाकरेण शरदिन्दुचन्द्रिका
यदि रामणीयकगुणाय सङ्गता।
सुकृतं तदस्तु, कतमस्त्वयं विधि-
र्यदकालमेघविततिर्व्ययूयुजत्॥ ७९॥

माध। हा प्रिये मालति! कष्टमतिबीभत्समापन्नासि (८०)

कथमिव तदाभवस्त्वं कमलमुखि! कपालकुण्डलाग्रस्ता?।
उत्पातधूमलेखाक्रान्तेव कला शशधरस्य॥ ८१॥

भगवति कपालकुण्डले! (८२)

निर्माणमेव हि तदादरलालनीयं,
मा पूतनात्वमुपगाः शिवतातिरेधि।

---

(७९) कुमुदेत्यादि। कुमुदसमूहेन यदि शरच्चन्द्रचन्द्रिका सौन्दर्य्यगुणार्थं सङ्गता प्राप्ता तत् सुकृतं शोभनकरणमस्तु। द्वयोरपि रम्यत्वात्। अयं पुनः कः प्रकारः कुत्सितप्रकारो वा यदकालमेघपङ्क्तिर्व्ययूयुजत् वियोजयामास विच्छेदं कृतवतीत्यर्थः। ध्वनिना अत्र कुमुदाकरो माधवः चन्द्रिका मालती मेघसन्ततिः कपालकुण्डला इत्युक्तम्।

(८०) अतिबीभत्समिति। उद्वेगहेतुकपालकुण्डलादर्शनाद्बीभत्सः। यदाह। उद्वेजनैश्च बहुभिर्बीभत्सरसः समुद्भवति।

(८१) कथमित्यादि। कपालकुण्डलाग्रस्ता तत्कवलिता, हे कमलमुखि! पद्ममुखि! तदा त्वमपि कथमभवः? भयात् कथं त्वमासीः किं त्वयोक्तं कस्मै जाता अभूदित्यादिज्ञापनाय कथमिति सामान्यनिर्देशः। केतुकवलिता चन्द्रकलेव। एतदुपमया बीभत्सजविषादसम्भवा ग्लानिरप्युक्ता। यदाह। अपस्मारस्तथोन्मादो विषादो मद एव च। मृत्युर्व्याधिर्भयं चैव भावा बीभत्ससम्भवाः।

(८२) कापालं नैव जातवेदिति निजधर्मं जानत्या त्वया सा घातितेति सोल्लुण्ठमाह भगवति इति।

(८३) निर्माणमित्यादि। यन्निर्माणं मालतीरूपादिकमेव हि आदरेण

नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताडनानि ॥ ८३ ॥

सौदा। वत्स! अलमावेगेन।

अकरिष्यदसौ पापमतिनिष्करुणैव सा।
नाभविष्यमहं तत्र यदि तत्परिपन्थिनी ॥८४॥

[माधवमकरन्दौ। प्रणम्य।] अतिप्रसन्नमार्य्याचरणैः (८५) तत्कथय, कथं पुनः त्वमेव अस्माकं बन्धुः।

सौदा। आश्रयः खलु एतत् (८६)। [उत्थाय।] इयमिदानीमहम्,

गुरुचर्य्यातपस्तन्त्रमन्त्रयोगाभियोगजाम्।
इमामाक्षेपणीं सिद्धिमातनोमि शिवाय वः ॥८७॥

लालनीयं रक्षणीयं भवति। रम्यत्वादेव। पूतनात्वं राक्षसीत्वं तन्नाशेन मा उपगा मा गमिष्यसि। शिवतातिः कल्याणकारी एधि भव। शिवतामुपैतीति पाठे तन्निर्माणम्। कर्णं शिवतां कल्याणत्वं गच्छति। सुरभिणः सुगन्धस्य पुष्पस्य मूर्ध्नि स्थितिः मस्तके धृतिः स्वभावसिद्धा। चरणैः पादैः अव पीड़नानि न स्वभावसिद्धानीत्यर्थः।

(८४) अकरिष्यदित्यादि। असौ कपालकुण्डला पापं तद्वधरूपम्-करिष्यदेव। अतिनिष्करुणा यतः सा। यदि तत्र स्थाने वधे वा तस्याः परिपन्थिनी विरोधिनी अहम् न अभविष्यम्। क्रियातिपत्तौ लृङ्। बुद्धिप्रत्यक्षतया असौ इति।

(८५) अतिप्रसन्नं प्रसादः कृतः।

(८६) आश्रयः। युवामित्यर्थात्।

(८७) गुर्वित्यादि। गुरुचर्या गुरुसेवा गुर्वी चर्या विशिष्टमनुष्ठानम्। तपश्चान्द्रायणादि। तन्त्रं मन्त्रप्रवर्त्तनादि। मन्त्रस्तारप्रभृतिदेवीनां तन्त्रम् आगमस्य वा मन्त्रः। योगः समाधिः। एषु अभियोगादभ्यासात् जाताम् इमाम् आक्षेपणीम् आकर्षणीं सिद्धिं युष्माकं कल्याणाय विस्तारयामि।

इति समाधया निष्क्रान्ता।

मक। आश्चर्य्यमाश्चर्य्यम्!

व्यतिकर इव भीमस्तामसो वैद्युतश्च
क्षणमुपहतचक्षुर्वृत्तिरुद्भूय शान्तः।

विलोक्य सभयम्।

कथमिह न वयस्यस्तत्किमेतत्, [विचिन्त्य] किमन्यत्।
प्रभवति हि महिम्ना स्वेन योगीश्वरीयम् ॥ ८८ ॥

[सवितर्कम्।] किमयमनर्थ इति सम्प्रति मुग्धोऽस्मि (८९)।

अपि च। अस्तोकविस्मयमपसृतपूर्ववृत्त-
मुद्भूतनूतनभयज्वरजर्जरं नः।

---

(८८) व्यतिकर इत्यादि। मालतीवार्त्तया अप्यज्ञानादयं तामसोऽन्धकारः। अत एव भीमः। तज्जीवनज्ञानाद्वैद्युतश्चायं विद्युत्सम्बन्धी। व्यतिकरः सम्पर्कः। अत एवानन्दाश्रुनिर्म्माणेन उपहतनेत्रवृत्तिः। कीदृशः। क्षणमुद्भूय शान्तः। अत एव विद्युदिद्योतो वितर्कः। कथमिह स्थाने वयस्यो माधवोऽपि नास्ति। तत् किमिदं क्व गतः केन वा स नीत इति विचिन्त्येत्यर्थः। निर्णयमाह। अन्यत् किम्। यत इयं योगीश्वरी निजतपःप्रभावेण प्रभवति। अनया नीत इति भावः।

(८९) संशयमाह किमयमिति। सौदामिनीनयनेऽर्थः प्रयोजनं कपालकुण्डलानयनेऽनर्थ इति भावः।

(९०) अस्तोकेत्यादि। अस्माकं चेतः चिरम् कर्तृ आनन्दशोकाभ्यां हर्षशोकाभ्यां अवचलं मिश्रत्वं गच्छति। कीदृशम्। अस्तोकविस्मयम् अनल्पाश्चर्य्यम्। एकदैव नानारससम्भवात्। अपसृतं विस्मृतं पूर्ववृत्तं मालतीहरणरूपं यत्र। अत एवानन्दः। उद्भूतं नवं भयं माधवापकारशङ्काजातं तेन ज्वरेण जर्जरं जीर्णम्। अत एव शोकः। यद्वा। माधवानवलोकनेनोद्भूतनवभयज्वरजर्जरतया शोकः। एककाल एव स्फुटितौ घटितश्च प्रमोदौ यत्र तत्। मालती-

एकक्षणत्रुटितसङ्घटितप्रमोह-
मानन्दशोकशबलत्वमुपैति चेतः ॥८०॥

तदद्यैव कान्तारगहने सहपक्षवर्गेण प्रविष्टां भगवतीमेव तस्या वृत्तान्तमेनं कथयिष्यामि । [इति निष्क्रान्तः ।]

इति मालतीमाधवे नवमोऽङ्कः ।

दशमोऽङ्कः ।

—:०:—

ततः प्रविशति कामन्दकी मदयन्तिका लवङ्गिका च ।

काम॰ । [सास्रम् ।] हा वत्से मालति ! मदङ्कालङ्कारकारिणि । क्वासि देहि मे प्रतिवचनम् ।

आजन्मनः प्रतिमुहूर्त्तविशेषरम्या-
ण्याचेष्टितानि तव सम्प्रति तानि तानि ।
चाटूनि चारुमधुराणि च संस्मृतानि,
देहं दहन्ति हृदयं च विदारयन्ति ॥ १ ॥

लाभसम्भावनया त्रुटितो माधवापकारसम्भावनया घटित इति भावः । अत एवात्याश्चर्य्यम् । शोकशब्दोऽत्रपर्य्यायः । पक्षवर्गेण मदयन्तिकालवङ्गिकाभ्याम् । विप्रनष्टामिति कस्मिंश्चित् पुस्तके पाठो दृश्यते तत्राहश्यमानामित्यर्थः ।

---

(१) आजन्मन इति । आजन्मनः जन्मदिनपर्य्यन्तं प्रतिमुहूर्त्तं विशेषेण रम्याणि चारूणि आचेष्टितानि विलासादयः सम्प्रतीदानीं चाटूनि प्रियाणि चारुमधुराणि बहूनि लपितानि च तानि तानि संस्मृतानि सन्ति देहं दहन्ति हृदयमन्तःकरणञ्च विदारयन्ति । एतानि मया सोढुमशक्यानि जातानीत्यर्थः ।

[आकाशे।] अपि च पुत्रि!

> अनियतरुदितस्मितं विराजत्-
> कतिपयकोमलदन्तकुड्मलाग्रम्।
> वदनकमलकं शिशोः स्मरामि
> स्खलदसमञ्जसमुग्धजल्पितं ते॥ २॥

मदयन्तिकालवङ्गिके। [साम्रमाकाशे।] हा पियसहि! सुप्पसण्णमुहचन्दसुन्दरि! कहिं गदासि, को वा सिरीसकुसुमसुउमारस्स दे सरीरस्स अअं देव्वदुव्विलसिअपरिणामो एक्काकिणीए उवगदो। महाभाअ माहव! उपत्थिदत्थमिदमङ्गलो दे जीअलोओ संवुत्तो (क) (३)।

काम। [सविशेषखेदम्।] हा वत्सौ!

(क) हा प्रियसखि! सुप्रसन्नमुखचन्द्रसुन्दरि! क्व गतासि, को वा शिरीषकुसुमसुकुमारस्य ते शरीरस्य अयं दैवदुर्विलसितपरिणाम एकाकिन्या उपगतः महाभाग माधव! उपस्थितास्तमितमङ्गलोत्सवस्ते जीवलोकः संवृत्तः।

---

(२) अनियतमिति। अनियतमजस्रं रुदितानि स्मितानि हास्यानि च यत्र, तत्, विराजन्ति कतिपयानि कोमलानां दन्तकुड्मलानामग्राणि यत्र, तत् स्खलन्ति असमञ्जसानि असमग्राणि मधुराणि जल्पितानि अर्द्धस्फुटवाक्यानि यत्र, तत् शिशोः शैशवावस्थापन्नाया मालत्या वदनकमलकं मुखपद्मं स्मरामि। अत्र स्वभावोक्तिरूपकालङ्कारौ स्फुटावेव।

(३) अवैकाकिन्या एकमात्रस्वरूपायाः। आदावुपस्थितोऽथास्तमितो मङ्गलोत्सवो यत्र सः।

अभिनवरागरसोऽयं भवतोः कृतकौतुकः परिष्वङ्गः ।
लवलीलवङ्गयोरिव नियतिमहावात्यया निहतः ॥ ४ ॥

लव । [सोद्वेगम् ।] हदास ! वज्जमअ ! सव्वधा णिसंसोसि हिअअ ! । (ख) । [इति हृदयमाहत्य पतति ।]

मद । सहि लवङ्गिके ! णं भणामि खणमेत्तअम्पि दाव समस्सस (ग) ।

लव । सहि ! किं करेमि, दिढवज्जलेवपडिबद्धणिच्चलं मम जीविदं ण मं परिच्चअदि (घ) ।

काम । वत्से मालति ! जन्मनः प्रभृति वल्लभा ते लवङ्गिका, तत्किमेनामुज्झितजीवितां वराकीं न अनुकम्पसे । इयं हि ।

उज्ज्वलालोकया स्निग्धा त्वया त्यक्ता न राजते ।
मलीमसमुखी वर्त्तिः प्रदीपशिखया यथा ॥५॥

(ख) हा हताश ! वज्रमय ! सर्वथा नृशंसमसि हृदय !

(ग) सखि लवङ्गिके ! ननु भणामि क्षणमात्रमपि तावत् समाश्वसिहि ।

(घ) सखि ! किं करोमि, दृढवज्रलेपप्रतिबद्धनिश्चलं मम जीवितं न मां परित्यजति ।

---

(४) अभीति । लवलीलवङ्गयोरिव तादृशप्रेमयुतयोर्भवतोः अभिनवो रागोऽनुराग एव रसो यत्र स कृतकौतुकः कौतूहलसमुपेतोऽयं परिष्वङ्गः आलिङ्गनं मेलनञ्च नियतिरेव महावात्या तया निहतः समूलमुन्मूलित इव अभवत् । अत्र रूपकोत्प्रेक्षयोः सङ्करः ।

(५) उज्ज्वलेति । उज्ज्वल आलोको दीप्तिर्यस्याः तया ज्वलितयेत्यर्थः । तया प्रदीपशिखया त्यक्ता अतएव मलीमसमुखी कृष्णवर्णमुखी अन्यत्र मलिनानना, स्निग्धा विश्वस्ता सखी, अन्यत्र तैलयुक्तापि वर्त्तिर्यथा इयमेव तेन श्रौत्युपमा । न राजते शोभते ।

कथं कल्याणि ! कामन्दकीं अद्यापि, ननु भगवति ! मदीयचीवरीयेणैव ते प्रगुणीकृतानि अङ्गानि । (६)

स्तन्यत्यागात् प्रभृति सुमुखी दन्तपाञ्चालिकेव,
क्रीडायोगं तदनु विनयं प्रापिता वर्द्धिता च ।
लोकश्रेष्ठे गुणवति वरे स्थापिता त्वं मयैव,
स्नेहो मातुर्मयि समधिकस्तेन युक्तस्तवापि ॥७॥

[सवैक्लव्यम् ।] (८) चन्द्रमुखि ! सम्प्रति निराशास्मि ।

अकारणस्मेरमनोहराननः,
शिखाललाटार्पितगौरसर्षपः ।
तवाङ्कशायी परिहृत्तभाग्यया,
मया न दृष्टस्तनयः स्तनन्धयः ॥९॥

---

(६) प्रगुणीकृतानि ऋजूकृतानि । उत्पत्त्यनन्तरं नाडीनां पट्टद्रव्येण ऋजुकरणात् । यद्वा । प्रगुणता पुष्टिः ।

(७) स्तन्येत्यादि । तेन हेतुना मातुः सकाशादधिकः स्नेहोऽयं मयि तव युक्तः । यतः स्तन्यपानत्यागादारभ्य क्रीडायोगं खेलनम् । यद्वा । क्रीडा कलायोगो विद्याप्रयोगस्तं प्रापिता । ततः पश्चाद्विनयमनौद्धत्यं प्रापिता वर्द्धिताश्च वृद्धिं प्रापिता च । दन्तपाञ्चालिकेव दन्तमयकृत्रिमपुत्तलिकेव सुमुखी रुचिरा । लोकेषु जनेषु श्रेष्ठे शोभादिगुणयुक्ते जामातरि त्वं स्थिरीकृता परिणयात् मयैव न तु पित्रादिभिरित्यर्थः । बाल्य एव कान्तिमत्त्वात् सुमुखीत्युक्तम् ।

(८) वैक्लव्यं व्याकुलता ।

(९) अकारणेत्यादि । परिहृत्तभाग्यया विपर्य्यस्तभाग्यया मया तव तनयः पुत्रो न दृष्टः । पुत्रः कीदृशः । अकारणेन अकथितहेतुतया स्मेरमीषद्धसनं तेन मनोहरं मनोज्ञम् आननं मुखं यस्य सः । शिखायां ललाटे च दत्तश्वेतसर्षपः । एतत्तु रक्षार्थे । अङ्कशायी क्रोडे सुप्तः । स्तनन्धयः स्तनपायी ।

लव। भअवदि! पसीद, णीसह्ह्मि सम्पदं जीवणुज्झणे, ता इमादो गिरिसिहरादो अत्ताणअं पवधुणिअ णिव्वुदा भविस्सं, (१०) तथा मे भअवदी आसिप्पसादं करेदु, जेण जम्मन्तरेवि पिअसहीं पेक्खिस्सम्। (ङ)

काम। ननु लवङ्गिके! कामन्दक्यापि नातः परं वत्सा-वियोगेन जीवितव्यं, समवायमुत्कण्ठावेग आवयोः। (११)

किञ्च। सङ्गमः कर्मणां भेदाद्यदि न स्यात् नु नाम नः।
प्राणानान्तु परित्यागे, सन्तापोपरमः फलम् ॥१२॥

लव। जह्वा तुम्हे आणवेध (च)। [उत्तिष्ठति।]

काम। [सदयं वीक्ष्य।] वत्से मदयन्तिके!

(ङ) भगवति! प्रसीद, निःसहास्मि साम्प्रतं जीवनोज्झने, तदस्माद्गिरिशिखरादात्मानं पातयित्वा निर्वृता भवेयं तथा मे भगवती आशीःप्रसादं करोतु, येन जन्मान्तरेऽपि प्रियसखीं प्रेक्षिष्ये।

(च) यथा यूयमाज्ञापयथ।

---

(१०) अत्र जीवितेति। तां विना जीवनमनर्हमिति भावः। निर्वृतेति। मरणे तद्वियोगदुःखापनयादिति भावः।

(११) उत्कण्ठेति। जन्मान्तरे तां द्रक्ष्यामीत्युत्कण्ठा ममापीत्यर्थः। तत् कथं मयापि क्षतोऽसिद्धतया त्वयि आशीर्दातव्येति भावः।

(१२) सङ्गम इति। नु भो नः अस्माकं कर्मणां सुकृतदुष्कृतादीनां स्वस्व-विहितानां कर्मणां भेदात् तारतम्यात् यदि सङ्गमः सम्मीलनं न स्यात् नाम किन्तु प्राणानां परित्यागे देहविसर्जनं कृत्वा सन्तापस्य विरहानलसम्भूतस्य उपरमः विनाश एव फलम्। मरणमेवैकमत्र शरणं विद्यते इति तात्पर्य्यम्।

मद। किं आणवेध अग्गेसरी होदुत्ति, ता जाव अव-
ट्ठिदम्हि (छ) (१३)।

लव। सहि! पसीद, विरम एत्तो अत्तणो वावादणादो, मा एदं जणं विसुमरेसि (ज)। (१४)

मद। [सकोपमिव।] अवेहि, णत्थि दे वसंवदा (झ)। (१५)

काम। [स्वगतम्।] हन्त! निश्चितं वराक्या। (१६)

मद। [स्वगतम्।] णाह मअरन्द! णमो दे णमो! (ञ) (१७)

(छ) किमाज्ञापयथ अग्रेसरी भवेति तद् यावत् अवस्थितास्मि।

(ज) सखि! प्रसीद, विरम एतस्मादात्मनो व्यापादनात् मैनं जनं विस्मरिष्यसि।

(झ) अपेहि, नास्मि ते वशंवदा।

(ञ) नाथ मकरन्द! नमस्ते नमः।

---

(१३) भाविवाक्यमुद्दीपाह किमिति। अत्र अग्रेसरी मरणे प्रथमा। अवस्थिता मर्तुम्।

(१४) अत्राहं स्थित इत्याशयः।

(१५) अथ न वशंवदा न आयत्ता। ते वचो न करिष्यामीत्यर्थः।

(१६) निश्चितं निश्चयः कृतः।

(१७) स्वगतं गुरुसमीपे प्रियस्मरणस्यायुक्तत्वात्। अत्र जन्मान्तरेऽप्ययं प्रियः स्यादिति तत्कालेऽस्य स्मरणमिति भावः।

लव। भअवदि! अअं ज्जेव्व महुमदीसीत्तसन्दाणिदप-
त्तमेहलो महीहरविडङ्को (ट)। (१८)

काम। कृतमिदानीं प्रस्तुतान्तरायेण।

वौ: पतितुमिच्छन्ति।]

[नेपथ्ये।] आश्चर्य्यमाश्चर्य्यम्!!

व्यतिकर इव भीमस्तामसो वैद्युतश्च,
क्षणमुपहतचक्षुर्वृत्तिरुद्भूय शान्तः।

काम। [विलोक्य। साश्रु सहर्षम्।]
कथमिह मम वत्सस्तत्किमेतत्।

[प्रविश्य मकरन्दः।]—किमन्यत्,
प्रभवति हि महिम्ना स्वेन योगीश्वरीयम्।

[नेपथ्ये।] कथमतिदारुणो जनसंमर्दो वर्त्तते।

मालत्यपायमधिगम्य विरक्तचेताः,
सांसारिकेषु विषयेषु च जीवितेषु।
निश्चित्य वह्निपतनाय, सुवर्णविन्दु-
मभ्येति भूरिवसुरित्यधुना हताः स्मः॥१९॥

(ट) भगवति! अयमेव मधुमतीसीतःसन्दानितपर्य्यन्तमेखलो महीधर| विटङ्कः।

---

(१८) अत्र मधुमती नदी। सन्दानितं बद्धम्। विटङ्को नितम्बप्रदेशः।

(१९) मालत्येति। मालत्यपायं मालतीमरणमधिगम्य ज्ञात्वा सांसारिकेषु विषयेषु राज्यपालनादिषु स्रक्चन्दनादिषु च जीवितेषु च विरक्तचेताः सर्वसुखच्छेदाभिलाषी भूरिवसुः मालतीपिता वह्निपतनाय निश्चित्य सुवर्णविन्दं नाम महादेवं अभ्येति समुपैति। असौ प्राणान् त्यक्तुं सुवर्णविन्दुनामकमहादेवस्थाने समागच्छति। इति हेतोरधुना भूरिवसुवियोगे वयं हताः स्मः।

मद । लवङ्गिके ! झत्ति मालदीमाहवाणं दंसणमङ्गलवो झत्ति अच्चाहिदं अ (ठ) । (२०)

कामन्दकीमकरन्दौ । [सहर्षम् ।] हा धिक्कष्टमाश्चर्य्यमाश्चर्य्यम् ! ।

किमयमसिपत्रचन्दनरसच्छटासारयुगपदवपातः ।
अनलस्फुलिङ्गकलितः किमयमनभ्रः सुधावर्षः ॥२१॥

सञ्जीवनौषधिविषव्यतिकरमालोकतिमिरसम्भेदम्,
अद्य विधिरग्निनिश्चयधरमयूखसंवलनमनुकुरुते ॥२२॥

[नेपथ्ये ।] हा ताद ! विरम, दंसणूसुअम्हि दे वअणकमलस्स, पसीद, सम्भावेहि मं । कहं मम कारणादो समत्थलोआलोआन्तरालविक्खादणिम्मलकुलेक्कमङ्गलपदीवभूदं अत्ता-

(ठ) झटिति मालतीमाधवौ: सन्दर्शनमङ्गलवो झटिति अत्याहितञ्च ।

(ड) हा तात ! विरम, दर्शनोत्सुकास्मि ते वदनकमलस्य प्रसीद सम्भावय माम् । कथं मम कारणात् समस्तलोकालोकान्तरालविख्यातनिर्मलकुलैक-

(२०) अत्याहितं महाभीतिः ।

(२१) किमित्यादि । असय: खड्गा: पत्राणि यस्य तस्य । दारकत्वात् । चन्दनरसच्छटा अभ्यर्थात् । आसारो वृष्टिः । तयोरेकदा अवपातः पतनं समयम् । भूरिवसुगतानर्थश्रवणादसिपत्रपातः । मालतीमाधवयोर्जीवनात् चन्दनरसासार इति भावः । किमयं मेघहीनोऽमृतवर्षोऽग्निस्फुलिङ्गमिश्रः ।

(२२) समित्यादि । सञ्जीवनौषधेर्विषस्य च व्यतिकरं मेलकं तेजस्तिमिरस्य च मेलकं वज्रस्य चन्द्रकरस्य च मिलनं विधाता अद्य अनुकरोतीति सङ्क्षेपार्थः । आर्य्याच्छन्दः ।

णअं परिच्चअसि, मए उण अणज्जाए णिरणुक्कोसा तुम्हं त्ति सम्भाविदं आसि (ड)। (२३)

काम। हा वत्से!

जन्मान्तरादिव पुनः कथमपि लब्धासि, भीरु! यावदयम्।
उपराग इव शशिकलां कवलयितुमुपस्थितोऽनर्थः॥ २४॥

लव। हा पिअसहि! (ढ)

ततः प्रविशति प्रमुग्धां (२५) मालतीं धारयन् माधवः।

माध। कष्टं भोः कष्टम्! (२६)

एषा प्रवासं कथमप्यतीत्य, याता पुनः संशयमन्यथैव।
को नाम पाकाभिमुखस्य जन्तुर्द्वाराणि दैवस्य पिधातुमीष्टे
॥२७॥

मङ्गलप्रदीपभूतमात्मानं परित्यजसि मया पुनः अनार्यया निरनुक्रोशा यूयमिति सम्भावितमासीत्।

(ढ) हा प्रियसखि!

---

(२३) अत्र लोको जगत्। अलोकः स्वर्गः। तयोर्मध्ये इत्यर्थः। मङ्गलश्रेयः। अनार्यया वाक्यया। निरनुकोशा निर्दया: मन्दभाग्य दानोपक्रमात्।

(२४) जन्मेत्यादि। उपरागो राहुग्रहः। यथा कृष्णपक्षाज्जन्मान्तराच्चन्द्रस्यैका कलोपलभ्यते तां च कवलयितुं राहुरुपस्थितस्तथा तावकीनमिदं वृत्तान्तस्वरूपमिति भावः।

(२५) प्रमुग्धा पितृशोकजनितमोहात्।

(२६) अनर्थपरम्परायोगादतिकष्टम्।

(२७) एषेति। एषा मालती कथमप्यतिकष्टेन प्रवासमतीत्य प्रवासजनित-

मक। [सहसोपसृत्य माधवं प्रति।] सखे! अथ स योगिनी क्व?

माध। श्रीपर्वतादिहाहं सत्वरमपतं तयैव सह सद्यः।
करुणावनेचरवचनादनन्तरं तां न पश्यामि ॥२८॥

कामन्दकीमकरन्दौ। [सप्रणयमाकाशे।] महाभागे पुनस्त्रायस्व, किमर्थमन्तर्हितासि।

मदयन्तिकालवङ्गिके। सहि मालदि! णं भणामि मालदित्ति, [सोत्कण्ठम्।] भअवदि परित्ताहि, चिरणिरुद्धणीसासणिस्फुरं (२९) से हिअअं! हा अमच्च! हा पिअसहि! दुवेवि तुझे परप्परावसाणस्स कारणं जादा (ण)।

(ण) सखि मालति! ननु भणामि सखि मालतीति। भगवति! परित्रायस्व, चिरनिरुद्धनिश्वासनिःस्फुरमस्या हृदयम्। हा अमात्य! हा प्रिय सखि! द्वावपि युवां परस्परावसानस्य कारणतां यातौ।

कष्टमनुभुयेत्यर्थः। कपालकुण्डलाहस्तपतितत्वात्। पुनः संशयमिव याता प्राप्ता पितृशोकात् अधुना अस्या जीवनमरणयोः संशयो विद्यत इत्यर्थः। अन्यथा पाकाभिमुखस्य फलोन्मुखस्य दैवस्य द्वाराणि पिधातुमाच्छादयितुं को नाम जन्तुरीष्टे प्रभवति न कोऽपीत्यर्थः। मालतीसंवलितमेताहृक् घटनं सर्वं दैवमूलमित्यर्थः।

(२८) श्रीपर्वतादिति। श्रीपर्वतादहमिह सत्वरमतिशीघ्रमपतम् आगतोऽस्मि। तया योगिन्या सह। करुणाप्रधानवनेचरवचनादनन्तरं तां योगिनीं न पश्यामि। मालत्यपायमधिगम्येत्यादि करुणवनेचरवचनम्। आर्याच्छन्दः।

(२९) सखि मालति! ननु भणामि सखि मालति! इति प्रक्रमोऽयम।

काम। हा वत्से मालति!

माध। हा प्रिये!

मक। हा प्रियसखि! [सर्वे मोहमुपगम्य संज्ञां लभन्ते।]

काम। [ऊर्द्ध्वमवलोक्य।] तत्किमेष झटिति पात्यमानादिव अम्बुदात् अम्बुनिवहः परिस्रवन् अस्मान् प्रीणयति। (२०)

माध। [सोच्छ्वासम्।] अये! प्रत्यापन्नचेतना मालती। तथाहि अस्याः

भवति विततश्वासा नासा, प्रसन्नपयोधरं
हृदयमपि च स्निग्धं चक्षुर्निजप्रकृतौ स्थितम्।
तदनु वदनं मूर्च्छाच्छेदात् प्रसादि विराजते
परिगतमिव प्रारब्धेऽङ्कः श्रिया सरसीरुहम् ॥२१॥

[नेपथ्ये।] अविगणय्य नृपं सहनन्दनं
चरणयोर्नतमग्निमुखे पतन्।
सपदि भूरिवसुर्विनिवर्त्तितो
मम गिरा गुरुसम्भ्रदविस्मयः॥ २२॥

---

(२०) सौदामिनीप्रभावकृततद्वृष्ट्याश्चर्य्यमाह। किमिति! मेघाभावाद् वृष्टेराश्चर्य्यहेतुतया इवकारः सङ्गच्छते।

(२१) भवतीति। वितताः श्वासा निश्वासमारुता यत्र सा तादृशी नासा भवति, प्रसन्नौ पयोधरौ कुचौ यत्र तत् हृदयं स्निग्धं शोभनञ्च, चक्षुः निजप्रकृतौ निमीलनोन्मीलनरूपस्वभावे स्थितम्। तदनु तदनन्तरं मूर्च्छाच्छेदात् वदनं प्रसादि प्रसन्नं सत् विराजते तत्रोत्प्रेक्ष्यते, अङ्कः प्रारब्धे, ऊषसि श्रिया परिगतं शोभायुक्तं सरसीरुहं पद्ममिव।

(२२) अवीत्यादि। सपदि तत्क्षणं मम गिरा महाख्या अमात्यो भूरिवसुः विनिवर्त्तितः। भूरिवसुः कीदृशः। नन्दनसहितं नृपं पादनतमपि तिरस्कृत्य अग्निराशौ पतन्। गुरुसम्भ्रदविस्मयः गाढहर्षाश्चर्य्यश्च। सहभावस्य विकल्पात्सहनन्दनमिति।

[माधवमकरन्दौ। जहं मवलोक्य सविस्मयम्।]

भगवति ! दिष्ट्या वर्द्धसे।

सा योगिन्यम्बरतो विघटितजलदा भ्युपैत्ययं यस्याः।
वागमृतजलासारो जलदजलासारमतिशेते ॥३३॥

काम। प्रियं नः प्रियम्।

माल। दिट्ठिआ चिरस्स पच्चुज्जीविदह्मि (त)। (३४)

काम। [सहर्षं सवाष्पञ्च।] एह्येहि पुत्रि ! (थ)

माल। कधं भअवदी ?। [इति पादयोः पतति।]

काम। [उत्थाप्यालिङ्ग्य मूर्ध्नि आघ्राय।]

जीव जीवितसमाय जीवितं देहि, जीवतु सुहृज्जनश्च ते।
अङ्गकैस्तुहिनसङ्गशीतलैः पुत्रि ! मां प्रियसखीञ्च जीवय॥३५

(त) दिष्ट्या चिरस्य प्रत्युज्जीवितास्मि।

(थ) कथं भगवती ?।

---

(३३) सेत्यादि। सेयं योगिनी विघटितजलदा भिन्नमेघा सम्प्रति आयाति यस्या अयं वागमृतजलासारो वचनामृतजलधारा जलधरजलधारामप्यतिक्रामति। शैत्यादिना ततोऽप्यधिका भवतीत्यर्थः।

(३४) अत्र चिरस्य बहुकालेन।

(३५) जीवेत्यादि। हे पुत्रि ! त्वं जीव। ततो जीवितसमाय वल्लभाय जीवितं देहि। ते तव सुहृज्जनः बान्धवोऽपि जीवतु। तुहिनसङ्गशीतलैः हिम-सम्बन्धशीतलैः अङ्गकैः प्रशस्ताङ्गैः। प्रशस्तार्थे कन्। मां प्रियसखीं लवङ्गिकां च जीवय।

माध। वयस्य मकरन्द! सम्प्रति उपादेयो जीवलोकः संवृत्तः।

मक। [सहर्षम्।] एवमेतत्।

मदयन्तिकालवङ्गिके। पिअसहि! मणोरहातिक्कन्तदंसणे! सम्भावेहि अम्हे परिस्सङ्गेण (द)।

माल। हा पिअसहिओ! [उभे आलिङ्गतः।]

काम। वत्सौ! किमेतत्।

माधवमकरन्दौ। भगवति!

कपालकुण्डलाकोपदुर्जातजनितापदः।
वयमप्युद्धृताः कृच्छ्रात् निर्बन्धेनार्य्ययानया ॥३६॥

काम। कथमघोरघण्टवधविजृम्भितमेतत्।

मद। लवङ्गिके! अच्चरीअं! पुनरुत्तदारुणस्स परिणामरमणीअं विहिणो विलसिदं (ध)।

प्रविश्य सौदामिनी। [उपसृत्य।]

(द) मनोरथातिक्रान्तदर्शने! सम्भावयावाम् परिष्वङ्गेन।

(ध) अहो आश्चर्यमाश्चर्यं! पुनरुक्तदारुणस्य परिणामरमणीयं विधेर्विलसितम्।

---

(३६) कपालेति। कपालकुण्डलायाः कोपदुर्जातात् कोपोत्पत्त्या दुर्जातकोपात् विशेषतस्समाप्ति उपसनिपातप्राप्तत्वादिति भावः। जनितापदः। अनया दृश्यमानया आर्य्यया मान्यया सौदामिन्या निर्बन्धेन समधिकयत्नातिशयेन कृच्छ्रात् अतिकष्टेन वयमपि उद्धृताः। सौदामिनीकृपामन्तरेण न वयमपि विपद उत्तरितुं समर्था इति भावः।

भगवति कामन्दकि ! स एष वञ्चिरन्तनोऽन्तेवासिजनः प्रणमति ।

काम । अये ! भद्रा सौदामिनी ?

माधवमकरन्दौ । [सविस्मयम् ।] कथमियं भगवत्याः पक्षपातस्थानम् आद्या शिष्या सौदामिनी । तत्सर्वमधुना सङ्गच्छते ।

काम । एह्येहि भूरिजनजीवितदानपुण्य-
सम्भारधारिणि ! चिरादसि हन्त दृष्टा ।
दत्तप्रमोदमपि नन्दय मे शरीर-
मालिङ्ग्य सौहृदनिधे ! विरम प्रणामात् ॥३७॥

अपि च । वन्द्या त्वमेव जगतः स्पृहणीयसिद्धि-
रेवंविधैर्विलसितैरतिबोधिसत्त्वैः ।
यस्याः पुरा परिचयप्रतिबद्धबीज-
मुद्भूतभूरिफलशालि विजृम्भितं ते ॥३८॥

---

(३७) एहीत्यादि । मालतीरक्षणेन हे बहुजनरक्षणजन्यपुण्यनिवहधारिणि ! चिराय त्वं दृष्टासि । अतो हेतोस्त्वम् एहि एहि आगच्छ आगच्छ । हन्त हर्षे । ममाङ्गमालिङ्ग्य हर्षय । शरीरं कीदृशम् । दत्तप्रामादमपि दत्तानन्दमपि मालतीदर्शनेनेति भावः । हे सौहृदनिधे ! सौहृदाश्रये ! प्रणामात् नतेर्विरम ।

(३८) तदेवाह । वन्द्येत्यादि । त्वमेव संसारस्य वन्द्या नमस्या । एवंविधैर्विलसितैराकाशक्रमणरूपैर्वा श्लाघनीयसिद्धिस्त्वं यतः । कीदृशैः । बोधिसत्त्वा जीमूतवाहनादयः । तानप्यतिक्रामन्ति तैः । तेषामेकैकजीवनाख्यया तु अनेकजीवनदानादतिशय इति भावः । यद्वा । बोधिसत्त्वो बुद्धविशेषः । तदतिक्रमवर्त्तिभिः । अनेकपुण्यकारित्वात् । यस्यास्तव विजृम्भितं चेष्टितं पुरा पूर्वं परिचयेन प्रतिबद्धमङ्कुरितं बीजं कारणं यत्र तत् । उद्भूतभूरिफलशालि उद्भूतप्रचुरफलयुक्तं च भवति । तथा च त्वदुपकरणेन कृतार्थास्मीति भावः । अन्यदपि बालमाद्यङ्कुररूपं विजृम्भितं पूर्वंप्रतिबद्धबीजमुद्भूतप्रचुरफलशालि भवतीति ध्वनिः ।

मदयन्तिकालवङ्गिके। इयं सा अज्ञा सौदामिनी।

माल। बाढं इमाए क्खु भअवदीसंबन्धपक्खवादिणीए णिब्भच्छिअ कवालकुण्डलां अत्तणो आवसधं उवणीअ मं भअवदीणिव्विसेसं समासासिदह्मि, किन्तु केसरावलीसाहिणाणहत्याए इह आगन्तूण, सव्वे तुह्मे सन्धारिदा मरणादो, सा एसा जीविदप्पदाइणी सौदामिणी (न)।

मदयन्तिकालवङ्गिके। सुप्पसणा णो कणिट्ठा भअवदी (प)।

माधवमकरन्दौ। अहो नु खलु भोः!।

> अपि चिन्तामणिश्चिन्तापरिश्रममपेक्षते।
> इदं त्वचिन्तितं मन्ये कृतमाश्चर्यमार्यया ॥२८॥

सौदा। [स्वगतम्।] हन्त! लज्जयति मामिवं सौजन्यमेषाम्। [प्रकाशम्।] भगवति! एतत् प्रहृष्टनन्दनाभिनन्दितेन

(न) अनया खलु भगवतीसम्बन्धपक्षपातिन्या, निभर्त्स्य कपालकुण्डलामात्मनः आवसथमुपनीय मां भगवतीनिर्विशेषं समासादितास्मि, किन्तु केसरावलीसाभिज्ञानहस्तया इहागत्य सर्वे यूयं सन्धारिता मरणात्, सैषा जीवितप्रदायिनी सौदामिनी।

(प) सुप्रसन्ना नः कनिष्ठा भगवती।

---

(२८) अपीत्यादि। चिन्तामणिरपि चिन्ताख्यं परिश्रममपेक्षते। अचिन्तामणित्वव्याघातादिति भावः। इदं पुनराश्चर्यं मन्ये यत् [illegible]च्चिन्तितं कृतमिति।

राज्ञा पद्मावतीश्वरेण भूरिवसोः प्रत्यक्षमभिलिख्य पत्रम् आयुष्मतो माधवस्य प्रेषितम्। [इति पत्रमर्पयति।]

काम। [गृहीत्वा वाचयति।] स्वस्त्यस्तु वः परमेश्वरः समाज्ञापयति। यथा

श्लाघ्यानां गुणिनां धुरि स्थितवति श्रेष्ठान्वये च त्वयि
प्रत्यस्तव्यसने महीयसि परं प्रीतोऽस्मि जामातरि।
तेनेयं मदयन्तिकाद्य भवतः प्रीत्यै तव प्रेयसे
मित्राय प्रथमानुरागघटिताप्यस्माभिरुत्सृज्यते ॥४०॥

[माधवमुद्दिश्य।] वत्स! श्रूयताम्।

माध। श्रुतमिदानीं सर्वतः कृतार्थोऽस्मि।

माल। दिट्ठिआ दाणिं अवहदं णो हिअअस्स आसङ्कासल्लं (क)।

लव। सम्पदं निरवसेसं माहवसिरिणो मालदीए अ समं फलिदा मणोरहा (ख)।

(क) दिष्ट्या इदानीमपहृतं नो हृदयस्याशङ्काशल्यम्।

(ख) साम्प्रतं निरवशेषं श्रीमाधवस्य मालत्याश्च समं फलिता मनोरथाः।

---

(४०) श्लाघ्यानां प्रशंसनीयानां गुणिनां गुणवतां धुरि स्थितवति अग्रगण्ये श्रेष्ठान्वये प्रशस्तवंशे प्रत्यस्तं विच्छिन्नं व्यसनं कष्टं येन तस्मिन् महीयसि प्रकृष्टतमे जामातरि त्वयि परं अत्यर्थं प्रीतोऽस्मि, तेन हेतुना कारणेन भवतः प्रीत्यै तव सन्तोषार्थं तव प्रेयसे मित्राय प्रियतमाय सुहृदाय मकरन्दाय प्रथमानुरागघटिता आदौ प्रीतिसंमिलिता मदयन्तिकापि अस्माभिः अद्य उत्सृज्यते दीयते।

मक । [पुरोऽवलोक्य ।] कथमवलोकिताबुद्धरक्षिते कलहंसकेन सह सुप्रमोदं नृत्यन्त्यावित एवागच्छतः ।

ततः प्रविशतोऽवलोकिताबुद्धरक्षिते, कलहंसश्च । विविधं नृत्यं कृत्वा सर्वे उपसृत्य सप्रणामं कामन्दकीं प्रति ।

जअ भअवदि कज्जसिद्धाणे ! [माधवं प्रति ।] जअ जअ मअरन्दणन्दण ! माहव पुण्णचन्द ! दिट्ठिआ वड्ढसि (भ)

सहर्षं सर्वे सस्मितं पश्यन्ति ।

लव । को वा इमस्सिं परिपुरिदसव्वमङ्गलसवे ण णच्चदि । (म)

काम । एवमेतत्, अस्ति वा कुतश्चिदेवम्भूतं विचित्ररमणीयोज्ज्वलं महाप्रकरणम् ।

सौदा । इदमत्र रमणीयान्तरं यदमात्ययोर्भूरिवसुदेवरातयोश्चिरात् पूर्णोऽयमितरेतरापत्यसम्बन्धमनोरथः ।

माल । [स्वगतम् ।] कहंविअ ।

माधवमकरन्दौ सकौतुकम् ।

भगवति ! अन्यथा वस्तुवृत्तमन्यथा वचनमार्य्यायाः ।

लव । [जनान्तिकम् ।] भअवदि ! किं एत्थ पडिवज्जिदव्वं । (य)

काम । [स्वगतम् ।] सम्प्रति मदयन्तिकासम्बन्धात् नन्दनोपग्रहात्यन्तसस्पृहाः खलु वयम् । [प्रकाशम् ।] वत्सौ !

(भ) जय भगवति कार्य्यसिद्धे ! जय मकरन्दनन्दन ! माधव पूर्णचन्द्र ! दिष्ट्या वर्द्धसे ।

(म) को वा अस्मिन् परिपूरितसर्व्वमङ्गलोत्सवे न नृत्यति ।

(य) भगवति ! किमत्र प्रतिपत्तव्यम् ।

न खलु अन्यथा वस्तुवृत्तं, यतः श्रावकावस्थायामस्य सौदा-मिनीप्रत्यक्षमनयोर्वृत्तेयं प्रतिज्ञा अवश्यमावाभ्यामपत्यसम्बन्धः कर्त्तव्य इति, प्रधानप्रकृतिकोपस्त्वेवं परिहृतः ।

माल । अहो संवरणम् ।

माधवमकरन्दौ । [आश्चर्यम् ।] जयन्ति महतां विसंष्ठुलाः प्रतीपिन्यः कल्याणिन्यो नीतयः ।

काम । वत्स माधव !

यत्प्रागेव मनोरथैर्वृतमभूत्कल्याणमायुष्मतो-
स्तत्पुण्यैर्मदुपक्रमैश्च फलितं क्लेशोऽपि मच्छिष्ययोः ।
निष्णातश्च समागमोऽपि विहितस्त्वत्प्रेयसः कान्तया
सम्प्रीतौ नृपनन्दनौ, किमपरं श्रेयस्तदप्युच्यताम् ॥४१॥

[माध । सहर्षं प्रणमति ।] भगवति ! अतोऽपि परं प्रियमस्ति, तथापि इदमस्तु, भगवतीप्रसादात् ।

सन्तः सन्तु निरन्तरं सुकृतिनो विध्वस्तपापोदया
राजानः परिपालयन्तु वसुधां धर्मे स्थिताः सर्वदा ।

---

(४१) यदिति । प्राक् प्रथममेव आयुष्मतोः कल्याणं मनोरथैर्यत् वृतमभूत् तत् पुण्यैः मामकसुकृतैर्मदुपक्रमैश्च मदीयोद्योगैर्वा फलितम् सम्पादितम् मच्छिष्ययोः क्लेशोऽपि क्लेशोत्पादके सत्यपि कर्मणि त्वत्प्रेयसः तव प्रियतमस्य कान्तया निष्णातश्च निपुणश्च समागमो विहितः, एतादृशं न केषाचिदटवि इत्यर्थः नृपनन्दनौ सम्प्रीतौ प्रसन्नौ, अपरं श्रेयः मङ्गलं किमस्ति, तदुच्यतां वक्तव्यं भवति इत्यर्थः ।

(४२) सन्त इत्यादि । सन्तः सज्जनाः विध्वस्तपापोदयाः पापविवर्जिताः निरन्तरं सुकृतिनः पुण्यशीलाः सन्तु भवन्तु । राजानः भूपालाः सर्वदा धर्मे

काले सन्ततवर्षिणो जलमुचः सन्तु स्थिराः पृथ्वतो,
मोदन्तां घनबद्धबान्धवसुहृद्गोष्ठीप्रमोदाः प्रजाः ॥४२॥

इति निष्क्रान्ताः सर्वे । मालतीमाधवे दशमोऽङ्कः
समाप्तमिदं मालतीमाधवप्रकरणम् ।

जलमुचः मेघाः [illegible] सन्ततवर्षिणः [illegible] सन्तु । पृथ्वतः स्थिराः पुण्यकार्यतत्पराः [illegible] बान्धवानां सम्बन्धिनां सुहृदां मित्राणां गोष्ठीषु प्रमोदः [illegible] ताः प्रजाः लोकाः मोदन्ताम् । अत्र [illegible] [illegible] ।

इति बि, ए उपाधिधारिणा पण्डितकुलपतिना
श्रीजीवानन्दविद्यासागरेण
विरचिता मालतीमाधवव्याख्या समाप्ता ।